स्तवचिन्तामणिः

आचार्यश्रीमदानन्दसागरः

गृणीते तत्वमात्मीयमात्मीकृत जगत्त्रयम्
उपायोपेय रूपाय शिवाय गुरवे नमः ।

'शिवो नो भव सर्वत्र योऽसि सोऽसि नमोऽस्तु ते

[illegible]

वाराणसेय-सं...
प्रकाशक एवं पुस्त...
सी० २७/६४ ...

Rs 100

नया कवितया किं वा,
किं वा वनितया तया ।
पद विन्यास मात्रेण
न यया पहृतं मनः ॥

OT/A/129 29 5708 हरिशंकर का पत्र/[illegible]
7.2-91 बैंक ड्राफ्ट

23
[illegible]

5
18
16
39
19
58

23

शं.
शं

[illegible]
40 नौकरी



Shri Shivoham Sagar Granthmala's Tenth Puspa-

SHRI BHATTANARAYANA'S

STAVACHINTAMANI

with Comentry

by

Shri Kshemrajacharya

Published by

Sarvadarshnacharya

Shri Krishnanand Sagar

Edited with Introduction

Under Direction from

1008 Mahamandaleshwar

Shri Swami Akhandanand Sagar Maharaj

स्तवचिन्तामणिः
STAVACHINTAMANI

श्रीशिवोऽहंसागरग्रन्थमालाया दशमं पुष्पम्–

श्रीभट्टनारायणविरचितः

स्तवचिन्तामणिः

श्रीक्षेमराजाचार्यविरचितवृत्त्युपेतः

अनन्तश्रीविभूषित १००८ महामण्डलेश्वर-

श्रीमदखण्डानन्दसागरमहाराजानां

निदेशेन

सर्वदर्शनाचार्यश्रीकृष्णानन्दसागरेण

भूमिकया सह सम्पाद्य

प्रकाशितः

Published by

PRTYABHIGYAN PRAKASHAN

for

Acharya Krishnanand Sagar

B. 37/48-A-1-2, Birdopur

VARANASI-221010

&

Shri Madhvanand Ashram

P. O.-Dharmaj : Distt.-Kheda

GUJARAT.

All right riserved by the publisher

First Edition

1985

Price Rs. :

Printed by

JYOTI PRESS

Madhyameshwar, Varanasi.

भूमिका

यह लघुकलेवर के रूप में विद्यमान स्तवचिन्तामणि नामक ग्रन्थ कश्मीर शैवाद्वैतदर्शन को एक अनुपम कृति है। इसमें श्रीभट्टनारायण नें भगवान् परमशिव की उच्चकोटि का अद्वैतपरक स्तवन किया है। अद्वैत-परक स्तुति अपने आराध्यदेव से अभिन्नभावना का ज्वलन्त प्रमाण है। जैसा कि श्रीराम ने भगवान् शंकर की 'शिवगीता' में अद्वैतपरक स्तुति की है और परम शिव को सृष्टि-स्थिति-संहार-अनुग्रह एवं निग्रहरूप पञ्चकृत्यकारी देवाधिदेव के रूप में समझा है। संक्षेप में यह है कि परमात्मा को तात्त्विक दृष्टि से जाना है। वस्तुतः भगवान् परमशिव ही विश्वोत्तीर्ण अज-अजन्मा-अविनाशी परमतत्त्व हैं। अपने संकल्पमात्र से ही विश्व का निर्माण करने में समर्थ है। ग्रन्थकार ने इस विषय में कहा है कि--

'निरुपादान संभारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघाय शूलिने' ॥ ५ ॥

इसी प्रकार प्रत्येक श्लोक में परमतत्त्व का उच्चकोटि की दार्शनिक शैली में भाव देखने में आता है। यह ज्ञान की उच्च भूमिका में पहुँचने वाला व्यक्ति हो ऐसा लोकोत्तर परमशिवतत्त्व का वर्णन कर सकता है। इस जोवन की सर्वोत्कृष्ट वस्तु तत्त्वज्ञान है। जिसको भगवान् कृष्ण ने गीता में लोकपावन कहा है--

'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।'

भगवान् परमशिव की अनुग्रहशक्ति से हो तत्त्वज्ञान का अंकुर अंकुरित होता है। ऐसी स्थिति में तत्त्वदर्शी मन, वाणी एवं बुद्धिपूर्वक शिवतत्त्व में समाविष्ट हो कर अलौकिकभाव से स्तवन करने लग जाता

है। शिवमहिम्नः में पुष्पदन्ताचार्य ने कहा है कि मेरी वाणी आपके लोकोत्तर दिव्यातिदिव्यगुणानुवाद से निर्मल-पवित्र होती है--

मधुस्फीता वाचः परमममृतं निर्मितवतः
तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवस्थिता ॥

इस असारसार संसार में भगवत्स्वरूप का नाम-स्मरण एवं स्तवन से बढ़ कर कोई वस्तु उत्तम नहीं समझी जाती है। सांसारिक भावों से दूर हो कर भक्तहृदय की सहज प्रवृत्ति पवित्र कार्य की ओर उन्मुख होती है, यही निष्काम कर्मयोग का स्वरूप है। अपने चरित्र निर्माण से अनेकानेक प्राणियों का भी जीवन प्रवाह आध्यात्मिक प्रकाश की ओर मुड़ जाता है और वह एक नूतन आध्यात्मिक पथ का प्रदर्शक बन जाता है। कश्मीर शैवदर्शन के आचार्यों ने अपनी ज्ञानगरिमा की निधि को विश्व के प्रत्येक स्वस्थ मनुष्य के लिये खोल दिया है। सत्साहित्य ही विश्व की स्थिति को अखण्ड बनाये रखता है। इस प्रकार शैवदर्शन की इस निर्मल चिन्तन-प्रणाली को आज भी मनीषियों ने विच्छिन्न नहीं होने दिया है।

श्रीभट्टनारायण द्वारा प्रणीत यह ग्रन्थ शैवाद्वैत सिद्धान्त का शुद्ध रूप से प्रतिपादक है। आचार्य अभिनवगुप्तपाद ने श्रीभट्टनारायण का नाम प्राचीन शैवदर्शन के गुरुजनों में उट्टङ्कित किया है। इनकी जन्मभूमि कश्मीर प्रदेश है। कश्मीर आज भी विश्व में काव्य, केशर एवं सौन्दर्य का अनुपम स्थान है। यहाँ पर अद्वितीय विद्वान् कुसुमाञ्जलीकार जगद्धर भट्ट, महाप्रतिभा सम्पन्न साहित्यकार मम्मट एवं महावैयाकरणाचार्य कैयट आदि हुए हैं। आचार्य श्री क्षेमराज ने इस प्रस्तुत ग्रन्थ पर व्याख्या लिखी है। ये अभिनवगुप्तपादाचार्य के शिष्य थे। इनका काल दशम शताब्दी के उत्तरार्ध का माना जाता है। इन्होंने शैवाद्वैत सिद्धान्त

के अनेक ग्रन्थों पर वृत्तियाँ लिखी हैं, इसी से इनके अगाध पाण्डित्य एवं प्रतिभा का परिचय मिलता है। जैसे कि इनके द्वारा प्रणीत स्वच्छन्द-तन्त्र-उद्योत, प्रत्यभिज्ञाहृदयम्, स्पन्दनिर्णय, शिवसूत्रविमर्शिनी, शिवस्तोत्रा-वली-विवृत्ति आदि कृतियाँ देखने में आतो हैं।

भगवान् परमशिव को एवं उनके प्रिय भक्तवृन्द को हृदय से प्रह्वीभावपूर्वक प्रणाम करता हुआ मैं अपनी लेखनी को विराम देता हूँ, करुणाकर भगवान् परमशिव हम सब का परम कल्याण करें।

विजयादशमी
२०४२

कृष्णानन्दसागरः

[illegible]
[illegible]
[illegible]
[illegible]

ॐ नमः सच्चिदानन्दाय

अथ

स्तवचिन्तामणिः

श्रीभट्टनारायणविरचितः

श्रीक्षेमराजकृतविवृत्युपेतः

प्रकाशमाने परमार्थभानौ नश्यत्यविद्यातिमिरे समस्ते।
तदा बुधा निर्मलदृष्टयोऽपि किंचिन्न पश्यन्ति भवप्रपञ्चम् ॥ १ ॥
नमः शिवाय सततं पञ्चकृत्यविधायिने।
चिदानन्दघनस्वात्मपरमार्थावभासिने ॥ २ ॥
अन्तः - स्पन्दान्दोलनानन्दसंपद्बाह्यस्पन्दामन्दसंदोहिनीभिः।
संविद्धाराधोरणीभिः समन्तात् सिञ्चन् विश्वं स्वात्मशंभुर्नमस्यः ॥ ३ ॥
नारायणः स्वहृदयाम्बुनिधेर्विवेकभूभृद्विमर्दरभसोच्छलितं यदेतत्।
श्रीशंकरस्तुतिरसायनमाचकर्ष तच्चर्वणादिह बुधा विबुधा भवन्तु ॥ ४ ॥

इह स्तोत्रादौ स्तोत्रकारः सर्वोपनिषत्प्रदर्शितसत्संप्रदायोद्घाटनमुखं स्वात्मपरमार्थपरमेश्वरस्वरूपसमावेशं व्युत्थाने विमृष्टुमाह—

सुगिरा चित्तहारिण्या पश्यन्त्या दृश्यमानया।
जयत्युल्लासितानन्दमहिमा परमेश्वरः ॥ १ ॥

प्रकाशानन्दरूपः परमेश्वरः परमानन्दात्मकस्वातन्त्र्यशक्तिस्वरूप-परावागालिङ्गितमूर्तिः अनयैव शक्त्या शिव-मन्त्रमहेश्वर-मन्त्रेश्वर-मन्त्र-विज्ञानाकलात्मशुद्धाध्वप्रमातृमयीं भारतीं वाचं पश्यन्तीं, मण्डलि-श्रीकण्ठ-क्रोधेश-वीरभद्र-शतरुद्रानन्त-भुवनेश्वरप्रथात्मिकां मध्यमाम्, एतदतिरिक्त-भुवनेश्वर-विचित्रप्रलयाकल-सकलनिष्ठां तत्तन्नानारूपप्रपञ्चपराभासां पूर्व-पूर्ववाक्छक्तिव्याप्तां वैखरीं च वाचं स्वभित्ताववभासयन्, अवरोहक्रमेण विश्ववैचित्र्यमारचयति। इत्थं च वैखरीप्रधानसकलप्रमातृपदेऽपि यथोक्त-व्याप्तिकपर-परापर-मध्यमाख्यवाक्त्रयावियोग एव। अत एव अनुजिघृक्षुः

भगवान् वैखरीमध्यमाप्रशमनपुरःसरं पश्यन्तीदशामुन्मज्ज्ययथोक्तानाश्रित-शिवपर्यन्तव्याप्तिकां तां वेद्यत्वेन आभास्य वेद्यवेदकस्वात्मसत्ताम् आरोहण-क्रमेण आवेशयन् भक्तिभाजः, सर्वोत्कर्षेण वर्तते,—इत्ययमत्र वाक्यार्थः ।

पदार्थस्तु—परमः,—चिदात्मरूपः ईश्वरो जयति—स्वधरान्ताशेष-विश्वोत्कर्षेण वर्तते, कीदृक् ? वैखरीमध्यमापेक्षया शोभना व्यख्यातपरमार्थ या इयम् अविभागाक्रमसततावभासरूपा मध्यमादिवाग्व्यापिनी पश्यन्ती तया दृश्यमानया—स्फुटम् उन्मग्नरूपत्वेन स्फुरन्त्या, अत एव बुद्ध्युपारूढ सक्रमसंकल्पविकल्पकारि मध्यमात्मकं चित्तं, तदनुषङ्गेण च वर्णव्यञ्जक-वैखर्याश्रयं प्राणमपि ताच्छील्येन हरन्त्या—निःशेषं प्रशमयन्त्या, दृश्यमानय च—अनाश्रितपर्यन्ते रूपे वेदकताप्रशमनेन वेद्यात्मनैव अवभासमानय हेतुभूतया उल्लासितः,—प्रत्यभिज्ञापदवीं नीतः परावागात्मा आनन्दमहिम येन, विकल्पप्रशमनपुरःसरं पश्यन्तीभूमिमुन्मज्ज्य तद्द्वाराधिरूढानाश्रित-पदवीमपि वेद्यत्वेन आभास्य परमानन्दात्मकपरमाद्वयपरमप्रमातृतामुन्मील यन् अनुगृह्णाति परमेश्वर इत्यर्थः । अयमेव च सर्वरहस्येषु सारभूत समावेशोपाय आम्नातः । यथोक्तं श्रीमालिनीविजये——

'अकिञ्चिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः ।
उत्पद्यते य आवेशः शांभवोऽसावुदीरितः ॥'

इति । अस्मत्परमेष्ठिना श्रीप्रत्यभिज्ञाकृतापि——

'विकल्पहानेनैकाग्र्यात्क्रमेणेश्वरतापदम् ।'

इति । श्रीज्ञानगर्भेऽपि——

'विहाय सकलाः क्रिया जननि मानसीः सर्वतो
विमुक्तकरणक्रियानुसृतिपारतन्त्र्योज्ज्वलम् ।
स्थितैस्त्वदनुभावतः सपदि वेद्यते सा परा
दशा नृभिरतन्द्रितासमसुखामृतस्यन्दिनी ॥'

इति । यथा कयाचित् हृदयहारिण्या तरुण्या प्रियतयानुरञ्जकमधुरगिर परस्परानुरागवशतः साभिलाषं दृश्यमानया, पश्यन्त्या च, उदञ्चद्रोमाञ्चा-दिसकलसात्त्विकभावदर्शनोन्नीयमानानन्दमहिमा कश्चित् ईश्वरो जयति तथा व्याख्यातक्रमेणायमपि परमशिवात्मा स्वात्मा,—इत्यनुरणनशक्त्य श्लेषध्वनिः । पश्यन्त्यादीनां स्वरूपं तत्रभवता भर्तृहरिणा उक्तम्, यथा——

'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥
केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥
स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥'

इति ॥ १ ॥

एवं शक्तिमत्प्रधानां शांभवीं भुवं स्तुत्वा शक्तिप्रधानां स्तोतुमाह—

यः स्फीतः श्रीदयाबोधपरमानन्दसंपदा ।
विद्योद्द्योतितमाहात्म्यः स जयत्यपराजितः ॥ २ ॥

स—भगवान्, अपराजितो—विश्वातिशायी जयति,—तमेव उत्कृष्टतया परामृशन्तः समाविशामः । श्रीः—अशेषकारणविभवप्रथाभित्तिः परा चैतन्य-लक्ष्मीः, दया—विश्वानुग्रहात्मा परेच्छाशक्तिः, बोधः—ज्ञानशक्तिः, परमानन्दः—स्वातन्त्र्यशक्तिः, संपत्—स्वप्रथारूपसमृद्ध्यात्मा क्रियाशक्तिः, श्रीश्च दया च बोधश्च परमानन्दश्च संपच्च तत् श्रीदयाबोधपरमानन्दसंपत् तेन चिदिच्छा-ज्ञानानन्द-क्रियात्म-स्फाररूपेण शक्तिपञ्चकेन यः स्फीतः—परिपूर्णः, तत एव विश्वानुग्रहप्रवणत्वात् विद्यया—'अहमेव सर्वम्' इति अहन्तेदन्तासामानाधिकरण्यप्रथात्मना शुद्धविद्याशक्त्या, उच्चैर्द्योतितं—पराद्वयमयत्वेन अनुग्राह्याणां प्रकटीकृतं माहात्म्यं—ज्ञानक्रियास्फारो येन ॥ २ ॥

एवं शक्तिप्रधानं भगवद्रूपं स्तुत्वा नरप्रधानमपि स्तोतुमाह—

प्रसरद्बिन्दुनादाय शुद्धामृतमयात्मने ।
नमोऽनन्तप्रकाशाय शंकरक्षीरसिन्धवे ॥ ३ ॥

शं—पराद्वयप्रथारूपं श्रेयः करोति यः स एव स्वच्छत्व-प्रकाशघनत्व-आह्लादकत्वसर्वसंपदास्पदत्वादिधर्मयोगात् क्षीरसिन्धुरिव, तस्मै नमः—शरीरादिप्रह्वीभावयुक्त्या तदेव तत्त्वं समाविशामः । कीदृशाय शंकरक्षीर-सिन्धवे ?—प्रसरद्बिन्दुनादाय—प्रसरन्तौ नित्यमेव सदाशिवेश्वरादिना वेद्यपर्यन्तेन पराद्वैतप्रथानुप्रविष्टेन विश्वात्मना रूपेण प्रसरन्तौ बिन्दुनादौ—

सामरस्यात्मिके ज्ञानक्रियाशक्ती यस्य; तथाहि—प्रकाशात्मा परमेश्वरः स्वातन्त्र्यशक्त्यपरपर्यायसामरस्यावस्थितज्ञानक्रियाशक्त्यात्मकः स्फुरन्नेव स्वभित्तौ स्वात्मगोपनारूपामनाश्रितशिवदशामुल्लास्य, ज्ञानशक्तिप्रधानं सदाशिवं, क्रियाशक्तिप्रधानम् ईश्वरं तत्कारणरूपां च शुद्धविद्याम् आभास्य, संकोचाभासरूपां मायाम्, तदनु संकुचितज्ञानक्रियाशक्त्यात्मिके विद्याकले प्रदर्श्य, तत्संकोचप्रकर्षात्मबिन्दुनादशब्दवाच्यां प्राणापानभूमिं, सकलकरणावलीसमाश्रयभूताम् उट्टङ्क्य, पुनरपि ज्ञानक्रियासंकोचप्रकर्षयोगिनीमन्तःकरणभूमिम् उल्लास्य, क्रमात्क्रमं तारतम्यप्राप्तसंकोचज्ञानशक्तिमयानि बुद्धीन्द्रियाणि बोध्याभासपर्यन्तेन रूपेण प्रथितानि; तथैव प्रकृष्टसंकोचक्रियाशक्तिमयानि कर्मेन्द्रियाणि, तद्वदेव उच्चारणीयग्राह्यादि-विषयाभासपर्यन्तानि प्रथयन्, बोध्यकार्यादि-सर्वविषयान् बाह्येन्द्रियप्रकाशैकात्म्यानयनप्रमुखमन्तःकरणप्रकाशमावेश्य, विद्याकलाभूमिकास्पर्शद्वारेण सदाशिवेशपदमावेश्य, स्वस्वातन्त्र्यशक्त्यात्मनैव प्रथयन्, ईदृशावरोहारोहदोलाकेलिं कुर्वन् अनवरतमवस्थितः, नियतिकालरागतत्त्वानि विद्याकलाभ्यामेवाक्षिप्तानि, प्राणापानाभ्यां पुंस्तत्त्वमुक्तम् विद्याकलान्तःप्रविष्टेन किंचिदंशेन प्रधानमाक्षिप्तं विषयैः तन्मात्रभूतानि इति । इत्थमेष भगवान् प्रसरद्बिन्दुनादः, तत एव च ज्ञानक्रियामयत्वात् विश्वस्य, गृहीतविश्ववैचित्र्योऽपि परमेश्वरः शुद्धामृतमयात्मा परमानन्दरससार एव; अत एव अनन्तो—देशकालाकारैरपरिच्छिन्नः प्रकाशो यस्य, तेषामपि प्रकाशात्मकत्वात्, अन्यथा तु असत्त्वात्; एवं च इत्थं नरपर्यन्तेनापि रूपेण प्रसरन् परिपूर्ण एव शंकरक्षीरसिन्धुः यः स्थितः तस्मै नमः । क्षीरसमुद्रोऽपि उल्लसद्बिन्दुःकल्लोलनादयुक्तः शुद्धः—सुसितः, अमृतमयः प्रकाशमाननागराजश्च भवति, इति श्लेषोपमा । स्तोत्रकारस्य पितामहः परमेश्वराख्यः, अपराजितः पिता, श्रीदयाख्या माता, शंकराभिधानो ज्येष्ठो भ्राता अभवत्, ततः तेषामपि परमेश्वराभेदभाजाम् इयं स्तुतिः, इति आख्यायिकाविदः ॥ ३ ॥

एवं विश्वात्मिकासु नर-शक्ति-शिवभूमिषु अद्वयैकपरमार्थं परमेश्वरमभेदेन विमृश्य, ईदृशीमेव सर्वदशासु स्वात्मप्रतिपत्तिं प्रथयति आ स्तोत्रपरिसमाप्ति विचित्राभिः सूक्तिभिः—

द्विष्मस्त्वां त्वां स्तुमस्तुभ्यं मन्त्रयामोऽम्बिकापते ।
अतिवाल्लभ्यतः साधु विश्वङ्नो धृतवानसि ॥ ४ ॥

हे अम्बिकापते ! विश्वस्य पितुः, पितृत्वादेव असि—त्वं, नः—अस्मान्, विश्वक्—समन्तात् सर्वदशासु, साधु—सम्यक्, पराद्वयदृशा धृतवान्—अनुगृहीतवान्; कथम् ? अतिवाल्लभ्यतः—यतः त्वम् अस्माकमतिशयेन वल्लभः, नित्यमेव त्वदेकपरा वयं, तत एव तवापि वयम् अतिवल्लभाः । यथोक्तं गीतासु—

'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।'

इति । यतश्च इत्थं हृदयैकध्यमस्माकम् अतोऽतिवाल्लभ्यादेव वयं व्यवहारपदे लोकमध्यगता लोकस्थितिरक्षणार्थं यत् किंचित् रहस्याचारादिगजनि मीलनिकया द्विष्मः तत् त्वामेव द्विष्मः, नहि अस्माकम् अत्वन्मयं किंचिदपि भाति, इति द्वेष्यद्वेष्ट्रादिभूमावपि त्वन्मया एव स्मः, न तु अस्माकं द्वेषादि-दोषकालुष्यं जातुचित् । यद्वक्ष्यति—

'दोषोऽपि देव को दोषस्त्वामाप्तुं यः समास्थितः ।'

इति । यदपि लोकमध्यगताः तथैव वैदिकमिष्टापूर्तादि स्तुमः तदपि न त्वदतिरिक्तम् इति त्वामेव स्तुमः । यदपि यज्ञादौ इन्द्रादिदेवामन्त्रणं कुर्मः तदपि तुभ्यं—त्वदर्थमेव मन्त्रयामः—शिवमयात्मदेवतायै विश्वं जुहुमः । यच्छ्रुतिः—

'यज्ञेन यज्ञमयजन्त देवा......।'

इति । अत एवात्र व्यतिरिक्तस्य फलस्याभावात् न कर्त्रभिप्रायक्रियाफलविवक्षा इति आत्मनेपदं न कृतम् । किं च लोकोत्तरभवद्भक्तिशालिमध्यगता अपि वयं यत् वैदिकाचारादि द्विष्मः, यच्च रहस्याचारादि स्तुमः, तदपि त्वन्मयमेव मन्यामहे । एवं च लोकलोकोत्तरयोः दशयोः वयं यत् द्विष्मः तत् त्वामेव मन्यमाना वस्तुतस्तु त्वां स्तुमः, त्वदद्वयमयद्वयाभासपरामर्शनमेव हि भवत्स्तुतिः, अतश्च इत्थं तत्तद्द्वेषस्तुत्याद्यवस्थासु वस्तुतः त्वां स्तुवन्तो वयं तुभ्यं मन्त्रयामः, त्वां मन्त्रदेवतां विश्वाभेदविमर्शात्मकमहामन्त्रेण मन्त्रयामः । इत्थम् अतिवाल्लभ्यात् अस्मान् असि—त्वं साधु—सम्यक् च अनुगृहीतवान्, त्वदनुग्रहादेव ईदृशी अस्माकं महाविभूतिराविर्भूता इत्यर्थः ॥ ४ ॥

ततश्च—

संहृतस्पर्शयोगाय संपूर्णामृतसूतये ।
वियन्मायास्वरूपाय विभवे शंभवे नमः ॥ ५ ॥

शं भवति अस्मात् इति शंभुः तस्मै, विभवे–व्यापकाय। चिदात्मने नमः। कीदृशाय ? संहृतो–नाशितः स्पर्शैः–विषयैः योगः–अन्तर्नानावासनाधिष्ठानसंबन्धो येन; तत एव च वियत्–विनश्यत् अख्यात्यात्मनो मायायाः स्वरूपं यतः तस्मै; अतश्च संपूर्णं–पराद्वयप्रथात्म यत् अमृतं तस्य सूतये–अभिव्यक्तिहेतवे। एवं च पाशक्षपणपूर्णस्वरूपदानेन भगवान् स्वात्मैव महेश्वरः अनुग्राह्यान् अनुगृह्णानः स्थितः, इति आन्तरवासनाबीजप्लोषयुक्त्यैव अख्यातिप्रशमनपुरःसरं परसत्तामाविशेत् भक्तिभाक्, इति भङ्ग्या उपदिष्टं भवति। उक्तं च—

'उद्धरेदात्मनात्मानम् ………।'

इति। वियत्–आकाशम् अस्पर्शं पूर्णचन्द्रास्पदं मायावत् तुच्छस्वरूपं विभु च भवति, इति अनुरणनशक्त्या श्लेषध्वनिः, एवमुत्तरत्रापि ॥ ५ ॥

किं च—

भिन्नेष्वपि न भिन्नं यच्छिन्नेष्वच्छिन्नमेव च।
नमामः सर्वसामान्यं रूपं तत्पारमेश्वरम् ॥ ६ ॥

तत् पारमेश्वरं रूपं नमामः–एतत्स्तोत्रपरामर्शनद्वारेण अनुग्राह्य जन्तुचक्राभिन्ना वयं समाविशामः। इत्थमेव पूर्वत्रोत्तरत्र च बहुवचः योज्यम्। किं तत् ?–इत्याह भिन्नेषु–विभागेन स्फुरत्स्वपि तत्तत्तत्त्व-तद धिष्ठेयप्रमातृ-तदाश्रयभुवनभावादिषु वस्तुषु यत् न भिन्नम्–एकरूपम्, तथ तेष्वेव छिन्नेषु–प्रलयाद्यवस्थासु विनष्टेष्वपि अविनष्टम्, अतश्च सर्वसामा न्यम्–पूर्णाहन्तात्मकमहाचैतन्यरूपं सर्वसामान्यपदेन वैशेषिकाभ्युपेतपरापर सामान्यव्यतिरेकोऽस्य दर्शितः ॥ ६ ॥

तदित्थम्—

प्रणवोर्ध्वार्धमात्रातोऽप्यणवे महते पुनः।
ब्रह्माण्डादपि नैर्गुण्यगुणाय स्थाणवे नमः ॥ ७ ॥

स्थाणवे–सततावस्थितरूपाय भगवते नमः, कीदृशाय ? प्रणवस्य य ऊर्ध्वार्धमात्रा तदुपलक्षितोऽतिसुसूक्ष्मः समनारूपो मात्रा–अंशः ततोऽपि य अणुः–अनुपलभ्यमूर्तित्वात् उपलब्ध्येकरूपः इत्यर्थः तस्मै। तथा शक्तितत्त्वाव स्थितब्रह्मबिलाधिष्ठातृब्रह्मोपलक्षितं यत् अण्डं शक्त्यण्डपर्यन्तं जगत् ततोऽपि

परिच्छेद्यमूर्तेः महते––तद्व्यापकाय अपरिच्छेद्याय इत्यर्थः। तथा नैर्गुण्यं–सत्त्वादिगुणाभाव एव गुणः–चित्प्रकाशात्मा धर्मो यस्य। इत्थं च प्रणवोच्चारणक्रमेण समनान्तभूमिकातिक्रमेण उन्मनापरतत्त्वैकात्मकं व्याप्तसमनान्ताशेषविश्वं चिदे, कथनमेव सततावस्थासु भगवत्स्वरूपं समाविशामः, इति पिण्डार्थः ॥ ७ ॥

ततश्च––

ब्रह्माण्डगर्भिणीं व्योमव्यापिनः सर्वतोगतेः।
परमेश्वरहंसस्य शक्तिं हंसीमिव स्तुमः ॥ ८ ॥

'शिवो धर्मेण हंसस्तु············।'

इति स्वच्छन्दनिरूपितनीत्या विश्वसृष्टिसंहारात्मकहानसमादानधर्मा परमेश्वर एव हंसः, तस्य च तादृशीमेव शक्तिम्––उन्मनाख्यां हंसीरूपां स्तुमः–तद्विमर्शावेशपुरःशरं शक्तिमत्स्वरूपं समाविशामः। कीदृशीं? व्याख्यातरूपं ब्रह्माण्डं गर्भे–अन्तरभेदेन स्थितं यस्याः। कीदृशस्य परमेश्वरहंसस्य? व्योमव्यापिनः–महामन्त्रराजसतत्त्वस्य, व्योम च शून्यातिशून्यपदं व्याप्नुवतः, तथा सर्वतः–सर्वस्मात् गतिः–प्राप्तिः यस्य, सर्वत्र च गतिः–प्रसरद्रूपता प्रकाशश्च यस्य। हंसस्य च व्योमप्रसरणेन सर्वत्र गच्छतः अण्डगर्भिणी हंसी नित्यमनुचरी भवति इति उपमा ॥ ८ ॥

अथातिदुर्घटकारिस्वातन्त्र्यात्मकं माहेश्वरं रूपं स्तोतुमाह––

निरुपादानसंभारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ ९ ॥

स्वातन्त्र्यशक्तिभित्त्युट्टङ्कितेच्छाज्ञानक्रियारात्रयोद्भासिशूलभृते नमः, गच्छति तत्तदवस्थावैचित्र्यम् इति जगत्–अनाश्रितशिवादिक्षित्यन्तं चित्रं–नानारूपम्; अथ च तदेव चित्रं चित्रमिव तत्तदनन्तरुद्रक्षेत्रज्ञाद्याभासमयमपि भित्तिमात्रतत्त्वमेव, तथा भूतमपि च तदतिरिक्तमिव इति आश्चर्यकारि, 'चित्रम्' इति व्यस्तं समस्तं च, अभित्तौ–निषेधावभासरूपायां महाशून्यभित्तौ, तन्वते–उट्टङ्कितवते, 'अ-मा-नो-नाः प्रतिषेधे' इति स्थितत्वा अकारः प्रतिषेधवाची, अरूपा शून्यात्मा भित्तिः अभित्तिः; कथं तन्वते? निरुपादानसंभारम्, उपादानं–मायाप्रकृत्यादि, संभारः–कर्मादिः सहकारि-

ग्रामः, तेन निष्क्रान्तं कृत्वा उपादानसहकार्यादेरपि तदाभास्यत्वेन जगन्मध्य एव अनुप्रवेशात् अन्यथा शशविषाणतुल्यत्वात् तदित्थं परमेश्वरः कलया—स्वशक्तिवैदग्ध्येनैव श्लाघ्यः । आश्चर्यं च एतत्—अनुपादानादिप्रपञ्चम् अभित्तिकं चित्रम् इति, न चैतत् असंभाव्यं, संकल्पस्वप्नयोरिव निर्माणादौ संविद् एव भगवत्याः तत्तदाभासोल्लासकत्वदर्शनात् ॥ ९ ॥

एवं यथा भगवत एव अनर्गलात् स्वातन्त्र्यात् जगदुदयः, तथा अत एव संसारनिवृत्तिः उचिता इति संभावयन् मायातिरोभावकं ज्ञानं लब्धुं परमेश्वरमेव प्रार्थयते——

मायाजलोदरात्सम्यगुद्धृत्य विमलीकृतम् ।
शिवज्ञानं स्वतो दुग्धं देह्येहि हरहंस नः ॥ १० ॥

हे व्याख्यातसतत्त्व हरहंस ! एहि—संमुखीभव,—शरीरादिभूमिकातिरस्कारेण उन्मज्ज, अतश्च व्युत्थानदशायामपि 'शिव एव इदं विश्वम्' इति ईदृक् श्रेयोरूपं ज्ञानं, नः—अस्मभ्यं देहि—मनसि प्ररोहय । यच्छ्रुतिः——

'तन्मे मनः शिवसंकल्पमस्तु' ।

इति । कीदृशम् ?,—अख्यातिरूपाया मायायाः संबन्धि यत् कलाकलितत्वादिवशेन जडं—भेदप्रतीतिसारम्, उदरं—मध्यं, ततः सम्यक्—मिताहंभावगालनयुक्त्या उन्मील्य, विमलीकृतं—विगलिताख्यातिसंस्काररूपां शुद्धिमापादितम्, अत एव स्वतो दुग्धं—त्वयैव कलाश्लाघ्येन आकृष्य आनीतम् । हंसः क्षीरनीराभ्यां क्षीरमाहर्तुं विदग्ध इति अनुरणनार्थः ॥१०॥

यतश्च त्वमीदृक् शिवज्ञानं नः प्रयच्छसि अत एव——

षट्प्रमाणीपरिच्छेदभेदयोगेऽप्यभेदिने ।
परमार्थैकभावाय बलिं यामो भवाय ते ॥ ११ ॥

भवति—सर्वस्य सत्यप्रकाशात्मना रूपेण विद्यते इति भवः, तत एव परमार्थेन एकस्वरूपः, तस्मै ते बलिं यामः—उन्मीलितशिवज्ञानाय तुभ्यमेव भैरवाग्नये शरीरप्राणपुर्यष्टकादि जुहुमः । कीदृशाय ? षण्णां—प्रत्यक्षानुमानोपमानागमार्थापत्त्यभावाख्यप्रमाणानां समाहारः षट्प्रमाणी मीमांसकोक्ता, तया कृतो यः स्वस्य स्वस्य विषयस्य परिच्छेदः, स एव भेदः—प्रत्यक्षाप्रत्यक्षसादृश्य - यागफल - साध्यसाधनाभावाख्यप्रमेयव्यवस्थारूपः,

प्रमातृप्रमाणप्रमेयापेक्षारूपश्च, तद्योगेऽपि न भिद्यते तच्छीलः तस्मै। एतदुक्तं भवति—यत्किंचित् प्रमाणैः विभेदेन व्यवस्थाप्यते तत् व्यवस्थाप्यमानत्वादेव संविन्निष्ठां व्यवस्थाम् आसादयत् संविन्मयमेव, इति भेदव्यवस्थापि अभिन्नमहाप्रकाशात्मकशिवमय्येव, प्रमाणपरिच्छेदयोगश्च भगवत एव संभाव्यः ततोऽतिरिक्तस्याभावात्, तथा संभावनायामपि च उक्तदृशा अभेदित्वमेव ॥ ११ ॥

इत्थं बलिनिवेदनलब्धसमावेशो व्युत्थानेऽपि तद्रूपतामाशंसितुमाह—

अपि पश्येम गम्भीरां परेण ज्योतिषाभितः ।
उन्मृष्टतमसं रम्यामन्तर्भव भवद्गुहाम् ॥ १२ ॥

हे भव ! भवद्गुहां—त्वन्मायाशक्तिं गम्भीरां—दुरन्तां, परेण ज्योतिषा—त्वदीयेन परमाद्वयप्रकाशेन, अभितः—अन्तर्बहिश्च उन्मृष्टतमसं—प्रशमिताख्यातितिमिराम्, अत एव रम्यां—पारमार्थिकेन स्वातन्त्र्यशक्त्यात्मना रूपेण स्फुरन्तीम्, अन्तरिति पूर्णाहन्तात्मनि प्रमात्रैकात्म्ये, पश्येम—समाविशेम किम् ? ॥ १२ ॥

एवं तदाशंसावशोन्मिषद्भक्त्युद्रेक आह—

नमस्तेभ्योऽपि ये सोमकलाकलितशेखरम् ।
नाथं स्वप्नेऽपि पश्यन्ति परमानन्ददायिनम् ॥ १३ ॥

आस्तां तावत् अद्वयात्मा कतिपयजनहृदयाश्वासप्रदः पारमेश्वरः स्वभावः। आकृतिमन्तमपि इन्दुशेखरं ये दर्शनावसर एव परमानन्दप्रदं स्वप्नेऽपि पश्यन्ति, तेभ्योऽपि भवद्दर्शनपवित्रितेभ्यो नमः ॥ १३ ॥

यतश्च एतेऽपि अस्माकं भवद्भक्त्युद्रेकेण नमस्कार्याः, ततः—

भगवन्भव भावत्कं भावं भावयितुं रुचिः ।
पुनर्भवभयोच्छेददक्षा कस्मै न रोचते ॥ १४ ॥

भावत्कं भावं—चिदानन्दघनं त्वत्स्वरूपं भावयितुं—स्वत्वेन प्रत्यवम्रष्टुं, रुचिः—अभिलाषः श्रद्धा, कस्मै महाधिये न रोचते, सर्वस्यैव प्रतिभासते इत्यर्थः। कीदृशी ? पुनर्भवभयोच्छेदे—जन्मान्तरत्रासोन्मूलने दक्षा—शक्ता ॥ १४ ॥

अतश्च—

यावज्जीवं जगन्नाथ कर्तव्यमिदमस्तु नः ।
त्वत्प्रसादात्त्वदेकाग्रमनस्कत्वेन या स्थितिः ॥ १५ ॥

त्वदनुग्रहादेव एकमपि क्षणं त्वदभेदभावनाशून्यं मा भूत् इत्यर्थः । त्वदेकाग्रेति त्वमेव एकः अग्रे नित्यं स्वात्मरूपतया विमृश्यो यस्य ॥ १५ ॥

पुनरपि भक्तिप्रकर्षात् सर्वशास्त्रवाक्यैकवाक्यतां विमृशन् भगवत्स्वरूपं स्तौति—

शाखासहस्रविस्तीर्णवेदागममयात्मने ।
नमोऽनन्तफलोत्पादकल्पवृक्षाय शंभवे ॥ १६ ॥

तत्तदंशाभिनिविष्टमितहृदयानुसारेण विभिन्नशाखाशतैः विततो यः—विन्दन्ति अनेन परं तत्त्वम् इति व्युत्पत्त्या वेदरूपः आगमः—परमेश्वरप्रणीतं वाक्यैकवाक्यं, तथा एकपरवस्तुतत्त्वविश्रान्तिसारं सर्वमेव शास्त्रं तन्मय आत्मा यस्य, परमेश्वर एव हि शब्दराशिशरीरः तत्प्रपञ्चमयाशेषशास्त्रात्मना स्फुरति, अत एव अनन्तम्—अपरिच्छिन्नं स्वरूपप्रथामयं यत् फलं, तदुत्पादे—तदभिव्यक्तौ, कल्पवृक्षतुल्याय अविलम्बितमेव फलिनाय, मितहृदयविकल्पितविभिन्नशाखानुसारेण तु अनन्तस्य—नानारूपस्य फलस्य उत्पादकाय, शाखाभेदेऽपि तु 'सर्वशाखाप्रत्ययम् एकं कर्म' इति स्थित्या वाक्यैकवाक्यतापर्यालोचनया परफलविश्रान्तत्वमेव नानाशास्त्रात्मना एकस्यैव महाशास्त्रस्य । यदुक्तं सारस्वते स्तोत्रे—

'त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥'

इति ॥ १६ ॥

यत एवम्, अतः—

वाङ्मनःकायकर्माणि विनियोज्य त्वयि प्रभो ।
त्वन्मयीभूय निर्द्वन्द्वाः कच्चित्स्यामापि कर्हिचित् ॥ १७ ॥

यत्किञ्चित् वदन्तः कल्पयन्तः कुर्वाणा वा वयं त्वन्मयमेव सर्वं भावयन्तः, अत एव त्वन्मयोभावात् निर्द्वन्द्वाः—गलितभेदाः, तथा सुखदुःखादि-सर्वद्वन्द्वानभिभूता अपि—नाम, कच्चित् कदाचित् भवेम ॥ १७ ॥

फलितैव इयमस्माकमाशंसा,—यत एवंविधो भगवान्,—इत्याशयेन असामान्यतत्प्रकर्षपरामर्शात्मिकां स्तुतिमाह—

जगतां सर्गसंहारतत्तद्धितनियुक्तिषु ।
अनन्यापेक्षसामर्थ्यशालिने शूलिने नमः ॥ १८ ॥

निर्णीतपरशक्तिस्फारतत्त्वाय शूलिने, तत एव सदाशिवादिसकलान्तानां सर्वजगतां विविधजन्मप्रलययोः तत्तदभीष्टप्राप्त्यात्मिकासु च हितनियुक्तिषु भोगापवर्गसंपादनेषु, निरपेक्षनिजस्वातन्त्र्यविजृम्भितात्मने नमः—इति प्राग्वत्, एवमुत्तरत्रापि ॥ १८ ॥

कृतं वाभ्यधिकेन—

व्यतीतगुणयोगस्य मुख्यध्येयस्य धूर्जटेः ।
नामापि ध्यायतां ध्यानैः किमन्यालम्बनैः फलम् ॥ १९ ॥

धूर्जटेः—महादेवस्य, अर्थानुगमशून्यं वस्तुतः तत्त्वार्थनिष्ठं धूर्जट्यादिनामापि भूयो भूयः चिन्तितं किं किं न सूते, अतः तदेव चिन्त्यताम् । यद्वक्ष्यति—

'भवतस्त्वीश नामापि मोक्षपर्यन्तसिद्धिदम् ।'

इति । तथा—

'यन्नाम्नापि महात्मानः कीर्यन्ते पुलकाङ्कुरैः ।'

इति । एवं यन्नाममात्रचिन्तनमेवाभिलषितं पुष्णाति, तदन्यालम्बनैः—तत्तदाकारविषयैः ध्यानान्तरैः किं प्रयोजनम् । उक्तं च श्रीविज्ञानभैरवे—

'भिया सर्वं रवयति सर्वदो व्यापकोऽखिले ।
इति भैरवशब्दस्य सन्ततोच्चारणाच्छिवः ॥'

इति । शब्दस्येति शब्दमात्रे भरः, वस्तुतो हि भैरवशब्दः प्रोक्तपूर्णार्थवृत्तिः अतो यदि अर्थभावनां विनापि यः सन्ततम् उच्चारयति स

शिव एव भवति,–परमन्त्रवत् एवमादेर्भगवद्वाचकस्य वाच्यैकात्म्यात्। कीदृशस्य धूर्जटेः? व्यतीतगुणयोगस्य–निस्त्रैगुण्यमहाप्रकाशात्मतया आकृत्याद्युपाधिशून्यस्य, अत एव मुख्यध्येयस्य–ब्रह्मादिभिः सर्वकारणैः ध्येयैरपि उपास्यस्य ॥ १९ ॥

पुनरपि भक्तिभरोद्रेकोल्लसितहृदय आह––

नमो नमः शिवायेति मन्त्रसामर्थ्यमाश्रिताः ।
श्लाघ्यास्ते शाम्भवीं भूतिमुपभोक्तुं य उद्यताः ॥ २० ॥

शिवाय–चिदानन्दैकघनश्रेयोरूपाय, नमो नमः–इति अविच्छेदेनैव पुनः पुनः शरीरप्राणपुर्यष्टकशून्यात्मकं तद्द्वारेण च विश्वं जुहुमः, इत्येवम् अर्थसतत्त्वे तन्मन्त्रमाहात्म्यं ये आस्थिताः–अनुप्रविष्टाः, ते शाम्भवीं विभूतिं महानन्दमयीम् उपभोक्तुं–स्वात्माभेदेन चमत्कर्तुम् उद्यताः श्लाघ्याः ॥ २० ॥

वयं च तादृशा इति स्वात्मन्येव अमानाह, अथवा निर्भरभक्तिभाजामस्माकम्––

कः पन्था येन न प्राप्यः का च वाङ्नोच्यसे यया ।
किं ध्यानं येन न ध्येयः किं वा किं नासि यत्प्रभो ॥ २१ ॥

किं वा अनेन 'नमो नमः शिवाय' इत्यादिमन्त्रपरामर्शेन, यतो यत् अमितत्वन्महाप्रकाशरूपं न भवति तत् किं, न किञ्चिदेव। तेन कः तादृशः पन्थाः–कायीयः क्रियाक्रमोऽस्ति, येन त्वं न प्राप्यो भवसि। वागपि सर्वा त्वद्विषयैव। सर्वं मनःसंकल्पात्मकं ध्यानमपि त्वदालम्बनमेव। अतश्च अप्रयासं सर्वदैव त्वन्मया जाताः स्मः ॥ २१ ॥

अत एव सर्वदशासु––

अर्चितोऽयमयं ध्यात एष तोषित इत्ययम् ।
रसः स्रोतःसहस्रेण त्वयि मे भव वर्धताम् ॥ २२ ॥

शरीरमनोवाग्व्यापारैः सर्वैरेव मामकैः यतो भगवत्येव विश्रम्यते, तेन अयम् इति एष इति च सर्वदशासु प्रस्फुरन् चित्परमार्थो भगवान् यथा-

क्रमम् अर्चितो ध्यातः परितोषितश्च इत्ययं रसः—अभिनिवेशः, त्वद्विषये मम यः स्थितः स शतशाखः प्रवर्धताम् ॥ २२ ॥

अतश्च—

नमो निःशेषधीपत्रिमालालयमयात्मने ।
नाथाय स्थाणवे तुभ्यं नागयज्ञोपवीतिने ॥ २३ ॥

तुभ्यं स्थाणवे—अविनाश्यमानैकरूपाय, नमः । कीदृशाय ?—नागो वासुकिः यज्ञोपवीतं यस्य तस्मै, इत्थम् आकृतिमत्त्वेऽपि—

चित्रं यच्चित्रदृष्टोऽसि मनोरथगतोऽपि वा ।
परमार्थफलं नाथ परिपूर्णं प्रयच्छसि ॥'

इति स्थित्या पूर्ण एव भगवान् इत्याह—निःशेषाणां—शिवादि-कीटान्तानां, निःशेषाश्च या धियः संविदः, ता एव चाञ्चल्यात् पत्रिमालाः पक्षिपङ्क्तयः, तासां यो लयः—पूर्णाहन्तात्मनि विश्रान्तिः, तन्मय आत्मा यस्य तस्मै, स्थाणुश्च जरद्वृक्षकल्पः पक्षिवर्गालययुक्तो भवति ॥ २३ ॥

एतन्नमस्कृतिसमुचितां प्रार्थनामाह—

अज्ञानतिमिरस्यैकमौषधं संस्मृतिस्तव ।
भव तत्तत्प्रदानेन प्रसादः क्रियतां मयि ॥ २४ ॥

अज्ञानं—शिवैक्याख्यातिरेव, तिमिरं—परप्रतिभाचक्षुरावारकत्वेन द्वैतप्रदर्शको दोषः, तस्य चिद्घनस्वरूपविमर्शात्मा त्वत्स्मृतिरेव एकम् औषधं—प्रशमोपायः, तस्मात् तत्प्रदानेन—तदेकाग्रमयत्वापादनेन, प्रसादः क्रियताम्—अख्यातिकालुष्यप्रशमनेन नैर्मल्यम् आश्रीयताम् ॥ २४ ॥

पुनरपि भक्तिभराविष्ट एतत्प्रसादसंभावनोचितां स्तुतिमाह—

नम ईशाय निःशेषपुरुषार्थप्रसाधकः ।
प्रणन्तव्यः प्रणामोऽपि यदीय इह धीमताम् ॥ २५ ॥

धीमतां—तत्त्वविदां, यदीयः—प्राग्व्याकृतसमावेशात्मा प्रणामोऽपि, निःशेषस्य भोगापवर्गात्मनः पुरुषार्थस्य संपादकत्वात् तथा अलङ्कारकत्वात् प्रणन्तव्यः—प्रह्वतया समाश्रयणीयः, भूयोभूयः तस्मै ईशाय—एवंविधालौकिक-स्वातन्त्र्याय नमः ॥ २५ ॥

युक्तं च एतत्—

मग्नैर्भीमे भवाम्भोधौ निलये दुःखयादसाम् ।
भक्तिचिन्तामणिं शार्वं ततः प्राप्य न किं जितम् ।। २६ ।।

दुरुत्तरक्लेशमये संसाराब्धौ, दुःखानि—आधिभौतिकाद्युपतापा एव यादांसि—मकरादयः, तेषाम् आस्पदे मग्नैः—निरवशेषं ब्रुडितैः, तत एव तन्मध्यादेव, शार्वं—शर्वस्य विश्वशरणवरणस्य सम्बन्धिनं भक्तिचिन्तामणिं तदिच्छयैव लब्ध्वा—अकस्मादेव प्राप्य, किं यत् क्लेशादि न जितं—न अभिभूतम् । किं यच्च भोगापवर्गादि न जितं—न प्राप्तं, सर्वम् अभीष्टं झगिति लब्धमेव इत्यर्थः । तथा च नन्दिमहाकालादीनां तत्तदभीष्टावाप्तिः आगमेषु श्रूयते ॥ २६ ॥

भक्तिरेव च भगवत्तत्त्वपरिज्ञाने हेतुः, न अन्यत् इत्याह—

निरावरणनिर्द्वन्द्वनिश्चलज्ञानसंपदाम् ।
ज्ञेयोऽसि किल केऽप्येते ये त्वां जानन्ति धूर्जटे ।। २७ ।।

किल इति आगमे—एवं किल आम्नायेषु उच्यते, आवरणात्—अख्यात्यात्मनो निष्क्रान्ता निर्द्वन्द्वा—परमाद्वैतरूपा, निश्चला च अकम्पा ज्ञानसम्पत् येषां तेषामेव, धूर्जटे ! ज्ञेयो भवसि—स्वप्रकाशतया स्फुरसि, अतः केऽपि एते—लोकोत्तरा एव एते महात्मानः, ये त्वां पश्यन्ति—स्वाभेदेन स्फुरन्तं प्रत्यभिजानन्ति ॥ २७ ॥

ततश्च—

निर्गुणोऽपि गुणज्ञानां ज्ञेय एको जयत्यजः ।
निष्कामोऽपि प्रकृत्या यः कामनानां परं फलम् ।। २८ ।।

प्रोक्तज्ञानात्मकगुणावभासिनाम्, एकः—अद्वितीयः, अजः—अनादिः, निर्गुणोऽपि—सत्त्वादिगुणास्पृष्टमूर्तिरपि, ज्ञेयो—ज्ञातुं शक्यः स्वाभेदेन स्फुरति । तथा परिपूर्णानन्दनिर्भरत्वात् कामेभ्यः—कामनाभ्यो निष्क्रान्तोऽपि, प्रकृत्या—वस्तुसौन्दर्येण, सर्वासां कामनानां, परं—पूर्णं फलं । सर्वा हि कामनाः तत्तद्भोगात्मकफलयोगिन्योऽपि भोक्तृचमत्कारप्रमुखं पार्यन्तिकपरमानन्दाब्धौ पर्यवस्यन्ति । तदुक्तमस्मत्प्रभुपादैः—

'फलं क्रियाणामथ वा विधीनां
पर्यन्ततस्त्वन्मयतैव देव ।
फलेप्सवो ये पुनरत्र तेषां
मूढा स्थितिः स्यादनवस्थयैव ॥'

इति । अपिशब्दौ विरोधं व्यङ्क्तः ॥ २८ ॥

अयमपि भगवत एव असामान्यः प्रकर्ष इत्याह—

श्रीरत्नामृतलाभाय क्लिष्टं यत्र न कैः सुरैः ।
तत्क्षीरोददमैश्वर्यं तवैव सहजं विभो ॥ २९ ॥

यत्र—क्षीरोदे, लक्ष्म्याः कौस्तुभपारिजातादीनां रत्नानाम् अमृतस्य च लाभाय, उपेन्द्रादिभिः कैः सुरैः न क्लिष्टं—सर्वैरेव कदर्थना अनुभूता । तस्य तादृशस्य आश्चर्यनिधेः क्षीरोदस्य प्रदायकमैश्वर्यं, हे विभो ! तवैव सहजम्, अन्यस्य तु आराधनासहस्रैरपि न उपार्जनीयं भवति, भवतैव उपमन्युमुनये क्षीरोदस्य वितरणात् ॥ २९ ॥

अतश्च—

नमो भक्त्या नृणां मुक्त्यै भवते भव तेऽवते ।
स्मृत्या नुत्या च ददते शंभवे शं भवेऽभवे ॥ ३० ॥

हे भव ! ते—तुभ्यं, शंभवे नमः । कीदृशाय ? भक्त्या उपलक्षितानां नृणां मुक्त्यै भवते—निजप्रथैकात्म्यमुक्तिरूपतया स्फुरते । तथा स्मृत्या उपलक्षितानाम् अवते—सर्वभयेभ्यो रक्षां कुर्वते । तथा नुत्या—स्तुत्या हेतुना उपमन्युमरुत्तप्रभृतिभ्य इव भवे संसारे शं भोगसंपद्रूपं श्रेयः, अभवे—अभवनिमित्तं ददते, मोक्षपर्यवसितं भोगं प्रयच्छते इत्यर्थः ॥ ३० ॥

न केवलं मुमुक्षूणाम् आर्तानां बुभुक्षूणां च त्वया अभीष्टं संपाद्यते यावत् जीवन्मुक्तिकामानामपि इत्याह—

सर्वज्ञः सर्वकृत्सर्वमसीति ज्ञानशालिनाम् ।
वेद्यं किं कर्म वा नाथ नानन्त्याय त्वयार्प्यते ॥ ३१ ॥

सर्वज्ञः सर्वकर्तृस्वभावः त्वमेव चिदात्म सर्वमसि,—इति ईदृशेन ज्ञानेन ये शालन्ते तेषां यत् वेद्यं—ज्ञेयं, कर्म—कार्यं क्रियारूपं वा, किं

तादृगस्ति ? यत् त्वया आनन्त्याय न अर्प्यते, सर्वमेव एषां वैश्वात्म्येन दर्श्यते इत्यर्थः । एवं च सर्वत्र सर्वात्मकमाहेश्वर्यप्रथा जीवन्मुक्तिः ॥ ३१ ॥

अलं वा पारमेश्वरप्रसादानाम् इयत्तया, यतः—

इच्छाया एव यस्येयत् फलं लोकत्रयात्मकम् ।
तस्य ते नाथ कार्याणां को वेत्ति कियती गतिः ॥ ३२ ॥

इच्छामात्रेण यो भवाभवातिभवात्मकं लोकत्रितयं विधत्ते, तस्य कार्याणां—प्रयत्ननिर्वर्त्यानां वस्तूनां, कियती—किं-परिच्छेदा, गतिः—प्रसृतिः, इति एतत् को वेत्ति, न कश्चित् । अतर्क्यमेव एतत्,—इत्यतिशयोक्तिपरमेतत्, न भगवतो यत्ननिर्वर्त्यत्वं किञ्चित् । 'पश्य मृगो धावति' इतिवत् वाक्यार्थस्य अत्र कर्मता ॥ ३२ ॥

न केवलं त्वदीयः कार्यस्फारो ज्ञातुमशक्यः, यावत् तव ऐश्वर्यात्मकज्ञानमहिमापि इत्याह—

ब्रह्मादयोऽपि तद्यस्य कर्मसोपानमालया ।
उपर्युपरि धावन्ति लब्धुं धाम नमामि तम् ॥ ३३ ॥

ब्रह्मविष्णुरुद्रादयोऽपि यस्य तत् अचिन्त्यं धाम—पदं लब्धुं, कर्मसोपानमालया—तत्तदनुध्यानाद्यनुष्ठानपरम्पराभिः, उपर्युपरि—इति उत्तरोत्तरप्रयत्नाधिक्येन अधिकप्रकर्षवाञ्छया धावन्ति, न कामपि विश्रान्ति भजन्ते । नहि सर्वसामान्ये पारमेश्वरे पदे कश्चित् प्रकर्षापकर्षयोगः-इति उत्तरोत्तरप्रकर्षाभिलाषुकैः कथं तत् प्राप्यते—इति ज्ञानमाहात्म्यमपि माहेश्वरमपरिच्छेद्यमेव ॥ ३३ ॥

किं च तच्छक्तेरेव इमा भङ्ग्यो,—यदेते ब्रह्मादय इत्याह—

अयं ब्रह्मा महेन्द्रोऽयं सूर्याचन्द्रमसाविमौ ।
इति शक्तिलता यस्य पुष्पिता पात्वसौ भवः ॥ ३४ ॥

अयं ब्रह्मा,—इति विष्णुरुद्रेशसदाशिवशिवान् उपलक्षयति, तेन तत्तत्सृष्टिस्थित्यादिमितकार्यकारिणो ये ब्रह्मादयः, यश्च महेन्द्रः सुराधिपत्ये स्थितः, यौ च जगतः प्रकाशाप्यायनादिव्यापारकारित्वेन स्थितौ

सूर्याचन्द्रमसौ, इति—एवंप्रकारम् अन्यदपि यत्किंचित् महाविभूतियुक्तं, तत्सर्वं यस्य शक्तिः—सामर्थ्यरूपा लता इव, पुष्पिता—संजातपुष्पमात्रतया स्फुरिता न तु फलिता, सर्वस्य पुष्पफलस्य परमेश्वराभेदप्राप्तिरेव लोकोत्तरचमत्कारमयी फलम् । यथोक्तं श्रीपूर्वशास्त्रे समावेशचर्चायाम्—

'संवित्तिफलभेदोऽत्र न प्रकल्प्यो मनीषिभिः ।'

इति । यस्य च एवं शक्तिलता पुष्पिता, स पूर्वव्याख्यातसतत्त्वो भवः पातु,—अस्मात् मितब्रह्माद्युपासासंकल्पसंपर्कात् रक्षतु । स्तुतं च मया—

'सर्वज्ञाः सर्वकर्तारो ब्रह्माद्या भुवनेश्वराः ।
यत्रैते बुद्बुदायन्ते बोधाब्धि तं शिवं स्तुमः ॥'

इति ॥ ३४ ॥

तदित्थं महाव्यापकस्य—

भ्रमो न लभ्यते यस्य भ्रान्तान्तःकरणैरपि ।
दूरगैरपि यस्यान्तो दुर्गमस्तं स्तुमो मृडम् ॥ ३५ ॥

तं मृडं—परमानन्दमयं महेश्वरं, स्तुमः—समाविशामः । कीदृशं ?—यस्य भ्रान्तान्तःकरणैः—चिरकालं परममहत्त्वभावनायोगप्रकर्षेण अन्विष्यद्भिरपि, भ्रमो—वैपुल्याभोगो न लभ्यते । तथा दूरगैरपि—अतिविप्रकृष्टम् अध्वानं भावनाक्रमेण गच्छद्भिरपि यस्य अन्तः—दैर्घ्यपरिसमाप्तिः, कालकृता पूर्वापरकोटिश्च न लभ्यते—निराकृतित्वेन देशकालायोगात्, अत एव आकृतिमत्त्वेन भगवदन्वेषणपरा भ्रान्तान्तःकरणा उक्ताः । किं च प्रलयावसरे जलमध्ये स्वेच्छावभासितज्वालारूपाकृतिमतोऽपि यस्य ब्रह्मविष्णुप्रभृतिभिः तात्त्विकतदीयमाहात्म्यापर्यालोचनया भ्रान्तचित्तैः अन्विष्यद्भिः परिच्छेदो न लब्धः,—इति पौराणिकोऽप्यर्थः अनेन स्पृष्टः । अपि च यस्य संबन्धी भ्रमोऽपि महामायात्मा न लभ्यते—न परिच्छिद्यते । सर्व एव हि ब्रह्मविष्णुरुद्राद्या मायाविमोहिताः, तत एव भ्रान्तान्तःकरणैरित्युक्तम् । यत्र एतदीयमायाशक्तिरपि न लभ्यते—न परिच्छिद्यते, तत्र स कथं परिच्छेद्यः स्यात् इति । दूरगैरपि—षडध्वधाराधिरूढैरपि अनाश्रितादिभिः, यस्य अन्तः—परिच्छेदो दुर्गमो न लभ्यत एव ॥ ३५ ॥

यस्तु भक्तिशाली स सर्वावस्थासु भगवदभेदावष्टम्भमय एव इत्याशयेन आह—

नमः स्तुतौ स्मृतौ ध्याने दर्शने स्पर्शने तथा ।
प्राप्तौ चानन्दवृन्दाय दयिताय कपर्दिने ॥ ३६ ॥

कपर्दिने–महादेवाय, दयिताय–परमवल्लभाय नमः, कीदृशाय? स्तुतौ–नामग्रहणे, स्मृतौ तदर्थभावने, ध्याने–तदेकताततात्मनि चिन्तने, दर्शने–तदनन्तरभाविनि साक्षात्कारे, स्पर्शने–तद्विश्रान्तौ, प्राप्तौ–तदैकात्म्यलाभे; यद्वा सर्वस्य भगवन्मयत्वात् सर्वदा सर्वेन्द्रियवृत्तिषु स्वरूपविश्रान्त्यात्मिकायां प्राप्तौ च आनन्दवृन्दाय–पराह्लादस्फाररूपाय। लौकिकोऽपि दयितः स्तुत्यादिषु प्राप्तिपर्यन्तेषु क्रमेण अधिकाधिकं सुखयति, परमेश्वरस्तु सर्वत्र अन्यूनाधिकपरिपूर्णानन्दमय एव–इति अर्थशक्तिमूलो व्यतिरेकध्वनिः ॥ ३६ ॥

यतश्च सर्वदशासु आनन्दवृन्दात्मकमहेश्वरमयतैव स्फुरति, ततः––

किं स्मयेनेति मत्वापि मनसा परमेश्वर ।
स्मयेन त्वन्मयोऽस्मीति मामि नात्मनि किं मुदा ॥ ३७ ॥

तत्तत्सृष्ट्यादिकारिब्रह्मादिपदेऽपि विनाशिनि, यः स्मयो–गर्वः, तेन किं 'न किंचित्' इति मनसा मत्वापि–निश्चित्यापि, हे परमेश्वर,–विश्वातिशायिन्, इति त्वत्स्वरूपप्रत्यभिज्ञावशोन्मिषितेन 'त्वन्मयोऽस्मि' स्मयेन–महाभिमानात्मना, या मुत्–हर्षः, तया, किम् अहमस्मिन्नेव आत्मनि मामि न–अपि तु मामि,–परिपूर्णतया स्फुरामि एव इत्यर्थ। यद्वा सर्वाभिमानान् जहदपि अहं 'त्वन्मयोऽस्मि' इति स्मयेन जनितया मुदा कथमिव ईदृक् कृतो, यत् आत्मन्येव न मामि–न वर्ते ॥ ३७ ॥

एवंविधाभिमानेनापि त्वय्येव विश्राम्यामि इत्याह––

चिन्तयित्वापि कर्तव्यकोटीश्चित्तस्य चापलात् ।
विश्राम्यन्भव भावत्कचित्तानन्दे रमे भृशम् ॥ ३८ ॥

स्वाभाविकात् चित्तचाञ्चल्यात्––

'इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
यक्ष्ये दास्यामि मोदिष्ये……………… ॥'

इत्यादिका निर्विरामप्रवृत्ताः कर्तव्यपरम्पराः चिन्तयित्वा–संकल्प्यापि,–

'अत एव यथाभीष्टसमुल्लेखावभासनात् ।
ज्ञानक्रिये स्फुटे एव सिद्धे सर्वस्य जीवतः ॥'

इति प्रत्यभिज्ञानिर्णीतवस्तुतत्त्वपरामर्शदिशा, हे भव, भावत्कचित्तानन्दे—त्वच्चैतन्यमेव परिपूर्ण आनन्दः, तत्र विश्राम्यन्, अहं भृशं रमे, बाह्यपर्यन्तमपि विश्वं त्वदानन्दरसप्लुतमेव अनुभवन् स्थितः। यथोक्तं प्रत्यभिज्ञायाम्—

'सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥'

इति । प्रथमश्लोके त्रिकल्पात्मकचित्तप्रशमनक्रमेणैव परतत्त्वप्रवेशोपायो य उक्तः, ततोऽयं सातिशय उपायो—व्युत्थानमपि समाधिरसप्लुतमेव करोति इति भृशं रमे—इति उक्तेराशयः। केवलं तदुपायक्रमेण अयमुपायः प्ररोहमासादयति—इति तथैव इह स्तोत्रकारेण क्रमेणोक्तः। चितो भावः चित्ता, चिन्ता इति अपपाठः ॥ ३८ ॥

न च इत्थं विमृश्यमानोऽपि प्रमेयभावमेति इत्याह—

सूक्ष्मोऽसि चेत्त्रिलोकीयं कलामात्रं कथं तव ।
स्थूलोऽथ किं सुदर्शो न ब्रह्मादिभिरपि प्रभो ॥ ३९ ॥

यत् पूर्वं—

'प्रणवोर्ध्वार्धमात्रात………………… ।'

इति श्लोकेन उक्तं, तत्र इदं तत्त्वं—यत् परमेश्वरः परप्रमात्रेकरूपो न कदाचित् प्रमेयतामेति, अन्यथा अत्यन्ताणुरूपस्य कथमियं भवाभवातिभवरूपा त्रिलोकी अस्य कलामात्रं—परिमितांशरूपा स्यात्, स्थूलत्वे तु ब्रह्मादिशिवान्तैः न दुर्लक्ष्यः स्यात् ऐन्द्रियकप्रत्यक्षेणैव तं विषयीकुर्युः, न तु तदन्वेषणकान्दिशीकाः स्युः, यतः सर्वथैव अपरिच्छेद्यः सर्वसर्वात्मकचिदेकमूर्तिः परमेशः ततः सर्वशास्त्राणि तत्रैव परिनिष्ठितानि—इति तद्विचारपरा वयं युक्तकारिण एव ॥ ३९ ॥

अन्यथा—

वाच्य एषां त्वमेवेति नाभविष्यदिदं यदि ।
कः क्लेशं देव वाग्जालेष्वकरिष्यत्सुधीस्तदा ॥ ४० ॥

वाग्जालानि—निगूहिततात्त्विकत्वत्स्वरूपतामिव दर्शयन्तः शास्त्र-कल्लोलाः, वस्तुतस्तु शब्दराशिशरीरमयत्वात् तात्त्विकत्वत्स्वरूपविश्रान्तान्येव, अतो यदि एतत् नाभविष्यत्—न प्रत्यभिज्ञास्यत, तत् क इव सुधीः—प्रामाणिकः, एतद्विचारे क्लेशैकफले प्रावर्त्स्यत ॥ ४० ॥

यद्यपि वस्तुतो विश्वमयस्त्वं, तथापि एतत्स्वरूपसाक्षात्कारयित्रा उपदेशेन मम प्रसादः क्रियतां—नैर्मल्यमास्थीयतां, यतः त्वत्प्रसादं विना न केनापि ध्यानधारणादिक्रियाक्रमेण तीक्ष्णविचाररूपया कयाचिदपि वा बुद्ध्या त्वं साक्षात्कार्यः, प्रत्युत सर्वक्रियाबुद्धिप्रत्यस्तमय एव 'त्वत्स्वरूपं भाति'—इति तत्प्रत्यस्तमयोऽयमुक्तपूर्वः प्रसादः क्रियतामित्येतदाह—

क्रमेण कर्मणा केन कया वा प्रज्ञया प्रभो ।
दृश्योऽसीत्युपदेशेन प्रसादः क्रियतां मम ॥ ४१ ॥

स्पष्टम् ॥ ४१ ॥

एवं प्रार्थनानन्तरमपि लब्धतत्साक्षात्कारो व्युत्थानेऽपि तत्संस्काराक्षिते तत्स्वरूपं स्तोतुमाह—

नमो निरुपकार्याय त्रैलोक्यैकोपकारिणे ।
सर्वस्य स्पृहणीयाय निःस्पृहाय कपर्दिने ॥ ४२ ॥

व्यतिरिक्तस्य उपकर्तुः उपकारस्य वा अभावात् निरुपकार्याय, अनुपकार्याय अत एव स्पृहणीयाभावात् निःस्पृहाय, कपर्दिने—जटिने, एतच्चाभिधानं निःस्पृहत्वौचित्येन उपात्तम् । एवम् अनुपकार्याय अस्पृहायापि च सर्वस्य अभीष्टसंपादनेन त्रैलोक्यैकोपकारिणे, अत एव च स्पृहणीयाय—निष्कारणमेव स्वस्वरूपनिर्मलीभावापादनेन अस्मदनुग्रहीत्रे तुभ्यमेव, शरीरादि जुहुमः—इति अनेन लोकोत्तरोत्कर्षवत्त्वं भगवत उक्तम् ॥ ४२ ॥

इत्थं भक्तिसंपूर्णमात्मानं सामान्योक्त्या श्लाघमान आह—

अहो क्षेत्रज्ञता सेयं कार्याय महते सताम् ।
ययानन्तफलां भक्तिं वपन्ति त्वय्यमी प्रभो ॥ ४३ ॥

हे स्वामिन्, सताम्—अनुगृहीतानाम्, अहो—आश्चर्यं, क्षेत्रज्ञता—पुरुषता । अथ च क्षेत्रज्ञता—सर्वक्लेशसंसरणत्राणहेतुभूतं त्वां क्षेत्रं प्रति ज्ञता—बोद्धृता सा इयम् इति स्वात्मनि उपलब्धप्रभावा, महते—त्वदभेदाय,

कार्याय—प्रयोजनाय, यया क्षेत्रज्ञतया हेतुना, अमी सन्तो भक्ति—सेवां, व्यतिरिक्तफलवाञ्छात्यागेन त्वयि क्षेत्रे वपन्ति—बीजवत् रोहयन्ति। कीदृशीं भक्तिम् ?—अनन्तम्—अपरिच्छिन्नं त्वत्क्षेत्रवापादेव त्वदैक्यावाप्ति-रूपं फलं यस्यां ताम् ॥ ४३ ॥

एवम् ईदृश्यां त्वत्स्वरूपनिधानप्रापिण्यां भक्तौ न प्ररोहयन्ति ये, ते त्वन्माययैव व्यामोहिता इत्याह—

महतीयमहो माया तव मायिन्यथावृतः ।
त्वद्ध्यानर्निधिलाभेऽपि मुग्धो लोकः श्लथायते ॥ ४४ ॥

महती—दुरतिक्रमा, माया—अख्यातिः, मायिन्, स्वरूपगोपनपर, यया स्वरूपगोपनसतत्त्वया आवृत आच्छादिततत्त्वदृष्टिर्मुग्धः—तत्त्वाविवेकी जनः श्लथायते—त्वद्भक्तौ प्राप्तायामपि न तन्मयीभवति ॥ ४४ ॥

तदित्थं सर्वत्र त्वमेव कर्ता इत्याह—

आरम्भे भव सर्वत्र कर्म वा करणादि वा ।
विश्वमस्तु स्वतन्त्रस्तु कर्ता तत्रैकको भवान् ॥ ४५ ॥

हे भव, सर्वत्र—शिवादिकीटान्तप्रमातृसंबन्धिनि आरम्भे—व्यापारे, यत्किञ्चित् कर्तृकरणादिरूपमिव आभाति, तत्सर्वं कर्म वा तवैव स्वतन्त्रस्य कर्तुः अवभासनात्मना क्रियया तथा आभासितत्वेन कार्यं भवतु। यदि वा त्वयैव मितक्रियासाधकतमत्वादिना अवभासितत्वात् करणादि तदस्तु, सर्वत्र पुनरत्र नानाकारकवैचित्र्यात्मना स्फुरत्यपि त्वमेव एकः—अन्यानपेक्षः स्वतन्त्रः कर्ता; अन्यस्तु त्वदाभास्यत्वादेव अस्वतन्त्रः—इति कथं कर्ता स्यात्। यत्तु ब्रह्मादीनां सृष्ट्यादौ कर्तृत्वं, तत् तेषा त्वदुत्थापित-तत्तदभिमानमात्रतत्त्वम्। यदुक्तं श्रीविद्याधिपतिना—

'उत्तरोत्तरमवग्रहैः पदं पश्यतोऽप्यधरमुत्तरस्य यः ।
साधनस्य निजभावनाग्रहो हेतुरत्र भवतो मरीचयः ॥'

इति ॥ ४५ ॥

यत एवम्—अतः,—

त्रिगुणत्रिपरिस्पन्दद्वन्द्वग्रस्तं जगत्त्रयम् ।
उद्धर्तुं भवतोऽन्यस्य कस्य शक्तिः कृपाथ वा ॥ ४६ ॥

त्रयाणां सत्त्वादिगुणानां यः प्रकाशप्रवृत्तिस्थित्यात्मा त्रिवि परिस्पन्दः, तद्रूपाणि यानि देहप्राणपुर्यष्टकगतानि शीतोष्णक्षुत्तृष्णासु दुःखरागद्वेषजननमरणानि द्वन्द्वानि, तैः ग्रस्तम्–आत्मसात्कृतं जगत्त्र जागरस्वप्नसुषुप्providedाविष्टं जन्तुचक्रं, तदुद्धर्तुं–तुर्यतुर्यातीतपदम् अवल यितुं, तवैव आचार्यस्य मन्त्रमन्त्रेश्वरादिभूमिषु माहात्म्यव्यञ्ज शक्तिः–सामर्थ्यं कृपापि वा–अनुजिघृक्षात्मा, नान्यस्य कस्यापि कदा तदुक्तम्––

'आचार्यदेहमास्थाय शिवः पाशान्निकृन्तति ।'

इति ।

'.........................शतमष्टादशोत्तरम् ।
अनुगृह्यः शिवः साक्षान्मन्त्रेशत्वे नियुक्तवान् ॥'

इति ॥ ४६ ॥

एवं त्वदैक्यभावनाभावाभावावेव गुणदोषौ इत्याह––

दोषोऽपि देव को दोषस्त्वामाप्तुं यः समास्थितः ।
गुणोऽपि च गुणः को नु त्वां नाप्तुं यः समास्थितः ॥ ४७ ॥

हे देव, विश्वक्रीडादिपर, विषयतृष्णावानपि यः त्वदैकध्यविम मयः स गुणवानेव; यस्तु पाण्डित्यवैराग्यादिगुणयुक्तोऽपि न त्वद्विमर्शस स दोषी शोच्यप्रज्ञ एव, समास्थितः–सम्यक् अभेदापत्त्या आ समन्त स्थितः–अभिनिविष्टः ॥ ४७ ॥

अतश्च––

रागोऽप्यस्तु जगन्नाथ मम त्वय्येव यः स्थितः ।
लोभायापि नमस्तस्मै त्वल्लाभालम्बनाय मे ॥ ४७ ॥

त्वय्येव, न तु त्वयि च फले च । नम इत्यनेन भगवद्भक्त्युद्रेक द्रढयति । रागः–स्पृहा, लोभः–सर्वस्ववत् परिरक्षणं, त्वल्लाभो–भवत्स वेशः, आलम्बनं–विषयो यस्य ॥ ४७ ॥

ईदृग्रागलोभात्मा त्वद्भावना विश्वमुद्धरति इत्याह––

अहो महदिदं कर्म देव त्वद्भावनात्मकम् ।
आब्रह्मक्रिमि यस्मिन्नो मुक्तयेऽधिक्रियेत कः ॥ ४८ ॥

वैदिकज्योतिष्टोमादिभावनात्मके कर्मणि स्वर्गप्रदे द्विज एव अधिकृतः, त्वद्भावनात्मके कर्मणि तु आ प्रजापतेः क्रिम्यन्तं त्वदिच्छयैव मुक्त्यर्थं विश्वम् अधिकारि कृतम्, इति अर्थशक्त्या व्यतिरेकध्वनिना अप्रतिहतं स्वातन्त्र्यं भगवता व्यञ्जयता अद्भुतरसो ध्वन्यते ॥ ४८ ॥

किं च—

आरम्भः सर्वकार्याणां पर्यन्तः सर्वकर्मणाम् ।
तदन्तर्वृत्तयश्चित्रास्तवैवेश धियः पथि ॥ ४९ ॥

हे ईश—स्वतन्त्र, त्वत्संविदेव सर्वेषां भोगापवर्गादिकार्याणां तद्व्यापाराणां च प्रारम्भसमाप्तिमध्यानि वेत्ति ॥ ४९ ॥

यद्यपि त्वत्संवित् विश्वमाभासयति, तथापि तदाभासिनाया भक्तेः कोऽपि महिमा अस्ति इत्याह—

यावदुत्तरमास्वादसहस्रगुणविस्तरः ।
त्वद्भक्तिरसपीयूषान्नाथ नान्यत्र दृश्यते ॥ ५० ॥

यद्यत् उत्तरं यावदुत्तरं, हे नाथ—प्रार्थनीयस्वरूप, समावेशात्मा यः त्वद्भक्तिरसः, स एव परमानन्दमयत्वात् पीयूषं, ततोऽन्यत्र न क्वापि यावदुत्तरं क्रमात्क्रमम् आस्वादानां—चमत्काराणाम् आनन्दसन्दोहानां, सहस्रगुणो—निःसंख्यो, विस्तरो—विस्तारो दृश्यते, त्वद्भक्तिरेव उत्तरोत्तरं प्रकृष्टाः परमानन्दसम्पदो वितरति । आस्वाद्य इत्यपपाठः । विस्तर इति अशब्दविषयः शब्दः चिन्त्यः, 'प्रथने वावशब्दे' इति अशब्दविषये नियमितत्वात् ॥ ५० ॥

यत एवं, तेन—

उपसंहृतकामाय कामायतिमतन्वते ।
अवतंसितसोमाय सोमाय स्वामिने नमः ॥ ५१ ॥

सह उमया देव्या—स्वातन्त्र्यशक्त्या वर्तते यः स्वामी—चिदात्मा महेश्वरः, परशक्तिरूपनिजोत्तमाङ्गसंगमितसमस्तमेयचन्द्रः अत एव व्यतिरिक्तार्थनीयार्थाभावात् उप—समीपे आत्मन्येव संहृतकामः—स्वानन्दचमत्कारनित्यतृप्तः, अत एव परिपूर्णत्वात् सर्वाम् आयतिं—मूर्तिक्रियावैचित्र्य-

विस्तृतिं तन्वन्–नित्यं स्वात्मनि प्रथयन् यः, तस्मै नमः, इति आन्तरेण क्रमेणार्थः ।

बाह्येन तु दग्धमन्मथाय, आयतिम् आगामिनं शुभं कालं, कैलासादिषु नित्यप्रवर्तमानप्रमोदनिर्भरक्रीडामयं लोकोत्तरप्रभावं विस्तारयित्रे, उमादेहार्धधारिणे, धृतचन्द्रकलाभरणाय नम इत्यर्थः । मन्मथदाहिनोऽपि च आलम्बनोद्दीपन विभावसंपूर्णासामान्यशृङ्गारनिविष्टत्वम् इति आकृतिगत्वेऽपि अतिदुर्घटमैश्वर्यमुक्तम् ।

अथ च उपसंहृताः–भक्तिमतः परिपूर्णस्वरूपप्रथनेन प्रशमिताः, सर्वे कामा–अभिलाषाः येन, तत एव च काम् आयतिम् अतन्वते–सर्वं कालं मोक्षलक्ष्मीसमाश्लेषमयं दर्शयित्रे, स्वामिने नम इति अयमपि अस्यार्थः ॥ ५१ ॥

एवं तावत् भक्तिद्रविणपरिरक्षाप्रवण एवास्मि, तथापि तु यदि वशिनस्ते मायाशक्तिः मां विस्मृतस्वरूपं मध्ये करोति, तत्––

किमशक्तः करोमीति सर्वत्रानध्यवस्यतः ।
सर्वानुग्राहिका शक्तिः शाङ्करी शरणं मम ॥ ५२ ॥

क्रीडामयमहेश्वरमायाशक्त्या कयाचित् व्युत्थानदशायां व्यामोहितत्वात् अशक्तः किम् अहं करोमि, न किंचित् इति सर्वत्र शरीरमनोवाग्व्यापारेषु अनध्यवस्यतः–कुत्रापि अध्यवसायम् अगृह्णतः परमेश्वरनियोगतः कान्दिशीकस्य मम पराद्वयप्रथात्मकश्रेयस्करणात् शंकरस्य सम्बन्धिनी शक्तिः सर्वानुग्रहैकप्रयोजना शरणं, सैव मां पुनरुद्बोधयिष्यति इत्यर्थः ॥५२॥

न चैवं वक्तव्यं शंकरोऽनुग्रहैकप्रयोजनः, अन्यस्तु कश्चित् ईश्वरो मोहको भविष्यति इति, यतः—

गुणातीतस्य निर्दिष्टनिःशेषातिशयात्मनः ।
लभ्यते भव कुत्रांशे परः प्रतिनिधिस्तव ॥ ५३ ॥

हे भव––प्रकाशैकात्मना रूपेण नित्यावस्थित, सत्त्वादिगुणयोगात् मायाप्रमातॄणां नानाता भवति, त्वं तु गुणातीतः स्वतन्त्रचिदेकमूर्तिरिति, तादृशस्य तव अंशमात्रेऽपि कः प्रतिनिधिः–तुल्यः अस्ति, चितो भेदकस्य कस्यापि अभावात् । अतः कथं परिपन्थकेश्वराशंका, अत एव परमेश्वरः–

'..........स्वतन्त्रस्तु कर्ता तत्रैकको भवान् ।'

इत्यादिना निर्दिष्टःनिशेषातिशयात्मा प्रतिपादितसकलोत्कर्षस्वभावः । निर्मृष्टेति पाठे समुत्पुंसितसर्वातिशयः महासामान्यचिदेकमात्ररूप आत्मा यस्य इति योज्यम् ॥ ५३ ॥

अतश्च तवैव वशिनो मायया कचित् व्युत्थाने व्यामोह्यमाना त्वत्प्रकाशाय त्वामेव तारं क्रन्दामः, यदाह--

निर्द्वन्द्वे निरुपाधौ च त्वय्यात्मनि सति प्रभो ।
वयं वञ्च्यामहेऽद्यापि माययामेयया तव ॥ ५४ ॥

हे प्रभो–दासवत्सल, निर्द्वन्द्वे–परमाद्वयरूपे, तथा देशकालाकारेभ्यः उपाधिभ्यो निष्क्रान्ते त्वयि महादेवे, न तु पुर्यष्टकादिरूपे आत्मनि सति तथात्वेन निश्चित्य निष्ठापितेऽपि वयम् अद्यापि ईदृशीं प्रबोधधाराम्, अधिरूढा अपि, तव वशिनः अमेयया मायया वञ्च्यामहे–मनाङ्मात्रं देह-प्रमातृतासंस्कारेण न त्यज्यामहे, अतः स्वामिन्, तवैवैतद्विदितं कृत्यं, त्वं तथा कुरु–यथा अयं मायासंस्कारोऽपि अस्माकं त्वद्दासानां शाम्यति। तदुक्तं मयापि स्वस्तोत्रे--

'उन्मूलितापि शतशो दलितापि सहस्रशः ।
गोनासेवाप्रथोदेति द्रागत्र शरणं शिवः ॥'

इति ॥ ५४ ॥

न चैतत्प्रशमनं दुरासदम्, यतः--

अणिमादिगुणावाप्तिः सदैश्वर्यं भवक्षयः ।
अमी भव भवद्भक्तिकल्पपादपपतलवाः ॥ ५५ ॥

अणिमाद्यवाप्तिः ब्रह्मादीनां, सदैश्वर्यं सदाशिवादीनां, भवक्षयः शुद्धात्मनाम्, इत्येते त्वद्भक्तिकल्पवृक्षस्य पल्लवाः, न तु कुसुमानि फलानि वा, कुसुमं हि अस्य त्वच्छक्तिमयत्वं, फलं तु त्वन्मयतैव, यतश्च भवक्षयः त्वद्भक्तेः पल्लवः, ततो भवद्भक्तिभाजामस्माकं त्वत्प्रसादात् माया-संस्कारोऽवश्यं नङ्क्ष्यति इत्याशयशेषः । उक्तं च विज्ञानभैरवे--

'भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते मतिः ।
सा शक्तिः शाङ्करी नित्यं भावयेत्तां ततः शिवः ॥'

इति ॥ ५५ ॥

एवं भक्त्युद्रेकेण उत्तेजितो गलितनिःशेषदेहसंस्कारां महेश्वर-तन्मयतामेव आशंसन् आह––

या या दिक्तत्र न क्वासि सर्वः कालो भवन्मयः ।

इति लब्धोऽपि कर्हि त्वं लप्स्यसे नाथ कथ्यताम् ।। ५६ ।।

दिश्यते इति दिक् देशः, यः कश्चित् मूर्त्यात्मा देशः, क्रियात्मा वा कालः, स सर्वः चेत्यमानत्वात् चिदेकात्मैव इत्यनेन न्यायेन लब्धोऽपि–आसादितोऽपि विश्वमयः त्वं, कर्हि–कदा, लप्स्यसे–गलितसूक्ष्मतमदेह-संस्कारकलाविघ्नं त्वदात्मसद्भावं कदा आप्स्यामः–इत्येतत् नाथ–स्वामिन्, दासानाम् आदेश्यताम् । इति गाढपरिचयप्रणयनिर्भरोक्तिः ।। ५६ ।।

पुनर्भक्तिभरेण नमस्कर्तुमाह––

नमः प्रसन्नसद्वृत्तमानसैकनिवासिने ।

भूरिभूतिसिताङ्गाय महाहंसाय शंभवे ।। ५७ ।।

शंभवे महाहंसाय नमः, हंसत्वं प्राग्वत्, महत्त्वं तु सर्वक्षेत्रज्ञरुद्रा-पेक्षया, सर्व एव हि प्रमातारः स्वोचितसर्गसंहाररूपहानसमादानधर्मत्वात् हंसाः, शंभुस्तु तेषामपि सर्गसंहारकृत् इति महाहंसः । अत एव श्रीस्वच्छन्दे––

'शिवो धर्मेण हंसस्तु............ ।'

इति उपक्रम्य––

'आत्मा वै हंसः............... ।'

इत्यादि उक्तम् । कीदृशाय शंभवे ? प्रसन्नं–भवद्भक्तिभरेण तात्त्विकेऽर्थे निःसंशयं, यत् सद्वृत्तानां–त्वद्भावनात्मकभव्यचरितानां मानसं–चेतः, तत्र एकस्मिन् निवसति–अगूहितात्मत्वेन स्फुरति ताच्छील्येन यः तस्मै, तथा भूरिः–महती विश्ववैचित्र्यात्मा माया भूतिः–विभवः तया सितं–संबद्धम् अङ्गं–ज्ञानक्रियात्मकशक्तिरूपं स्वरूपं यस्य तस्मै । महाहंसश्च प्रसन्नमानसाख्यसरोनिवासी भूरिभूतिवत् सिताङ्गो भवति इति अनु-रणनार्थः ।। ५७ ।।

अतश्च––

हृतोद्धततमस्तान्तिः प्लुष्टाशेषभवेन्धना ।
त्वद्बोधदीपिका मेऽस्तु नाथ त्वद्भक्तिदीपिका ।। ५८ ।।

हे नाथ, त्वद्भक्तिरेव प्रकाशकत्वात् दीपशिखा, त्वद्बोधस्य–भवदीयमहाप्रकाशस्य दीपिका अस्तु–अभिव्यञ्जिका अस्तु, कीदृशी असौ? हृता उद्धता तमस्तान्तिः–अख्यातिकदर्थना यया, तथा प्लुष्टं–दग्धम् अशेषं भवेन्धनं–संसारदारु यया। दीपशिखा कृतकज्जलात्मकतमस्तान्तिः अदग्धसमस्तवर्तिः घटादि प्रकाशयति, अतो विलक्षणा इयं त्वद्बोधदीपिका इति व्यतिरेकालङ्कारः ॥ ५८ ॥

रूपान्तरेण विमृशन् आह––

विसृष्टानेकसद्बीजगर्भं त्रैलोक्यनाटकम् ।
प्रस्ताव्य हर संहर्तुं त्वत्तः कोऽन्यः कविः क्षमः ।। ५९ ।।

हे हर–विश्वसंहरणपर, भवाभवातिभवरूपं त्रैलोक्यं वागङ्गाहार्यसात्त्विकादिविविधधर्मयोगात् नाटकमिव–अभिनेयकाव्यमिव प्रस्ताव्य–प्रक्रम्य, संहर्तुं–प्रशमयितुं त्वत्तः अन्यः कः, कविः–प्रजापतिः क्षमः, न कश्चित् इत्यर्थः। कीदृशं? विसृष्टम्–उत्पादितम् अनेकं सतां–सत्त्वेन प्रदर्श्यमानानां भावानां बीजं–मायाप्रकृत्यादि गर्भे–अन्तः यस्य। नाटकाख्यं च काव्यविशेषं प्रस्तावनायां मुखसन्धिना प्रस्ताव्य–संक्षेपेण उपक्षिप्य, संहर्तुं–निर्वहणसन्धिना निर्वाहयितुं कश्चिदेव धाराधिरूढः कविः शक्तो भवति न सर्वः। यदाहुः––

'नाटकं ख्यातवृत्तं स्यात्………… ।'

इति। कीदृक् नाटकं? विसृष्टं नि…………संबन्धबीजादिकग………
यस्मिन् सन्धौ यस्य……………………गर्भाविमर्शनिर्वहण………… …… ..
राज्यलाभादेः प्रयोजनादीनि गर्भसन्धौ निक्षिप्यन्ते। यदाह स्म भरतमुनिः––

'बीजं बिन्दुः पताका च प्रकरी कार्यमेव च।
अर्थप्रकृतयः पञ्च गर्भसन्धौ व्यवस्थिताः ॥'

इति। एषां च स्वरूपं प्रदर्श्यमानं ग्रन्थवैतत्यमानयत्प्रकृतानुपयोगि इति न उक्तम् ॥ ५९ ॥

यतो नान्यः कश्चिदेवं कर्तुं क्षमः, ततः—

नमः सदसतां कर्तुमसत्त्वं सत्त्वमेव वा ।
स्वतन्त्रायास्वतन्त्राय - व्ययैश्वर्यैकशालिने ।। ६० ।।

सतां–विद्यमानानां जगद्वर्तिनाम् अर्थानाम्, असत्त्वं–संहारम्, असतां–वा संहृतत्वात् प्रख्योपाख्याशून्यानां सत्त्वं–पुनर्जननं, कर्तुं स्वतन्त्राय–अनन्यापेक्षसामर्थ्याय, तथा अस्वतन्त्राणां सर्वेषामेव ब्रह्मादीनां यानि आयव्ययैश्वर्याणि–उत्पादविनाशविभवाः तैः अस्वतन्त्रायव्ययैश्वर्यैः स्वाभेदेन स्फुरद्भिः एकः- अद्वितीयः शालते-श्लाघते यः तस्मै ।। ६० ।।

भक्त्यतिशयप्रकाशिततात्त्विकस्वरूपं भगवन्तं पुनरपि स्तोतुमाह—

त्रैलोक्येऽप्यत्र यो यावानानन्दः कश्चिदीक्ष्यते ।
स बिन्दुर्यस्य तं वन्दे देवमानन्दसागरम् ।। ६१ ।।

व्याख्यातस्वरूपे त्रैलोक्ये, यो यावान् इति–यः कश्चित् आ शिवात् सकलप्रमातृपर्यन्तम् आनन्दः स्फुरति, स सर्व एव यस्य बिन्दुः–विप्रुण्मात्र क्रीडादिपरमानन्दसागरम् अपर्यन्तानन्दसमुद्रं वन्दे–समाविशामि । इत्थं च तत्तत्परिमितानन्देऽपि एकाग्रीभावितचित्तः परमानन्दमाविशति योगिजन इति उपदेशदिक्‌दर्शिता । यथोक्तं श्रीविज्ञानभैरवे—

'जग्धिपानकृतोल्लासरसानन्दविजृम्भणात् ।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत् ।।'

इति ।। ६१ ।।

यत ईदृशो देवः, ततः—

अहो ब्रह्मादयो धन्या ये विमुक्तान्यसंकथम् ।
नमो नमः शिवायेति जपन्त्याह्लादविह्वलाः ।। ६२ ।।

विमुक्तान्यसंकथं कृत्वा, तदेकाग्रीभावेन आह्लादेन–जपवशोन्मिषि तेन आनन्देन विह्वलाः–विस्मृतव्यवहाराः ।। ६२ ।।

किं च—

निष्कामायापि कामानामनन्तानां विधायिने ।
अनादित्वेऽपि विश्वस्य भोक्त्रे भव नमोऽस्तु ते ।। ६३ ।।

परिपूर्णानन्दत्वादेव कामेभ्यः—अभिलाषेभ्यो निष्क्रान्तायापि विचित्र-भोगापवर्गात्मकानां काम्यमानानाम् अर्थानां संपादकाय, तथा अनादित्वेऽपि—विश्वस्य आदिभूताद्वितीयरूपत्वेपि नित्यं स्वभित्त्युल्लासितस्य विश्वस्य भोग्यभूतस्य भोक्त्रे—चमत्कर्त्रे, यस्य च कामाः न सन्ति स कथं तान् ददाति, यश्च अनादी—अनदनशीलः स कथं विश्वस्य भोक्ता स्यात इति विरोधालंकारः ॥ ६३ ॥

किं च——

स्तुमस्त्रिभुवनारम्भमूलप्रकृतिमीश्वरम्
लिप्सेरन्नोपकारं के यतः संपूर्णधर्मणः ॥ ६४ ॥

त्रिभुवनं प्राग्वत्, तदारम्भमूलप्रकृतिम् इति सर्वकारणकारणम्, अत एव ईश्वरं—सर्वत्र अप्रतिहतसामर्थ्यं स्तुमः । यतः सम्पूर्णः सर्वातिशायी धर्मः—स्वातन्त्र्यात्मा स्वभावो यस्य, तस्मात् के इव उपकारं स्वोचितैश्वर्य-लाभं न लिप्सेरन्—न अर्थयेरन्, सर्वे हि ब्रह्माद्याः महेश्वरेणैव वितीर्ण-तत्तद्विभूतिविप्रुषः कृताः ॥ ६४ ॥

अपि च——

महत्स्वप्यर्थकृच्छ्रेषु मोहौघमालिनीकृताः ।
स्मृते यस्मिन् प्रसीदन्ति मतयस्तं शिवं स्तुमः ॥ ६५ ॥

पर्यवसाययितुम् अशक्यत्वात् महत्सु गुरुष्वपि अर्थकृच्छ्रेषु—जगद्वि-चारादिप्रयोजनसंकटेषु विषयेषु, मोहौघेन—मायास्फारेण मलिनीकृताः—स्थगिततात्त्विकप्रकाशा मतयः—संविदो, यस्मिन् स्मृते—विमृष्टमात्रे सति, प्रसीदन्ति—मायाकालुष्यं उज्झित्वा तत्त्वज्ञानवत्यो जायन्ते, तं शिवं—श्रेयो-मयं स्तुमः—अभेदेन विमृशामः ॥ ६५ ॥

सर्वमेतत् त्वयैव सुकरम् इत्याह——

प्रभो भवत एवेह प्रभुशक्तिरभङ्गुरा ।
यदिच्छया प्रतायेते त्रैलोक्यस्य लयोदयौ ॥ ६६ ॥

इच्छयैव यः त्रैलोक्यलयोदयकृत् तस्य कियत् एतत्, अन्यस्तु त्वदेका-यत्तवृत्तिः भंगुरशक्तिरेव इत्यर्थः ॥ ६६ ॥

तव च इयत् निरर्गलं स्वातन्त्र्यम् इत्याह—

कुकर्मापि यमुद्दिश्य देवं स्यात्सुकृतं परम् ।
सुकृतस्यापि सौकृत्यं यतोऽन्यत्र न सोऽसि भोः ॥ ६७ ॥

देवः—क्रीडादिपरः परमेश्वर एव 'अहं सर्वमिदं करोमि' इति धिया क्रियमाणं कुत्सितं निषिद्धमपि कर्म सुकृतं, यत्तु अश्वमेधादि सुकृतमपि फलाभिलाषमुषितमानसतया क्रियते तत् कुकर्म इति भगवदभेदभावनाभावाभावाभ्यां यत् करणं तदेव सुकृतदुष्कृतयोः वास्तवं लक्षणं, सोऽसि भोः इत्यनेन अनुत्तरं पारमेश्वरं स्वरूपं सोल्लसात्माभिमुखीभावेन विमृशति ॥ ६७ ॥

यत ईदृशः त्वम्, अतः—

एष मुष्टया गृहीतोऽसि दृष्ट एष क्व यासि नः ।
इति भक्तिरसाध्माता धन्या धावन्ति धूर्जटिम् ॥ ६८ ॥

एष सर्वदशासु चिन्मयत्वेन स्फुरन्, मुष्टया गृहीतोऽसि—स्वात्मीकृत एवासि, एष च दृष्टोऽसि—साक्षात्कृतोऽसि, सर्वदैव चित्प्रकाशरूपतया स्फुटमेव असि स्फुरन् स्थितः, अत एव नः—अस्माकं क्व यासि न क्वापि स्वरूपं गूहयितुं शक्नोषि, सर्वं हि अस्माकं त्वन्मयमेव चकासत् स्थितम् इति—ईदृशेन सततोदितत्वत्समावेशात्मना भक्तिरसेन ये आध्माताः—प्रोद्दीपितसंविदः ते धूर्जटिं—महादेवं धावन्ति—राभस्येन अनुसरन्ति, सर्वदशासु प्रसर्पन्तम् अननुप्रविष्टाख्यातिव्यवधानं परामृशन्ति, अत एव धन्याः परमद्रविणपूर्णा विद्वच्छ्लाघ्याश्च ॥ ६८ ॥

किं च—

स्तुमस्त्वामृग्यजुःसाम्नां शुक्रतः परतः परम् ।
यस्य वेदात्मिकाज्ञेयमहो गम्भीरसुन्दरी ॥ ६९ ॥

ऋगादिवेदत्रयस्य यत् परं शुक्रं, तदभेदविमर्शमयं—बोधादित्यप्रतिभात्मकप्रणवतेजोरूपं, ततोऽपि परं—बोधादित्यरूपं त्वां स्तुमः, यस्य इयं वेदात्मिका आज्ञा—नियोगः, कर्मकाण्ड-देवताकाण्ड-ज्ञानकाण्डवाक्यैकवाक्यताज्ञानस्य कैश्चिदेव प्राप्यत्वात् गम्भीरा 'विज्ञानमानन्दं ब्रह्म' इति वेदान्तेषु प्रतिपादितदृष्ट्या परमानन्दविश्रान्तिप्रदत्वात् सुन्दरी, एवं च

अभिदधतोऽयमाशयः—यत् नियोगरूपाज्ञात्मा अयं वेद्यार्थः स नियोक्तकरि-आज्ञातरि सति उपपद्यते, अन्यथा कथमिव जडस्य शब्दस्य संघटनार्थवत्त्वं नियोक्तृत्वं वा स्यात्, नियोक्तृत्वं च भगवतो गायत्र्यैव उक्तमपि श्रोत्रियैः जाड्यात् न चेत्यते। यद् अभिधास्यति—

'गायत्र्या गीयते यस्य धियां तेजः प्रचोदकम्।'

इति ॥ ६९ ॥

एवमाज्ञारूपनियोगविचारलब्धं नियोक्तारं स्तुत्वा, विधिवाक्यार्थ-पक्षस्यापि सेश्वरत्वमेव—इति अभिधत्ते—

विधिरादिस्तथान्तोऽसि विश्वस्य परमेश्वर।
धर्मग्रामः प्रवृत्तो यस्त्वत्तो न स कुतो भवेत् ॥ ७० ॥

यजेत, न हिंस्यात्, इत्यादिरूपो यो विधिः कर्तव्येतरप्रविभागः, आदिः—इति तस्मिन् विधौ विधाता, अन्तो—विहितार्थनिष्पत्त्या तत्तत्फला-विर्भावः, सर्वोऽपि त्वमेव स्वतन्त्रचिदात्मा, तथा विध्यादिरूपतया भाससे इत्यर्थः। अन्यथा विश्वस्य यो धर्मग्रामो—विचित्रस्वभावपरिस्पन्दः प्रवृत्तः स यदि न त्वत्तः तत् कुतो भवेत्, त्वां विना नैव भवेत्, प्रकाशभित्तिं विना कस्यापि अप्रकाशनात् इत्यर्थः। यदाहुः श्रुत्यन्तविदः—

'तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति'

इति। विधिनैव च भावनापक्षोऽपि कृतोत्तरः ॥ ७० ॥

यदि श्रुत्यन्तानुसारेण सर्वं भगवन्मयं, तत् कस्मात् कर्मकाण्डेषु ज्ञान-मेव न उपदिश्यते, कथं च ज्ञानकाण्डेषु तदेव निषिध्यतः?—इति संशयं शमयति स्तुतिद्वारेण—

नमस्ते भवसंभ्रान्तभ्रान्तिमुद्भाव्य भिन्दते।
ज्ञानानन्दं च निर्द्वन्द्वं देव वृत्वा विवृण्वते ॥ ७१ ॥

हे देव—स्वतन्त्रचेष्टित, भवे—संसारे ये संभ्रान्ताः—त्वन्मायाशक्ति-वशात् व्यामूढाः, तत एव च भेदासक्तत्वात् कर्मनिष्ठाः तेषां पूर्वकक्ष्यायां तां तां भेदभ्रान्तिम् उद्भाव्य सिद्धान्तकक्ष्यायां भिन्दते—ध्वंसकाय, तथा ज्ञानानन्दं—परमाद्वयरूपं विज्ञानम् आनन्दमयं वृत्वा—प्रथमं रहस्यत्वात् अयोग्यान् प्रति आच्छाद्य, पश्चात् योग्यान् प्रति विवृण्वते—स्फुटीकुर्वते

तुभ्यं नमः। एवं च यत् पूर्वपक्षतया कर्मकाण्डस्वरूपं भगवता हेयत्वेन दर्शितं, तदेव मूढैः उपादेयत्वेन अभ्युपगम्य, ज्ञानकाण्डस्य अर्थवादत्वम् उच्यते। अथवाभगवतैव सृष्ट्यादिकृत्यचतुष्टयरक्षार्थं ते तादृशाश्चाराश्चन्तो व्यामोहिताः स्थापिताः। संभ्रान्तिम् इति अपपाठः ॥ ७१ ॥

यथा परमेश्वरः तत्तद्वेदसंहितादिशास्त्रेषु भ्रान्तिमुद्भाव्य भिन्दन्, ज्ञानानन्दं विवृणोति, तथा अस्माकमपि मायामुद्भावितां भित्वा ज्ञानानन्दमेव प्रकाशयतु इत्याह––

यस्याः प्राप्येत पर्यन्तविशेषः कैर्मनोरथैः।
मायामेकनिमेषेण मुष्णंस्तां पातु नः शिवः ॥ ७२ ॥

यस्याः चिदाभेदाप्रथात्मनो मायायाः पर्यन्तस्य विशेषः परकाष्ठा-चिदद्वयमयताप्राप्तिलक्षणः कैः ब्रह्मादिभिः प्रमातृभिः कैः मनोरथैः प्राप्येत, सर्वस्य मनोरथानामपि अविषयः, तां मायाम् एकनिमेषेण मुष्णन्–स्वरूपोन्मेषमात्रेणैव अपहरन्, शिवः–श्रेयःप्रदः, नः–अस्मान् पातु–मायासंस्कार-गोचरात रक्षतु; यथा अख्यातिः नाम्नापि नावतिष्ठते ॥ ७२ ॥

मायापर्यन्तविशेषो यादृक् भक्तिभाजामेव दर्शनयोग्यः––तत् प्रकटयति––

वैराग्यस्य गतिं गुर्वीं ज्ञानस्य परमां श्रियम्।
नैःस्पृह्यस्य परां कोटिं बिभ्रतां त्वं प्रभो प्रभुः ॥ ७३ ॥

हे प्रभो परमेश्वर, वैराग्यस्य–विषयवैतृष्ण्यस्य, गुर्वीं–काष्ठाप्राप्तां सदाशिवादिपदमपि तृणवत् मन्यमानां, गतिं–प्रतीतिं, तथा ज्ञानस्य तत्त्वावबोधस्य, परमां–वैष्णव-लाकुल-पाशुपताद्युक्तमितज्ञानहान्या विश्वोत्तीर्ण-विश्वमय-चिदानन्दसुन्दर-स्वतन्त्र-सततावभास्वर-परमाद्वयस्वात्मप्रथारूपां श्रियं–परां विभूतिं, तथा नैःस्पृहस्य–यथोक्तज्ञानलक्ष्मीप्राप्त्युपायान्वेषण-वैमुख्यस्य च, परां–धाराधिरूढां कोटिं सकलमुद्रामन्त्रध्यानाद्यपहस्तलरूपाम्। यदाह स्म कश्चित्––

'अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥'

इति । एवमीदृशीं निःस्पृहत्वस्य परां कोटिं-विश्रान्तिं ये बिभ्रति—वहन्ति, तेषां मायापारदृश्वानां, त्वं प्रभुः—निरर्गलाः ते तव दासाः, अतश्च ईदृशाना-मस्माकं त्वमुन्मेषमात्रेणैव मायां मुष्णासि इत्यर्थः ॥ ७३ ॥

असामान्यश्च एषां त्वं प्रभुरित्याह—

ब्रह्मणोऽपि भवान्ब्रह्म कस्य नेशस्त्वमीशितुः ।
जगत्कल्याणकल्याणं कियत्त्वमिति वेत्ति कः ॥ ७४ ॥

जगतो—विश्वस्य मध्ये, यत् कल्याणम्—ईश-सदाशिव-शिवाः, तेषा-मपि कल्याणं—पूर्णचिदानन्दघनस्वात्मप्रथनेन अनुग्राहकं कियत् माहा-त्म्यम् इति एतत् को वेत्ति,—अपरिच्छेद्यमहिमा असि इत्यर्थः, यतो ब्रह्मणोपि—महाप्रकाशरूपस्य वेदान्तोपास्यस्य, भवान् ब्रह्म—स्वातन्त्र्य-शक्तिमयत्वेन उत्कृष्टोऽसि, विश्वनिर्माणशक्तिदानेन बृंहकश्च । यदुक्तं गीतासु—

'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥'

इति । तथा—

'नपुंसकमिदं नाथ परं ब्रह्म फलेत् कियत् ।
तत्पौरुषनियोक्त्री चेन्न स्यात्त्वच्छक्तिसुन्दरी ॥'

इति । तथा कस्य ब्रह्मादेः शिवान्तस्य ईशितुः त्वं न ईशः अपि तु सर्वस्यैव स्वामी ॥ ७४ ॥

अतश्च—

किमन्यैर्बन्धुभिः किं च सुहृद्भिः स्वामिभिस्तथा ।
सर्वस्थाने ममेश त्वं य उद्धर्ता भवार्णवात् ॥ ७५ ॥

हे ईश—सर्वत्र प्रभवनशील, सर्वेषां—मित्रादिबन्धूनां, स्थाने—प्रसङ्गे, मम त्वं तदुपकर्तव्यं सर्वं करोषि, यतो दुरुत्तरभवार्णवोद्धरणं जगतोऽपि अशक्यं त्वं संपादयसि—अतः किमन्यैः बन्ध्वादिभिः ॥ ७५ ॥

एवं गाढभक्तिभरोन्मिषितपरामृतचर्वणाघूर्णित आह—

जयन्ति मोहमायादिमलसंक्षालनक्षमाः ।
शैवयोगबलाकृष्टा दिव्यपीयूषविप्रुषः ॥ ७६ ॥

मोहः—अख्यातिः आणवं मलम्, माया—मायीयम्, आदिशब्दात् कार्मं च; एषां मलानां सम्यक् क्षालने—उत्पुंसने शक्ताः शैवयोगबलेन—माहेश्वर-समावेशप्रकर्षेण आकृष्टाः—मायोदरात् हठादेव आनीताः दिव्यपीयूषविप्रुषः-परमानन्दकणा अपि जयन्ति—सर्वोत्कर्षेण वर्तन्ते ॥ ७६ ॥

एवमपि व्युत्थानावसरेषु सर्वदा समावेशायैव परमेश्वरो मे मती उद्योगिनीः कारयेत् इति आशंसन् आह——

गायत्र्या गीयते यस्य धियां तेजः प्रचोदकम् ।
चोदयेदपि कच्चिन्नः स धियः सत्पथे प्रभुः ॥ ७७ ॥

कच्चित् इष्टप्रश्ने, यस्य—महेशितुः बोधादित्यस्य संबन्धि तेजो वरेण्यं ज्योतिः, वाक्शक्तिरूपया गायत्र्या—वेदमात्रा, धियां—सर्वप्रमा मतीनां, चोदकं—तत्तत्कर्तव्याध्यवसायग्राहकं, गीयते—स्तूयने, स प्रभुः—स प्रभवनशीलः कच्चित, अस्माकं व्युत्थानावसरोन्मग्नाः धियः—स बुद्धीवृत्तीः, समावेशात्मनि सत्पथे, परमेश्वरप्राप्त्युपाये, चोदयेत्—न्यव तान्यव्यापारतया उद्यमं ग्राहयेत् । सत्पथे इत्यस्य च अयमाशयः—य गायत्र्यैव प्रतिपादितं भगवतो विश्वधीप्रचोदकत्वम् अहरहः पठि अवबुद्ध्यमानैरपि च मूर्खश्रोत्रियैः नावबुद्ध्यते इति तत्कर्तृकैव ए तेषामसत्पथे चोदना इति ॥ ७७ ॥

अथवा कृतं समावेश प्रार्थनया, स्वाभेदमय्यां पृथिव्यादिमूर्ता माम् एकाग्रधियं कुर्वाणयापि वा प्रार्नंनया, त्वं हि मे प्रसन्नः समावेशद मायाकालुष्योपशमननिर्मलीभूतस्य तत्सर्वं करिष्यसि——सर्वासु पृथिव्या मूर्तिषु सर्वमयमेव स्वरूपम् अविलम्बितमेव प्रकटयिष्यसि इत्येतदाह——

अष्टमूर्ते किमेकस्यामपि मूर्तौ न नः स्थितिम् ।
शाश्वतीं कुरुषे यद्वा तुष्टः सर्वं करिष्यसि ॥ ७८

पृथिव्यादियजमानान्ताभिः मूर्तिभिः भगवानेव स्थित इति द्वैत नामापि नास्ति इति अष्टमूर्तिपदाशयः । करिष्यसि इति 'क्षिप्रव लृट्' ॥ ७८ ॥

युक्ता च इयं संभावना, यतः——

वस्तुतत्त्वं पदार्थानां प्रायेणार्थक्रियाकरम् ।
भवतस्त्वीश नामापि मोक्षपर्यन्तसिद्धिदम् ॥ ७९

हे ईश, सर्वेषां तत्त्वभुवनतदधिष्ठातृरूपाणां पदार्थानां, निजनिजोचिततत्तदर्थक्रियाक्षमं प्रायेण लोकस्थित्या वस्तुतत्त्वं—परमार्थः, भवतस्तु 'धूर्जटेः नामापि ध्यायताम्' इत्यत्र निर्णीतदृष्ट्या नामापि मोक्षपर्यन्तां महासिद्धिं ददाति इति दण्डैरपूपा व्याख्याताः। प्रायेण इत्युक्त्या लोकस्थित्या एतदुक्तम्,—परमार्थदृष्ट्या हि विश्वस्य भगवन्मयतैव वस्तुतत्त्वम् इति ध्वनति ॥ ७९ ॥

को वा न लोकोत्तरस्तव महिमा इत्याह—

मुहुर्मुहुर्जगच्चित्रस्यान्यान्यां स्थितिमूहितुम् ।
शक्तिर्या ते तया नाथ को मनस्वी न विस्मितः ॥ ८० ॥

हे नाथ, गच्छति तां तां स्थावरादिदेवयोन्यन्तां तत्तद्ब्रह्मादिरूपतां च इति जगत्—जीववर्गः, तदेव चित्रं तस्य निःसंख्यस्य, प्रतिक्षणम् अन्याम् अन्याम् अनन्तशाखां, स्थितिं—संवित्सन्ततिवैचित्रीम्, ऊहितुं—तर्कयितुं निश्चेतुं, या ते—तव सर्वज्ञस्य न तु अन्यस्य कस्यचित्, शक्तिः—सामर्थ्यं, तया त्वदैकात्म्यभावनामयेन प्रशस्तेन मनसा युक्तो मनस्वी, को वा न विस्मितः, सर्व एव विस्मयमहामुद्रोट्टङ्कितरोमाञ्चादिसात्त्विकधर्माभिव्यक्तान्तःप्रस्फुरत्परमानन्दमय एव इति ॥ ८० ॥

किं च—

दुष्करं सुकरीकर्तुं दुःखं सुखयितुं तथा ।
एकवीरा स्मृतिर्यस्य तं स्मरामः स्मरद्विषम् ॥ ८१ ॥

स्मरद्विषम्—असामान्योल्लेखकारिणं, तं स्मरामः—स्वाभेदेन विमृशामः, यस्य संबन्धिनी स्मृतिरपि भगवतः अन्येन कर्तुमशक्यत्वात् दुष्करं—रुद्रशक्तिसमावेशं सुकरीकर्तुं—हेलामात्रेण संपादयितुं, तथा दुःखं—सकलदुःखनिधानं मायाव्यामोहं सुखयितुं—परमानन्दमयीकर्तुम्, एकवीरा—अनन्यापेक्षसामर्थ्यमयी अप्रतिहता ॥ ८१ ॥

यतश्च एवंविधानुत्तरसामर्थ्यो भगवान्, अत एव आह—

जयन्ति गीतयो यासां स गेयः परमेश्वरः ।
यन्नाम्नापि महात्मानः कीर्यन्ते पुलकाङ्कुरैः ॥ ८२ ॥

महान्–शक्तिपातवशोन्मिषत्समावेशवशात् विकस्वरीकृत आत्मा येषां ते, प्रोक्तनीत्या यदीयेन नाम्नापि व्युत्थानावस्थायां श्रुतिपथगतेन पुलकाङ्कुरैः कीर्यन्ते–पुनरपि समावेश्यन्ते, तदीयम् अन्यत् आस्तां तावत्, तत्परामर्शपराः गीतयोऽपि–स्तुतिसूक्तयोऽपि जयन्ति सर्वोत्कर्षेण वर्तन्ते ॥ ८२ ॥

न तव उपमानं किमपि अस्तीति अन्वयालंकारेण आह––

भवानिव भवानेव भवेद्यदि परं भव ।
स्वशक्तिव्यूहसंव्यूढत्रैलोक्यारम्भसंहृतिः ॥ ८३ ॥

भव इति प्राग्वत्, स्वासाम् इच्छादिशक्तीनां व्यूहेन–विचित्रगुण-प्रधानभावप्रकाशनेन संव्यूढे–निर्वाहिते प्रोक्तरूपस्य त्रैलोक्यस्य आरम्भ-संहृती येन, स त्वमेव यदि परं–केवलम् असाधारणम् इत्यर्थः ॥ ८३ ॥

अतश्च––

मन्त्रोऽसि मन्त्रणीयोऽसि मन्त्री त्वत्तः कुतोऽपरः ।
स मह्यं देहि तं मन्त्रं त्वन्मन्त्रः स्यां यथा प्रभो ॥ ८४ ॥

हे प्रभो, यः कश्चित् चतुष्कलनवात्मादिः मननत्राणधर्मा पूर्णाहं-विमर्शपरमार्थो मन्त्रः स त्वमेव, तन्मन्त्र्यश्च महाप्रकाशात्मा त्वमेव, अस्य मन्त्रस्य मन्त्र्यस्य च मन्त्रयिता–परामर्शकः त्वमेव, अन्यस्य कस्य-चिदपि चिदतिरिक्तस्याभावात्, अतश्च स त्वम् ईदृशः तं मन्त्रं मन्त्रमन्त्र्य-यितृरूपं मह्यं देहि प्रयच्छ, येन त्वमेव प्रोक्तत्रैविध्यात्मा मन्त्रो यस्य तथा स्यां–विगलितमन्त्रमन्त्र्यमन्त्रयितृविभागः त्वदेकमय एव भवेयम् । उक्तं च श्रीकण्ठसंहितायाम्––

'पृथङ् मन्त्रः पृथङ् मन्त्री न सिद्ध्यति कदाचन ।
ज्ञानमूलमिदं सर्वमज्ञात्वा नैव सिद्ध्यति ॥'

इति ॥ ८४ ॥

यतश्च इदं जातम् इत्याह––

भारूपः सत्यसंकल्पस्त्वमात्मा यस्य सोऽप्यहम् ।
संसारीति किमीशैष स्वप्नः सोऽपि कुतस्त्वयि ॥ ८५ ॥

यस्य—मम, भारूपः—प्रकाशघनः, सत्यसंकल्पः—तात्त्विकपूर्णाहंविमर्शमयः आत्मा—तत्त्वं सोऽपि अहम् ईदृक्स्फाररूपः, संसारी—संसारावस्थावस्थितिः किम् अहं नैव ईदृक्, अपि तु त्वमेव अयमहं स्फुटमेव स्फुरामि। यत्तु व्युत्थानदशायां समाधिरससंस्कारप्लुतायां किंचित्मात्रदेहादिप्राधान्येन मनाक् संसारित्वमिव स्फुरति स किं स्वप्नः, स्फुटस्य देहादिप्रमातृत्वस्य अभावे किंचिदेव च आभासेन स्वप्नः संभाव्यते, स च त्वयि चिदेकरूपे न युक्तः, यतः त्वमेव तुर्यतुर्यातीतस्फारमयो मम आत्मा, तत् कस्य स्वप्नो भासतां, तद्भासनाश्रयस्य कस्यापि अभावात्, तत् सर्वथा संसारित्वस्य भ्रान्त्यापि स्फुरणं नास्ति,—इति सदैव शिव एवाहम् ॥ ८५ ॥

यतश्च त्वमेव अहं सर्वथा स्फुरन् स्थितः, न तु अहं नाम कश्चिदन्यः किंचित् करोमि भुञ्जे वा, तेन इत्थं मिताहंभावप्रशमनेन सर्वकर्मतत्फलसंन्यासिनां यत् त्वन्मयमेव ऐश्वर्यं तदेव एकं श्लाघ्यम् इति सामान्योक्त्या आह—

तदभङ्गि तदग्राम्यं तदेकमुपपत्तिमत् ।
त्वयि कर्मफलन्यासकृतामैश्वर्यमीश यत् ॥ ८६ ॥

अभङ्गि—अनश्वरम् अविभागं च, ग्रामो—रुद्रक्षेत्रज्ञादिसमूहः तत्र भवं ग्राम्यम्—उत्कर्षापकर्षवत्त्वात् अश्लाघ्यम् तत् यत्र न तत् अग्राम्यं—सर्वोत्कृष्टम्, अत एव उपपत्तिमत्—अनन्यमुखप्रेक्षित्वात् सत्यार्थम् ॥ ८६ ॥

एवमीदृशवस्तुतत्त्वपरामर्शोच्छलितः स्वात्मानमेव श्लाघमान आह—

क्षमः कां नापदं हन्तुं कां दातुं संपदं न वा ।
योऽसौ स दयितोऽस्माकं देवदेवो वृषध्वजः ॥ ८७ ॥

'वृषो धर्मः स देवस्य गुणो वै दृक्क्रियात्मकः
धत्ते स चिदचिद्यस्माद्धर्मस्तेनोच्यते बुधैः ।'

इति श्रीमयोक्तनीत्या वृषो—धर्मो ज्ञानक्रियासामरस्यात्मा ध्वजो—लक्षणं यस्य सः, अस्माकं दयितो—वल्लभः, कीदृक् इत्याह योऽसौ कां न आपदम् अपि तु सर्वां हन्तुं, कां वा संपदम् अपि तु सर्वां दातुं क्षमः ॥ ८७ ॥

अतश्च ईदृशस्य सर्वशवतेः तव संबन्धिनी भक्तिरेव यथाभी
हेतुरित्याह—

मायामयमलान्धस्य दिव्यस्य ज्ञानचक्षुषः ।

निर्मलीकरणे नाथ त्वद्भक्तिः परमाञ्जनम् ॥ ८८ ॥

माया एव आमयो–व्याधिः, तत्कृतं मलम्–आवरणं,
अन्धस्य–आवृतप्रकाशस्य, दिव्यस्य–लोकोत्तरस्य, ज्ञानचक्षुषः–
प्रधानयनस्य, त्वद्भक्तिरेव परमम् अञ्जनं, निर्मलीकरणे–स्वरू
न्मीलनविषये ॥ ८८ ॥

अतश्च—

निर्भयं यद्यदानन्दमयमेकं यदव्ययम् ।

पदं देह्येहि मे देव तूर्णं तत्किं प्रतीक्षसे ॥ ८९ ॥

हे देव, एहि–स्वरूपगोपनां निमज्ज्य संमुखीभव, ततश्च
आनन्दमयम् अद्वितीयम् अविनाशि निर्भयं–यस्मिन् सति संसा
नास्ति, यद्विषयं च तपसरणाशंकाभयमपि न भवति, ईदृशं यत्
विश्रान्तिधाम, तत् मह्यं तूर्णं देहि–शीघ्रं मां स्वात्मनि आवेशय,
प्रतीक्षसे–क्षणमात्रमपि मा विलम्बं कृथाः–इति गाढमुत्कण्ठितस्य प्र
निर्भरोक्तिः ॥ ८९ ॥

पुनरपि भक्तिभरोच्छलित आह—

अहो निसर्गगम्भीरो घोरः संसारसागरः ।

अहो तत्तरणोपायः परः कोऽपि महेश्वरः ॥ ९० ॥

ब्रह्मादिभिरपि दुस्तरत्वात् निसर्गगम्भीरः, घोरो–दुःखमयः,
एव सागर इव। कोऽपि इति भक्तिशालिभिरेव लभ्यः चिदेकपरम
निरुपमः पर उपाय इति अनायासमेव झगिति परपारप्रापकः। द्वौ अ
शब्दौ अत्याश्चर्यं ध्वनतः ॥ ९० ॥

आकारपरिग्रहेऽपि असामान्यातिशयवत्त्वं भगवतः स्तोतुमाह—

नमः कृतकृतान्तान्त तुभ्यं मदनमर्दिने ।

मस्तकन्यस्तगंगाय यथायुक्तार्थकारिणे ॥ ९१ ॥

विश्वोपद्रवकरणदुर्मदयोः कालकामयोः निग्रह एव उचितः, देवीकरस्पर्शनोदितस्वनयनजानन्दास्रुस्रुतिमयत्वात् पावनत्वेन जगदुपकारिण्या गंगाया निजे शिरसि धारणानुग्रह एव उचित इति यथायुक्तार्थकारित्वम् ॥ ९१ ॥

अत एवमाकृतिमत्त्वेपि त्वमेव विश्वातिशायी, ततो विश्वातिशायिफलाभिलाषुकाणां त्वमेव शरणम् इत्याह––

ऐश्वर्यज्ञानवैराग्यधर्मेभ्योऽप्युपरि स्थितिम् ।
नाथ प्रार्थयमानानां त्वदृते का परा गतिः ॥ ९२ ॥

ऐश्वर्यम्–ईशितव्यवस्तुसत्तया स्फीतत्वं, ज्ञानं–हेयोपादेयवस्त्वध्यवसायः, वैराग्यं–विषयवैतृष्ण्यं, धर्मः–सत्त्वगुणौत्कर्षकृतव्यापारदत्तः संस्कारः, तेभ्यो ब्रह्मादिष्वपि कृतपदेभ्यः, उपरि–शुद्धचिदात्मनि, अवस्थितिं प्रार्थयमानानां, त्वमेव गतिः–शरणं, नान्यः अन्येषाम् ऐश्वर्यादिचतुष्टयावृतत्वात् ॥ ९२ ॥

तवैव च अनुत्तरम् ईदृक् ऐश्वर्यं, यस्मात्––

त्वय्यनिच्छति कः शंभो शक्तः कुब्जयितुं तृणम् ।
त्वदिच्छानुगृहीतस्तु वहेद्ब्राह्मीं धुरं न कः ॥ ९३ ॥

आस्तां सृष्ट्यादिक्रिया, तृणमपि कुब्जीकर्तुं त्वदिच्छां विना न कोऽपि ब्रह्मविष्ण्वादिः शक्तः, त्वच्छक्त्यनुग्रहात्तु ब्रह्मविष्ण्वादिपदं न को वहेत्, कीटोऽपि यावत् वोढुं शक्तः । तदुक्तं श्रीस्वच्छन्दे––

'ब्राह्मी शक्तिः परस्यैव यत्रेच्छा तत्र पातयेत् ।'

इति । तथा––

'वैष्णव्यास्तु स्मृतो विष्णुः ········· ।'

इति ॥ ९३ ॥

अतश्च––

हरप्रणतिमाणिक्यमुकुटोत्कटमस्तकाः ।
नमेयुः कं परं कं वा नमयेयुर्न धीधनाः ॥ ९४ ॥

हरस्य—महेशितुः प्रणतिरेव माणिक्यमुकुटम्—ऐश्वर्यव्यञ्जकं रत्नमयं मुकुटं तेन उत्कटमस्तकाः—उन्नतशिरस्काः, ये धीधनाः—तत्त्वावबोधद्रविणाः, ते तं ब्रह्मविष्णुरुद्रादिकं प्रणमन्ति न कंचित्, अत्यल्पा च इयम् उक्तिः, कं वा ब्रह्मादिकं न नमयेयुः—सर्वमेव स्वप्रणतं संपादयेयुः ॥ ९४ ॥

यत्प्रणामस्य चायं महिमा, तदावेशमेव आशंसन् आह—

सर्वविभ्रमनिर्मोकनिष्कम्पसंमृतह्रदम् ।
भवज्ज्ञानाम्बुधेर्मध्यमध्यासीयापि धूर्जटे ॥ ९५ ॥

हे धूर्जटे—महादेव, भवज्ज्ञानाम्बुधेः—त्वत्प्रकाशसमुद्रस्य, मध्यं—सारभूतम्, अमृतह्रदम्—आनन्दमयस्वातन्त्र्यशक्त्यात्मकरूपम् अध्यासीय—कदा तन्मयीभावम् इयाम्, कीदृशम् अमृतह्रदं ? सर्वेषां विभ्रमाणाम्—अज्ञानानां निर्मोकेन—त्यागेन यत् निष्कम्पं—प्ररूढतया लब्धं, प्रकाशात्मनश्च भगवतो विमर्शमयं स्वातन्त्र्यमेव हृदयभूतम् । यदाह स्म श्रीप्रत्यभिज्ञाकारः—

'चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥'

इति ॥ ९५ ॥

चित्रसंकल्पादिगतं त्वदाकृतिमात्रमपि भक्तानां कां संपदं न प्रसूते इत्याह—

चित्रं यच्चित्रदृष्टोऽपि मनोरथगतोऽपि वा ।
परमार्थफलं नाथ परिपूर्णं प्रयच्छसि ॥ ९६ ॥

न कश्चिदपि तावत् चित्रसंकल्पाद्युल्लिखितेन अतात्त्विकेन रूपेण अर्थक्रियां करोति, परमेश्वरः पुनः सर्वसंनिधिः केन नाम न रूपेण भक्तानां परमानन्दविकासं पूर्णं सूते, एवम् इह चित्रसंकल्पस्थं 'नमस्तेभ्योऽपि ये सोम' इति श्लोके स्वप्नगतम् 'उपसंहृतकामाय' इत्यादिना बाह्यनिष्ठं 'किं नासि यत्प्रभो' इत्यादिप्रदेशेषु विश्वमयम् 'भिन्नेष्वपि न भिन्नं यत्' इत्याद्युक्तिषु चिदानन्दघनं भगवत्स्वरूपम् अस्य काष्ठाप्राप्तभक्तेः भगवदेकमस्य सर्वेणैव रूपेण परफलप्रदमेव ॥ ९६ ॥

तदित्थम्——

को गुणैरधिकस्त्वत्तः त्वत्तः को निर्गुणोऽधिकः ।

इति नाथ नुमः किं त्वां किं निन्दामो न मन्महे ।। ९७ ।।

त्वत्तो गुणैः—सर्वज्ञत्वादिभिः, कोऽधिको—न कश्चित् 'भवानिव भवानेव भवेद्यदि' इत्याद्युक्त्या समोऽपि तव नास्ति इति उक्तम् तत्कथम् अधिकः स्यात् । त्वत्तश्च कोऽन्यो निर्गुणः अधिकः—सत्त्वादिगुणसंस्कारेण अस्पृष्टो न कश्चिदन्य इत्यर्थः । इति अनेन उक्तिद्वयेन किं त्वयि निन्दा पर्यवसिता, किं वा स्तुतिरिति तत्त्वं न विद्मः, अनधिकगुणेषु सत्त्वादिगुणयुक्तेष्वपि या निन्दा सा त्वन्मयत्वात् विश्वस्य किं त्वय्येव पर्यवसिता, आहोस्वित् गुणाधिक्यनिर्गुणत्वाभ्यां स्तुतिः त्वयि विश्वात्मनि परिनिष्ठिता इति महाद्वयमयं त्वाम् उक्तिद्वयं च इदं पर्यालोचयन्तः सन्देहदोलाम् आरूढाः स्मः । वस्तुतो हि त्वयि अपरिच्छेद्यमूर्तौ न काचित् स्तुतिः निन्दा वा अस्ति इति परमार्थः ।। ९७ ।।

तदलं तावत् एतदुक्तिद्वयविमर्शनेन——

कीर्तनेऽप्यमृतौघस्य यत्प्रसक्तेः फलं तव ।

तत्पातुमपि कोऽन्योऽलं किमु दातुं जगत्पते ।। ९८ ।।

हे जगत्पते, तव अमृतौघस्य—परमानन्दरूपस्य, कीर्तने—नाममात्रोच्चारणेऽपि, यत् प्रसक्तेः तव त्वदीयान्नैर्मल्यप्रथात्मनः प्रसादात् पूर्णं चमत्कारमयं, फलं तत्पातुम् अविश्रान्त्यन्तर्मुखत्वेन आस्वादयितुमपि न कश्चित् ब्रह्मादिरपि पर्याप्तः, किमु दातुं—वितरीतुं, त्वमेव दद्दातुं क्षम इत्यर्थः ।। ९८ ।।

तदीदृशात् स्वामिनः परसिद्धिलाभवाञ्छया भक्तिमेव प्रार्थयितु माह——

निःशेषप्रार्थनीयार्थसार्थसिद्धिनिधानतः ।

त्वत्तस्त्वद्भक्तिमेवाप्तुं प्रार्थये नाथ सर्वथा ।। ९९ ।।

समस्ताभिलषितनिष्पत्तिनिधानात्, नाथ——अर्थनीय, त्वत्तः परमेश्वरात्, त्वद्भक्तिमेव सर्वप्रकारम् अर्थये, न तु किमपि फलम् ।। ९९ ।।

भक्तेः परसिद्धिपर्यवसितृत्वं भगवन्नमस्कारमुखेन दर्शयति--

नमस्त्रैलोक्यनाथाय तुभ्यं भव भवज्जुषाम् ।
त्रिलोकीनाथतादाननिर्विनायकशक्तये ॥ १०० ॥

त्रैलोक्यनाथाय–विश्वेश्वराय, तुभ्यं नमः, यस्त्वं भवज्जुषां–त्वद्भक्ति मतां, पूर्वनिर्णीतत्रिलोकीनाथतादाने–विश्वेश्वरस्वात्मैक्यप्रथने, निर्विनायक शक्तिः–अनर्गलस्वातन्त्र्यः ॥ १०० ॥

अतश्च--

निःशेषक्लेशहानस्य हेतुः क इति संशये ।
स्वामिन्सोऽसीति निश्चित्य कस्त्वां न शरणं गतः ॥ १०१ ॥

हे परमेश्वर, अविद्याद्यशेषक्लेशप्रशमकारणं किं स्यात् इति संशय सोऽसि ईदृक् त्वमेव इति निश्चित्य, कः त्वां न आश्रितः, सर्वे विवेकि त्वाम् अशेषक्लेनाशनं भजन्ते, इति त्वद्भक्तिरेव त्रिलोकीनाथतादाने इ सर्वक्लेशप्रशमेऽपि हेतुः ॥ १०१ ॥

अत एव--

भुक्त्वा भोगान्भवभ्रान्तिं हित्वा लप्स्ये परंपदम् ।
इत्याशंसेह शोभेत शंभौ भक्तिमतः परम् ॥ १०२ ॥

शंभौ–चिदानन्दघने, भक्तिभाजो दुर्लभस्य कस्याचिदेव, केवल इयम् आशंसा शोभेत। का असौ इत्याह भवभ्रान्तिं हित्वा–निःशेष परिहृत्य, यथोपनतान् योगप्रभावाकृष्टान् भोगान् भुक्त्वा, परं पदं लप्स्ये प्राप्स्यामि इति परमाद्वयमये माहेश्वरे नये--

'स्थान्युपनिमन्त्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात्'
(पा० ३–५१)

इत्यन्यशास्त्रनीत्या न कदाचिदपि विदिततत्त्वस्य भोगासंगो बन्धाय भवति यदुक्तं श्रीस्पन्दे--

'तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥
(३ नि० २ का०)

इति ॥ १०२ ॥

तेन——

नाथ स्वप्नेऽपि यत्कुर्यां ब्रूयां वा साध्वसाधु वा ।
त्वदधीनत्वदर्पेण सर्वत्रात्रास्मि निर्वृतः ॥ १०३ ॥

हे नाथ, यत्किञ्चित् अहं मोहनमये स्वप्नेऽपि मनःकायाभ्यां कुर्यां,
ब्रूयां वा वाचा, तच्च साधु—शास्त्रविहितम् इतरद्वा अस्तु, अत्र सर्वत्र अस्मि
निर्वृतः—त्वदानन्दमय एव, केन त्वदधीनत्वदर्पेण—त्वमेव चिदात्मा महेश्व-
रोऽहं सर्वास्वेव अवस्थासु सर्वम् इदं करोमि इति इदृशेन त्वदायत्तत्वो-
त्साहेन त्वभेदावष्टम्भमयस्व मम न कापि कुत्रापि कदाचिदपि कदर्थना
इत्यर्थः ॥ १०३ ॥

नहि मम अज्ञानस्पर्शोऽपि अस्ति इत्याह——

ज्योतिषामपि यज्ज्योतिस्तत्र त्वद्धाम्नि धावतः ।
चित्तस्येश तमःस्पर्शो मन्ये वन्ध्यात्मजानुजः ॥ १०४ ॥

हे ईश – स्वतन्त्र, ज्योतिषां – सूर्येन्द्वग्निप्रभृतीनामपि वेद्यरूपाणां,
ज्योतिः—प्रकाशकं, यत् तस्मिन् त्वदीये धाम्नि—चित्प्रकाशे, धावतः—अप्रव-
धानमेव प्रसर्पतः, चित्तस्य तमःस्पर्शः—अज्ञानसङ्गः, वन्ध्यात्मजानुज इति
मन्ये, वाक्यार्थस्य अत्र कर्मता, वन्ध्यायाः सुत एव न भवति कथं तु तस्य
अनुजः – कनीयान् भ्राता भवेत्, इत्युक्त्या अत्यन्तासत्त्वं मम अख्यातेः
इति दर्शयति, प्रकृष्टप्रकाशभूमौ च तमसो न नामापि भवति इति उचि-
तोक्तिः ॥ १०४ ॥

आस्तां वा त्वत्प्रकाशानुसरणं, त्वद्भक्तौ उत्साहोऽपि मे वरफल-
प्रसूरित्याह——

मन्ये न्यस्तपदः सोऽपि क्षेम्ये मोक्षस्य वर्त्मनि ।
मनोरथः स्थितो यस्य सेविष्ये शिवमित्ययम् ॥ १०५ ॥

शिवं—श्रेयोमयं, सेविष्ये—तन्मयीभावेन आश्रयिष्ये, इति ईदृगलौकि-
कोत्साहमयो यस्य मे सङ्कल्पः, सोऽहं मोक्षस्य—शिवाभेदप्राप्त्यात्मनः अप-
वर्गस्य, मार्गे—शाश्वते धाम्नि, क्षेम्ये - क्षेमाय परश्रेयसे हिते, न्यस्तपदो—
निवेशितनिजज्ञानक्रियाशक्तिचरणः—इति भक्तिविषय उत्साह एवास्य
अभीष्टप्रदः संपद्यते । यदुक्तमस्मत्प्रभुपादैः——

'उत्तिष्ट शंकरं स्तौमि पूजयामि महेश्वरम् ।
इति संरम्भसंभोगं धन्या एवोपभुञ्जते ॥'

इत्यादि ॥ १०५ ॥

शिवो विश्वोपकरणनित्योदितः स्वयम्, इत्यस्माकमभीष्टं घटितमे इत्याशयेनाह––

स्थित्युत्पत्तिलयैर्लोकत्रयस्योपक्रियास्विह ।
एकैवेश भवच्छक्तिः स्वतन्त्रं तन्त्रमीक्षते ॥ १०६ ॥

स्थितिः–नानाभोगसंसङ्गः, उत्पतिः–प्रलयेन व्यामूढीकृतानां यथो चितशरीरभुवनादिजननं, लयो – भोगपरम्परानुषङ्गश्रान्तानां विश्रान्ति दानार्थं कंचित्कालं संहारः, तैः विश्वस्य उपकाराय, इह–जगति, हे ईश स्वामिन्, एकैव–अद्वितीया त्वच्छक्तिः, स्वतन्त्रम्–आत्मायत्तं, तन्त्रं तन्त्रणं साधनं पश्यति । उक्तं च मृगेन्द्रायाम्––

'स्वापेऽप्यास्ते बोधयन्बोधयोग्यान्
रोध्यान्रुन्धन्साधयन्कर्मिकर्म ।
मायाशक्तीर्व्यक्तियोग्याः प्रकुर्वन्
सर्वं पश्येद्यद्यथावस्तुजातम् ॥'

इति ॥ १०६ ॥

यथा च स्वेच्छामात्रेण विश्वसृष्टिस्थितिसंहारान् दर्शयसि, तथ त्वमेव अनुग्राह्यान् अनुगृह्णासि इत्याह––

त्रिलोक्यामिह कस्त्रातस्त्रिताप्या नोपतापितः ।
तस्मै नमोस्तु ते यस्त्वं तन्निर्वाणामृतह्रदः ॥ १०७ ॥

हे त्रातः–संसारभयप्रशमन, इह–जगति आध्यात्मिकाधिदैवि-काधिभौतिकात्मना त्रिताप्या–तापत्रयेण को न तापितः, सर्व एव संता-पितः । यदुद्घुष्यते––

'आ ब्रह्मणश्च कीटान्तं न कश्चितत्त्वतः सुखी ।
करोति तास्ता विकृतीः सर्व एव जिजीविषुः ॥'

इति । अतः ते–तुभ्यमेव तस्मै–असामान्याय कस्मैचित् नमः, यस्त्वं तस्य–विश्वोपतापस्य निर्वाणे–प्रशमने अमृतह्रदः–परमाद्वैतानन्द-समुद्रः ॥ १०७ ॥

त्वद्भक्तेः निःसीमा महिमा इति तत्प्रार्थना अस्माकम् उचितैव इत्याशयेनाह—

कृत्रिमापि भवद्भक्तिरकृत्रिमफलोदया ।
निश्छद्मा चेद्भवेदेषा किं फलेति त्वयोच्यताम् ।। १०८ ।।

कृत्रिमा—बाह्यपूजाध्यानजपादिनिर्वर्त्यापि या त्वयि महादेवे भक्तिः, सापि अकृत्रिमत्वत्प्राप्त्यात्मकफलोदयमयी यत्र, तत्र यदि असौ निश्छद्मा—निर्व्याजा बाह्यसाधनानपेक्षा महानुरागोच्छलिता स्यात्, तत् किंफला ? केन फलेन युक्ता इति त्वया उच्यतां, जीवन्मुक्त्यात्मत्वत्समावेशमय्याः त्वद्भक्तेः अतिरिक्तं फलं न किमपि कलयितुं शक्यमित्यर्थः ।। १०८ ।।

अत एव भक्तिशालिनाम्—

तच्चक्षुरीक्ष्यसे येन सा गतिर्गम्यसे यया ।
फलं तदज जातं यत्त्वत्कथाकल्पपादपात् ।। १०९ ।।

हे अज, तत् चक्षुः—तदेव प्रकाशकं ज्ञानं, येन त्वम् ईक्ष्यसे—साक्षात्क्रियसे, अन्यत् तु ज्ञानम् अज्ञानमेव, प्रकाशकत्वधर्मयोगात् चक्षुरत्र ज्ञानम् उच्यते; सा गतिः—सा सम्यक् प्रवृत्तिः, यया पूजाजपध्यानात्मना शरीरवाक्चित्तनिर्वर्त्यया त्वं गम्यसे, अन्या तु संसारावटपातिनी इति अगतिरेव; एवं ज्ञानपूर्वक्रियानुष्ठानलभ्यं तदेव सम्यक् फलं, यत् त्वत्कथायाः—त्वत्स्वरूपचर्चायाः सर्वसंपत्प्रदत्वात् कल्पपादपकल्पायाः सकाशात् जातं परमानन्दविकासात्मकम्, अन्यत्तु सर्वं फलं हेयत्वात् अफलमेव ।। १०९ ।।

अतश्च—

श्रेयसा श्रेय एवैतदुपरि त्वयि या स्थितिः ।
तदन्तरायहृतये त्वमीश शरणं मम ।। ११० ।।

सर्वेषाम्—ईश्वर-सदाशिव-शिवप्राप्तिरूपाणां श्रेयसाम् उपरि—उत्कृष्टत्वेन एतदेव श्रेयः—कल्याणम्, या इयं त्वयि—चिदानन्दघने स्थितिः—विश्रान्तिः, ततश्च तस्मिन् श्रेयसि येऽन्तरायाः—मध्यमध्ये स्थिताः त्वद-

ख्यातिस्पर्शाः तेषां हृतये—ध्वंसाय, हे ईश स्वामिन, मम त्वमेव शरणं, तथा कुरु यथा व्युत्थानावसरे न कदाचिदपि माम् अख्यातिः स्पृशति इत्यर्थः ॥ ११० ॥

तदित्थं भगवत्स्वरूपचिन्तनोच्छलितसमावेशरसेन घूर्णमानः सविस्मयमाह—

अहो स्वादुतमः शर्वसेवाशंसासुधारसः ।
कुत्र कालकलामात्रे न यो नवनवायते ॥ १११ ॥

शर्वसेवाया—महादेवभक्तेः या इयम् आशंसा—'सेवेयं शिवम्' इति प्रार्थना सैव सुधा—अमृतं तस्य रसः—चमत्करणम्, अहो—चित्रं स्वादुतमः—परं स्पृहणीयतया क्षणमपि त्यक्तुम् अशक्यः, यः कुत्र—कस्मिंश्चित्कालस्य कलामात्रेऽपि—अंशमात्रेऽपि, न नवनवायते—अपि तु प्रतिक्षणं नवनवचमत्कारमय एव, न तु इतररसवत् अनवरतास्वादनेन वैरस्यम् आवहति ॥ १११ ॥

यत्सेवाशंसाया इयान् महिमा, सः—

मुहुर्मुहुरविश्रान्तस्त्रैलोक्यं कल्पनाशतैः ।
कल्पयन्नपि कोऽप्येको निर्विकल्पो जयत्यजः ॥ ११२ ॥

प्रतिक्षणं तत्तत्प्रमातृप्रमेयाभाससंयोजनवियोजनक्रमेण अविश्रान्तः—अविरत एव—

'तदेवं व्यवहारेऽपि प्रभुर्देहादिमाविशन् ।
भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहिः ॥'

इति प्रत्यभिज्ञाकारिकानिरूपितार्थस्थित्या रुद्रक्षेत्रज्ञादिसर्वप्रमातृभूमिकानिष्ठं भवाभवातिभवरूपं त्रैलोक्यं कल्पनाशतैः—भङ्गीसहस्रैः, कल्पयन्—सदा पञ्चविधकृत्यवैचित्र्येण आभासयन्नपि यो निर्मलस्वतन्त्रप्रकाशचिदेकपरमार्थ एव असौ अजो जयति—सर्वोत्कृष्टो वर्तते, कल्पनाशतयुक्तश्च कथं निर्विकल्प इति विस्मयः । कोऽपि एक इति असामान्यः ॥ ११२ ॥

स्तुत्युचितां प्रार्थनामाह—

मलतैलाक्तसंसारवासनावर्तिदाहिना ।
ज्ञानदीपेन देव त्वां कदा नु स्यामुपस्थितः ॥ ११३ ॥

हे देव, त्वां कदा–कस्मिन् काले, उपस्थितः–त्वदभेदविश्रान्त्यात्मकत्वदर्चापर एव भवेयं, केन ज्ञानं–तत्त्वावबोध एव दीपः तेन, न तु बाह्यकुसुमादिना। तदुक्तं श्रीविज्ञानभैरवे—

'पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः॥'

इति। कीदृशेन ज्ञानदीपेन, मलम् – अख्यातिः तदेव वासनावर्तीनां स्निग्धताधायकत्वात् तैलमिव तेन अक्ताः सिक्ताः या वासनाः–विचित्राः धर्माधर्मादिसंस्काराः त एव वर्तमानत्वात् स्वयं वेष्टनाभिः उत्थाप्यमानत्वात् वर्तयः ताः दहति अवश्यं यः तेन॥ ११३॥

एतत्प्रार्थनापूरणं च तव भगवन् हेलामात्रमेव इत्याह—

निमेषमपि यद्येकं क्षीणदोषे करिष्यसि।
पदं चित्ते तदा शंभो किं न संपादयिष्यसि॥ ११४॥

हे शंभो, त्वदिच्छयैव क्षीणदोषे–निवृत्तकुप्राचीनसंस्कारे, चित्ते, मादृशाम् अणुग्राह्याणां यदि क्षणमेकमपि पदम्–अनुग्रहीतृत्वेन अधिष्ठानं करिष्यसि, तदा किं न संपादयिष्यसि–सर्वाः प्रार्थनाः तत्क्षणं पूरयस्येव।

तदुक्तं श्रीमृत्युजिद्भट्टारके—

'निमेषोन्मेषमात्रं तु तत्त्वं यद्युपलभ्यते।
ततः प्रभृति मुक्तोऽसौ न पुनर्जन्म त्वाप्नुयात्'॥

इति॥ ११४॥

अतश्च—

धन्योऽस्मि कृतकृत्योऽस्मि महानस्मीति भावना।
भवेत्सालम्बना तस्य यस्त्वदालम्बनः प्रभो॥ ११५॥

धनेन–त्वदभेदज्ञानरूपेण समृद्धः धन्यः अहमेव, तथा कृतं–संपादितं कृत्यं–परपुरुषार्थप्राप्तिलक्षणं येन तादृक् अहमेव, तथा महान्–सर्वातिशायी अहमेव, न तु भेदेश्वरावस्थितः, इति एषा भावना–प्रतिपत्तिः, तस्य–कस्यापि, सालम्बना–सदर्था भवति। यः त्वदालम्बनः–त्वं महेश्वर एव आलम्बनं शरणं यस्य॥ ११५॥

परमेश्वरादपि तद्भक्तेरुत्कर्षं दर्शयति—

शुभाशुभस्य सर्वस्य स्वयं कर्ता भवानपि ।
भवद्भक्तिस्तु जननी शुभस्यैवेश केवलम् ॥ ११६ ॥

हे ईश—स्वतन्त्र, न केवलं त्वत्प्रयुक्तो ब्रह्मादिः स्वोचितस्य शुभाशुभस्य कर्ता, यावत् स्वयं भवानपि सर्वस्य शुभाशुभस्य—विद्यामायात्मनो जगतः, कर्ता—जनयिता, भवद्भक्तिस्तु त्वदभेदप्रथात्मनः शुभस्यैव परं जननी इति भवद्भक्तियुक्ते स्वात्मनि बहुमानः ॥ ११६ ॥

इदानीं निरपेक्षो भवच्छक्तिपात एव चिदानन्दघनस्वात्मसमावेशमयभक्तिभाजो जनान् संपादयति, न तु कर्मसाम्यमलपरिपाकादिहेतुकोऽसौ, नापि भवच्छक्त्यधिष्ठानात् मलस्य क्रमेण परिपाक इत्येतत् श्लोकद्वयेन आह—

प्रसन्ने मनसि स्वामिन्कि त्वं निविशसे किमु ।
त्वत्प्रवेशात्प्रसीदेत्तदिति दोलायते जनः ॥ ११७ ॥
निश्चयः पुनरेषोऽत्र त्वदधिष्ठानमेह हि ।
प्रसादो मनसः स्वामिन् सा सिद्धिस्तत्परं पदम् ॥ ११८ ॥

(युगलम्)

हे स्वामिन्, मनसि—संवेदने, प्रसन्ने—परिपक्वमले संजातकर्मसाम्ये वा सति, किं त्वं निविशसे—स्वशक्त्यधिष्ठानं करोषि, उत त्वत्प्रवेशात्—शक्त्यधिष्ठानात् तत् प्रसादं गच्छेत्—मलपरिपाकादिकम् आसादयेत् इति जनो दोलायते—संदेग्धि । अत्र पुनरयं निश्चयः, यत् त्वदधिष्ठानं—स्वरूपगोपनानिमज्जनेन त्वत्स्वतन्त्रशक्त्युन्मीलनमेव केवलं मनसः—संवेदनस्य प्रसादो, न तु मलपरिपाककर्मसाम्यादि किंचित्; तथा हि यदि मलपरिपाकः शक्तिपातस्य हेतुः कर्मसाम्यं वा, तदपि तर्हि किं हेतुकं ? समधिष्ठात्री भगवच्छक्तिः इति, तद्धेतुकमिति चेत् अलं तेन, भगवच्छक्तिरेव स्वतन्त्रानुग्राहिका भविष्यति, अहेतुकमिति चेत् सर्वस्य युगपत् किं न भविष्यति, कस्मिंश्चित्काले भवति, इति चेत् सर्वेषां बन्धकोटेः अनादित्वात् कालनियमः किं न कृतः, किं कुर्मः, तत् कदाचित् कस्यचित् कथञ्चित् भवति,

इति चेत् मलस्य स्वशक्त्या निरोधकत्वेन अवस्थितस्य जडस्य विजातीय-कारणानुप्रवेशं विना परिपाकलक्षणविलक्षणकार्यजननानुपपत्तिः। कश्चिदेव कालोऽत्र सहकारिकारणम् इति चेत्, कोऽसौ इति प्रश्ने नोत्तरं लभ्यते। परिणमन्मलः परिपाकात्मकं विशेषमेति, इति चेत् अत्रापि दुग्धदधि-परिणाम इव उष्णस्पर्शस्य विरोधिनः कारणस्य अननुप्रवेशे विलक्षण-परिणामानुपपत्तिः। यथा स्वतन्त्रशक्तिपातवादिपक्षे कमभागवाचश्च मुक्तिश्च कालनियमेन, भगवदेककर्तृके च जगति मायाकालादीनां क्रमेण कार्यकारणभावः, तथैव एतद्भविष्यति इति चेत् चाशपश्चाशन्याय आयातः, यतः तत्पक्षे भगवानेव स्वातन्त्र्यात् गृहीतसंकोचाभासो यथा तत्तत्तत्त्वा-त्मना भाति, तथा तद्गतनियतपौर्वापर्यात्मककार्यकारणभावाभासात्म-नापि नियतकर्मतत्फलवैचित्र्यात्मनापि क्रमाभासमयेन, न तु अत्र काल-कर्मादेः कस्यापि निजं तत्त्वम् अस्ति इति यथा असौ इत्थं भोगवैचित्र्यम् आभासयति, तथा स्वस्वातन्त्र्यात् अनुग्रहवैचित्र्यमपि, इति नात्र निग्रहानु-ग्रहभाक् कश्चित् अन्योऽस्ति इति निरवद्य एवायं पक्षः। मलपरिपाकादि-पक्षस्तु उक्तदूषणैः सावद्य एव—इति कथमिव संभावनासाम्यमात्रेणाभ्युप-गन्तुं शक्यम्, क्रमिके च विरुद्धे द्वे समबले कर्मणी कथं युगपत् फलदानेऽपि समबलत्वात् विरुद्धत्वाच्च तयोः प्रतिबन्धात् फलदानाशक्तत्वे जातु शक्तिपातः स्यात्। कथं वा तस्मिन् अवसरे कर्मान्तरं फलं न ददाति, तस्य भिन्नकालार्जितस्य भिन्न एव परिपाककाल इति चेत् तयोरपि भिन्न-कालार्जितयोः कथम् एककालः परिपाकः। ईश्वरेच्छात इति चेत् सैव भगवती स्वतन्त्रानुग्राहिका अस्तु; अलम् अनेन आलजालप्रायेण मलपरि-पाकादिना। वितत्य च एतत् मयैव श्रीस्वच्छन्दविवृतौ पञ्चमपटलान्ते दीक्षासमर्थनावसरे विचारितम्। यथा च आगमेषु मलस्वरूपं, यथा च एतन्निवृत्तिः भवति तदपि तत्रैव निर्वाहितम् इति अलम् इह अभ्यधिकेन, तदेतत् गर्भीकृत्य स्तोत्रकारेण उक्तम्। 'निश्चयः पुनरेषोऽत्र' यत् त्वच्छक्त्य-धिष्ठानमेव, मनसः—संवेदनस्य प्रसादः न तु मलपरिपाकाद्यपि, त्वद-धिष्ठानमेव च सिद्धिः तदेव परं पदमिति। इदमत्र तत्त्वं, यच्चितिशक्तिरेव

भगवती स्वस्वातन्त्र्यात् गृहीतसंकोचा चित्तभूमिं संसार्यात्मरूपां बहुशाखामाभास्य, पुनः स्वेच्छयैव क्वचित् संकोचं प्रशमय्य, पूर्णतया स्फुरति इत्येव तत्परं पदम् । यदुक्तं केनचिन्महायोगीन्द्रेण––

'चैतन्यपूरितमिदं निखिलं हि विश्वं
चित्तं चिदात्मनि यदास्तमपैति शश्वत।
एवं चितेरपृथगेव सुसंस्थितत्वा-
दुक्तो निरस्तकरणः परमः समाधिः ॥'

इति ॥ ११८ ॥

एवं भगवत्स्वरूपं नानाविधाभिः सूक्तिभङ्गीभिः स्तुत्वा, सर्वदशासु अविचलैव भगवन्मयता अस्तु इति आशंसन् आह––

वचश्चेतश्च कार्यं च शरीरं मम यत्प्रभो ।
त्वत्प्रसादेन तद्भूयाद्भवद्भावैकभूषणम् ॥ ११९ ॥

त्वत् स्तुतौ यदि वचो मम त्वद्भावनामयं संपन्नं, तथा सदैव अस्तु, तच्च चित्तसहचारि, चित्तं च शरीराश्रयम् इति तद्द्वारेण तदपि तेषां वपुश्चेतःशरीराणां यत्किंचित् अर्थाभिधानचिन्तनपरिस्पन्दनादि कार्यं तत् सर्वं मम प्रभो–चिदानन्दघन स्वामिन्, त्वत्प्रसादेन–त्वदीयेन स्वरूपगोपनाप्रशमनानैर्मल्यगमनेन नित्यमेव, भवद्भावः–त्वन्मयत्वमेव एकं भूषणं यस्य तादृशं स्यात् ॥ ११९ ॥

भक्तिमतां शरणादिप्रवृत्त्यर्थं प्रसिद्धप्रभावस्वनामोदीरणपूर्वं स्तोत्रस्य उत्कर्षं दर्शयति उपसंहारभङ्ग्या––

स्तवचिन्तामणिं भूरिमनोरथफलप्रदम् ।
भक्तिलक्ष्म्यालयं शंभोर्भट्टनारायणो व्यधात् ॥ १२० ॥

इति श्रीमहामाहेश्वराचार्यवर्यश्रीभट्टनारायणविरचितः स्तवचिन्तामणिः
समाप्तः

महामाहेश्वरत्वेन प्रसिद्धप्रभावः नारायणाख्यो भट्टः, शंभोः—चिदानन्दघनस्वात्मप्रत्यभिज्ञानात्मकानुग्रहकारिणो भगवतो महादेवस्य, स्तवं स्तोत्रमेव चिन्तामणिं विहितवान्, कीदृशं भूरीणां मनोरथानां यत् फलं—भगवत्समावेशलक्षणं महाफलं तत् प्रददाति यः तं, यतो भक्तिरेव महेश्वरैकात्म्यमयत्वात् लक्ष्मीः—परा संपत् तस्याः आलयं—नित्यं निवासभूमिम्। एतत्स्तोत्रश्रवणपठनादिना परा समावेशलक्ष्मीः आलिङ्गति नित्यमेव भक्तिभाज इति शिवम् ॥ १२० ॥

गुणादित्याज्जातो गुणगणगरिष्ठः शिवगुणैः
कृतामोदो बाल्यात्प्रभृति गतसंगो जगति यः।
स शूरादित्यो मां बहु बहुलभक्त्यार्थयत यत्
स्तुतौ तेनाकार्षं विवृतिमिह नारायणकृतौ ॥ १ ॥

श्रीरामेण कृतात्र सद्विवृतिरित्येषा किमर्थेति मा
सन्तश्चेतसि कुध्वमस्ति विवृतौ कोऽपि प्रकर्षोऽत्र यत्।
तेनार्थिप्रणयाद्दिनैस्त्रिचतुरैर्या क्षेमराजो व्यधात्
क्षेत्रे श्रीविजयेश्वरस्य विमले सैषा शिवाराधनी ॥ २ ॥

शंभोः प्रकाशवपुषः शक्तिरेका जयत्यसौ।
या स्फुरन्त्येव तनुते परामृतमयं जगत् ॥ ३ ॥

इति तत्रभवत्स्तुतिसूक्तिकारप्रशिष्यमहामाहेश्वराचार्यवर्य-
श्रीमदभिनवगुप्तपादपद्ममधुपराजराजानकक्षेम-
राजाचार्यविरचिता स्तवचिन्तामणि-
विवृतिः

स्तवचिन्तामणिश्लोकानुक्रमणिका

श्लोकाः	पृ० सं०	श्लो० सं०
अज्ञानतिमिर०	१३	२४
अणिमादि०	२५	५५
अपि पश्येम	९	१२
अयं ब्रह्मा महे०	१६	३४
अर्चितोऽग्रमयं	१२	२२
अष्टमूर्ते किमेक०	३४	७८
अहो क्षेत्रज्ञता	२०	४३
अहो निसर्ग०	३८	९०
अहो ब्रह्मादयो	२८	६२
अहो महमिदं	२२	४८
अहो सादुतमः	४६	१११
आरम्भः सर्वक०	२३	४९
आरम्भे भव०	२१	४५
इच्छाया एव	१६	३२
उपसंहृतकामाय	२३	५१
एव मुष्ट्या गृहीतोसि	३०	६८
ऐश्वर्यज्ञान०	३९	९२
कः पन्था येन	१२	२१
किमन्यैर्बन्धुभिः	३३	७५
किमशक्तः करो०	२४	५२
किं समयेनेति	१८	३७
कीर्तनेऽप्यमृतौ०	४१	९८
कुकर्मापि यमु०	३०	६७
को गुणैरधिक०	४१	९७
क्रमेण कर्मणां०	२०	४२

श्लोकाः	पृ० सं०	श्लो० सं०
कृत्रिमापि भवद्भ०	४५	१०८
क्षमः कां नापदं	३७	८७
गायत्र्या गीयते	३४	७७
गुणातीतस्य	२४	५३
चित्रं यच्चिज्ज्ञद०	४०	९६
चिन्तयित्वापि	१८	३८
जगतां सर्गसंहार०	११	१८
जयन्ति गीतयो	३५	८२
जयन्ति मोहमा०	३३	७६
ज्योतिषामपि यत्	४३	१०४
तच्चक्षुरीक्ष्यसे	४५	१०९
तदभङ्गि तदग्रा०	३७	८६
त्रिगुणत्रिपरि०	२१	४६
त्रिलोक्यामिह कः	४४	१०७
त्रैलोक्येऽप्यत्र	२८	६१
त्वय्यनिच्छति	३९	९३
दुष्करं सुकरी०	३५	८१
दोषोऽपि देव	२२	४७
द्विष्मास्त्वां त्वां	४	४
धन्योऽस्मि कृत०	४७	११५
नमः ईशाय निःशेष०	१३	२५
नमः कृतकृतान्ताय	३८	९१
नमः प्रसन्न०	२६	५७
नमो भक्त्या नृणां	१५	३०
नमो नमः शिवाय	१२	२०
नमो निःशेष०	१३	२३
नमो निरुपका०	२०	४२
नमः सदसता०	२८	६०
नमः स्तुतौ स्मृतौ	१८	३६
नमस्ते भवसंभ्रान्त०	३१	७१
नमस्तेभ्योऽपि	९	१३

श्लोकाः			पृ० सं०	श्लो० सं०
नमस्त्रैलोक्य०	....	....	४२	१००
नाथ स्वप्नेपि	....	....	४३	१०३
निःशेषक्लेश०	....	....	४२	१०१
निःशेषप्रार्थनीय०	....	....	४१	९९
निमेषमपि यद्येकं	....	....	४७	११४
निरावरणनिर्द्वन्द्व०	....	....	१४	२७
निरुपादान०	....	....	७	९
निर्गुणोऽपि गुण०	....	....	१४	२८
निर्द्वन्द्वे निरुपा०	....	....	२५	५४
निर्भयं यद्यदान०	....	....	३८	८९
निश्चयः पुनः	....	....	४८	११८
निष्कामायापि	....	....	२८	६३
प्रणवोर्ध्वार्ध०	....	....	६	७
प्रभो भवत	....	....	२९	६६
प्रसन्ने मनसि	....	....	४८	११७
प्रसरद्बिन्दु०	....	....	३	३
ब्रह्मणोऽपि भवान्	....	....	३३	७४
ब्रह्माण्डगर्भिणीं	....	....	७	८
ब्रह्मादयोऽपि	....	....	१६	३३
भगवन्भव भाव०	....	....	९	१४
भवानिव भवान्	....	....	३६	८३
भारूपः सत्य सं०	....	....	३६	८५
भिन्नेष्वपि न	....	....	६	६
भुक्त्वा भोगान्	....	....	४२	१०२
भ्रमो न लभ्यते	....	....	१७	३५

श्लोकाः			पृ० सं०	श्लो० सं०
मग्नैर्भीमे भवा०	....	...	१४	२६
मन्त्रोऽसि मन्त्रणी०	....	....	३६	८४
मज्जतैलाक्त	....	....	४६	११३
महतीयमहो	....	....	२१	४४
महत्स्वप्यर्थ०	....	...	२९	६५
मन्ये न्यस्तपदः	....	....	४३	१०५
मायाजलोदरात्	....	....	८	१०
मायामयमलान्ध०	....	....	३८	८८
मुहुर्मुहुरविश्रान्तः	....	....	४६	११२
मुहुर्मुहुर्जगच्चित्र०	....	....	३५	८०
यः स्फीतः श्रीदया०	....	....	३	२
यस्याः प्राप्येत	....	....	३२	७२
या या दिक्	....	....	२६	५६
यावज्जीवं जगन्नाथ	....	....	१०	१५
यावदुत्तरमास्वा०	....	....	२३	५०
रागोऽप्यस्तु जग०	....	....	२२	४७
वचश्चेतश्च०	....	....	५०	११९
वस्तुतत्त्वं पदार्थानां	....	....	३४	७९
वाङ्मनःकायकर्म०	....	..	१०	१७
वाच्य एषां त्वमे०	....	....	१९	४०
विधिरादिस्तथा०	....	....	३१	७०
विसृष्टानेक०	....	....	२७	५९
वैराग्यस्य गतिं	....	....	३२	७३
व्यतीतगुणयोग०	....	....	११	१९
शाखासहस्र	....	....	१०	१६

श्लोकाः			पृ० सं०	श्लो० सं०
शुभाशुभस्य	....	....	४८	११६
श्रीरत्नामृतलाभाय	....	....	१५	२९
श्रेयसां श्रेय एवै०	....	....	४५	११०
षट्प्रमाणीपरि०	....	....	८	११
संहृतस्पर्शयो०	....	....	५	५
सर्वज्ञः सर्वकृत्	....	....	१५	३१
सर्वविभ्रम०	....	....	४०	९५
सुगिरा चित्तहारि०	....	....	१	१
सूक्ष्मोऽसि चेत्	....	....	१९	३९
स्तवचिन्तामणिं	....	....	५०	१२०
स्तुमस्त्रिभुवना०	....	....	२९	६४
स्तुमस्त्वामृग्यजुः	....	....	३०	६९
स्थित्युत्पत्तिलयैः	....	....	४४	१०६
हरप्रणतिमाणि०	....	....	३९	९४
हृतोद्धततमस्ता०	....	....	२७	५८

इति स्तवचिन्तामणिश्लोकानुक्रमणिका

ॐ नमः सच्चिदानन्दाय

श्रीमत्साम्बविरचिता

साम्बपञ्चाशिका

राजानकश्रीक्षेमराजकृतविवृत्युपेता

पुष्णन् देवानमृतविसरैरिन्दुमास्राव्य सम्यग्
भाभिः स्वाभी रसयति रसं यः परं नित्यमेव ।
क्षीणं क्षीणं पुनरपि च तं पूरयत्येवमीदृग्
दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकम् ॥ १ ॥

एतदावेशवैवश्यप्रोन्मिषद्धिषणा वयम् ।
विमृशामो मनाक्छ्रीमत्साम्बपञ्चाशिकास्तुतिम् ॥ २ ॥

सोऽयं परामृतरसो रसज्ञैरिह रस्यताम् ।
आयुष्याज्यामृतस्पर्शः शतपद्या हि शान्तये ॥ ३ ॥

समस्तागममहाम्नायरहस्यविन्महायो(गी)निसहस्रसंप्रदायसंपूर्णः श्रीवासुदेवस्य भगवतः पुत्रः श्रीसाम्बः स्वात्मविवस्वत्स्तुतिं जगतोऽनुग्रहाय वक्तुमुपक्रमते—

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डलम् ।
भाव्यद्वर्णपदक्रमेरिततमः सप्तस्वराश्वैर्विय-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥ १ ॥

तस्मै परस्मै सर्वोत्कृष्टाय विश्वपूर्णादिकर्त्रे च । अत एव चाभावशान्तब्रह्मचित्रब्रह्मादिसर्वब्रह्मक्रोडीकर्त्रे ब्रह्मणे बृहते व्यापकाय बृंहणाय च विश्वकर्त्रे चिदात्मने नमः । देहादिप्रमातृताप्रशमनेन तदेवाविशामीत्यर्थः । यस्य ब्रह्मणः सम्बन्धि ऊर्ध्वमशेषविश्वाभेदात्मतया उत्कृष्टतया गीयते विमृश्यत इत्युद्गीथः प्रथमोन्मेषात्मशब्दब्रह्मरूपः प्रणवो ध्वनिः ।

देवतास्तुतिकर्मप्रधानसामर्ग्यजुर्वेदाख्या त्रय्येव शाखा प्रपञ्चक्रोडीकृत-समस्ताम्नायवाक्यैकवाक्यताव्याप्त्या मण्डलम्। अतश्चैतत्सर्वासां विद्यानां मन्त्रशास्त्रविज्ञानानां स्यन्दनमास्पदं प्रसवकारणं च कर्मभूतं च वियत्परा-काशमुन्नयन्नुल्लासयंस्तन्मयत्वमापादयन्निव पुरः प्रथममरुणतयाऽतिदीप्त-त्वेनोदितः स्वयमुन्मिषितः। वियन्मयस्याप्यस्य दीप्तस्योन्मेषावष्टम्भ-पुरःसरं तथा स्फुरणादुन्नयन्निवेत्युक्तम्। एतच्च त्रयीमण्डलं भास्वद्भिः प्रोद्गीथारुणिम्ना स्फुरितैर्वर्णपदक्रमैरक्षरवाचकतदानुपूर्वीभिरीरितं ध्वस्तं तमोऽज्ञानं येन तादृक्। उच्चारणपदार्थवाक्यार्थप्रतिपत्तिषु परमचिदभेद-विश्रान्तिदमित्यर्थः। केन वियदुन्नयन्। सप्त ये स्वराः स्वयं राजमाना विश्वाक्षेपिणो वर्णाः पश्यन्त्यादिप्रवर्तनप्राणितकल्पाः षड्जादिध्वनि-विमर्शास्त एव सर्वत्राशुसंचारित्वादश्वास्तैः। यस्य ब्रह्मणः कीदृशस्य। गोपतेः परादिवाक्प्रभोर्मरीचिचक्रेश्वरस्य च। अत एव शब्दार्थत्वेन नाना-लौकिकेतरशब्दतदर्थतत्संबन्धैर्विचित्रतया वर्तमानं स्वातन्त्र्यादेतद्वैचित्र्या-भासात्म यत्परं ज्योतिः शाक्तं वीर्यं तेन च रुग्दीप्तिर्यस्य। बाह्यस्यापि सूर्यस्य "ज्ञानशक्तिः परा ह्येषा तपत्यादित्यविग्रहा" इत्याम्नायनीत्या परब्रह्मप्रतिबिम्बकल्पस्य प्रणवव्याप्तिकोऽरुणः पूर्वमुदितः। त्रयीव्याप्तिकं मण्डलमितरविद्याव्याप्तिकं स्यन्दनं च कर्मभास्वद्वर्णैः पदक्रमैर्देदीप्यमान-चरणविन्यासैरीरिततमसो ये सप्तस्वरव्याप्तिका अश्वास्तैर्वियदुत्क्षिपति। अथ च विचित्रवाच्यवाचकात्मजगद्वृत्तेश्चिच्चक्रेश्वरस्योद्गीथः शक्त्य-ङ्कुरोन्मेषो दीप्तो ब्रह्मविष्णुरुद्रजाग्रत्स्वप्नसुषुप्तिब्रह्ममूलमायाण्डादि-त्रयीमण्डलम्। वियद्व्यापकम्। "वेदनानादिधर्मस्य परमात्मत्वबोधना" इत्याद्याम्नायनिरुक्तोन्मनाशक्त्याख्या विद्यास्यन्दनं स्वरैर्विचित्रैर्मन्त्रैर्ध्वनि-भिरुन्नयन्निव प्रथममुदितः। किं कृत्वा? भास्वतां वर्णानामाकारादि-मात्राणां पदानां बिन्द्वादिविश्रान्तीनां क्रमेण परिपाट्या ईरितं तमः समनान्तं पाशजालं यत्र ॥ १ ॥

एवं सामान्यव्याप्त्या परमार्कं स्तुत्वा देहस्थमध्यनाडीव्याप्त्या स्तौति--

ओमित्यन्तर्नदति नियतं यः प्रतिप्राणि शब्दो
वाणी यस्मात् प्रसरति परा शब्दतन्मात्रगर्भा।
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ॥ २ ॥

तं परमादित्यं परब्रह्मस्वरूपमेव देहस्थितं मध्यनाडीगतप्राणब्रह्म-निविष्टम् आद्यं विश्वचित्रभित्तिभूतं शपदि प्रपद्ये अभिसन्धपवधानेन समाविशामि। कं तमित्याह—य ओमितिशब्दः क्रोडीकृताशेषशब्दनात्म-नादरूपो महाप्रणवः प्रतिप्राणि सर्वभूतेषु नियतमविच्छिन्नप्रवाहेणान्तर्नदति परावागात्मस्वरूपं विमृशन् स्थितः। यस्माच्च शब्दतन्मात्रगर्भा आसूत्रित-क्रमा आदिक्षान्तशब्दसामान्यमात्राऽविभागज्योतिर्मयी पराद्वितीया वाणी पश्यन्ती प्रसरत्युन्मिषति। यश्च मिथो ग्रासससक्तावन्योन्यकवलनपरौ समौ समानभूमिकारूढौ प्राणापानौ वहति। उदानवह्न्यात्मनिजमहा-ज्योतिर्मयौ करोति ॥ २ ॥

एवं महाव्याप्त्या सूक्ष्मव्याप्त्या चानवच्छिन्नं मध्यधामस्थं च निर्दा नुत्वा प्रपञ्चव्याप्त्यापि स्तौति—

यस्त्वक्चक्षुःश्रवणरसनाघ्राणपाण्यङ्घ्रिवाणी-
पायूपस्थस्थितिरपि मनोबुद्ध्यहङ्कारमूर्तिः।
तिष्ठत्यन्तर्बहिरपि जगद्भासयन् द्वादशात्मा
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ॥ ३ ॥

मृतानां वेद्यैकरूपतया शवप्रायाणामण्डानां देहप्राणादिपिण्डानाम-यमनुप्राणको मार्तण्डश्चिद्भानुस्तमेकमद्वितीयमपि प्रपञ्चव्याप्त्या सकलानां प्रमातॄणां सकलानि करणानि च त्रयोदशकरणानि च तेषामाधारमनुप्राण-कमविभिन्नमाश्रयं प्रपद्ये। यस्त्वगाद्यहङ्कारान्तस्वीकृतत्रयोदशेन्द्रियमूर्तिः। अतश्चान्तरहङ्कारात्मा वेदग्राहकरूपः बहिश्चाध्यवसायादिव्यापारबुद्ध्यादि-करणद्वादशात्मा ग्राह्यरूपं जगद्भासयंस्तिष्ठतीति स्थूलदृशार्थः। रहस्यदृशा तु गृहीतसर्वेन्द्रियमूर्तिरपि यः सृष्ट्यादिमरीचिचक्रचित्रसंचारचातुर्याद्-द्वादशात्मा एक एव चिदर्कोऽन्तर्बहिश्च जगत्कालानलादि व्योमकलान्तं विश्वं भासयंस्तुर्यधामात्मनिजभासा चक्रमयत्वमापादयन् सर्वकरणान्याधारतया निजौजोज्वलनज्वलितान्याश्रित्य स्थितस्तं प्रकर्षेण प्रपद्ये। निजव्युत्थानं साक्षात्कुर्वन् स्थितोऽस्मीत्यर्थः ॥ ३ ॥

प्रपञ्चव्याप्त्याखिलेन्द्रियाधारे स्तुतेऽपि भगवति प्रकाशविमर्शपरमार्थे तद्विमर्शप्रसरसरणिं वाणीं स्तौति—

या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानत्र प्रकटकरणैः प्राणसङ्गात् प्रसूतान् ।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥ ४ ॥

"अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥" इत्यादिना लक्षितां प्रथममादावुदितामुन्मिषितां तां स्वरूपज्योतीरूपां पश्यन्त्याख्यां तदनु तामेव बुद्धिसंस्थां बुद्ध्यभ्यासं प्राप्ताम्। "केवलं बुद्ध्युपादानात् क्रमरूपानुपातिनी। प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥" इत्यादिलक्षिताम् । मध्ये भव्रत्वान्मध्यमां मध्येऽन्तःकरणे वर्तमानाम्। तदनु वक्त्रे वदने करणेषु जिह्वामूलजिह्वा-मध्यमादिषु विशदां निर्मलाम्। "स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥" इत्यादिना लक्षिताम्। विखरे शरीरे भवत्वात्तदाख्यां वाचं प्रपन्नोऽस्मि। कां तामित्याह—या सा मित्रावरुणसदनादग्नीषोममयात्मनः परावाक्प्रधानान्मध्यधाम्नोऽकारादीं-स्त्रिषष्टिं वर्णानुच्चरन्ती आसूत्रितक्रमतया भेदाभेदाभ्यां भेदेन च विमृशन्ती। केनोच्चरन्ती? प्रकटैरन्तर्मुखीभावेनाभिन्नस्फुटप्रकाशैकमध्यमाप्तैः करणैः सर्वेन्द्रियैः। कीदृशान् वर्णान्? प्राणसङ्गात् प्रसूतानुद्भूतान्। तत्र चिज्ज्योतिषि गुणीभूतसूक्ष्मप्राणसङ्गात् पश्यन्त्यां गुणीभूतचित्सूक्ष्मप्राण-सङ्गान्मध्यमायां स्थूलप्राणसङ्गाद्वैखर्यां वर्णा जायन्ते। ते च त्रिषष्टिः। तद्यथा——अ—इ—उ—ऋ—वर्णाश्चत्वारो ह्रस्वदीर्घप्लुतभेदा द्वादश लृकारस्य दीर्घो नास्तीति ह्रस्वप्लुतभेदाद् द्विविधः। संध्यक्षराणां ह्रस्वा न सन्तीति दीर्घप्लुतभेदादष्टविधाः। एवं स्वरा द्वाविंशतिः। कादयो मान्ताः पञ्च-विंशतिः स्पर्शाः। अन्तस्थाश्चत्वारः। ऊष्माणश्चत्वारः। कुं खुं गुं घुमिति यमाश्चत्वारः। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया अं अः ≍क ≍प इति चत्वारः। यथोक्तम्——

स्वरा द्वाविंशतिश्चैव स्पर्शानां पञ्चविंशतिः।
यादयः शादयश्चाष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ≍क ≍प इति पराश्रयौ।
त एते गदिता वर्णास्त्रिषष्टिरिह सूरिभिः ॥ इति।

मित्रः सूर्योऽन्तरशेषद्वैतप्लोषकारित्वादग्निः। वरुणो ह्लादाप्यायकारित्वात् सोमः। "वर्णानन्तः प्रकटकरणैः प्राणसङ्गात् प्रसूते" इति पाठान्तरे या परावाक्शक्तिर्मित्रावरुणसदनादुच्चरन्ती प्रमाणप्रमेयात्मकसूर्यचन्द्राश्रयेणात्माकाशादूर्ध्वं सरन्ती सर्वोत्तीर्णं निजं धाम प्रमातृरूपं स्रवन्ती अस्ति। सैवान्तः प्रकटैरन्तरेव स्फुटैरिन्द्रियैः कृत्वा त्रिषष्टिं वर्णान् प्राणसङ्गाद्धेतोः प्रसूते जनयतीत्यन्वयः। इन्द्रियाणां रूपाद्युपलब्ध्यानुमेयत्वाद् बहिः स्फुटत्वाभावेनान्तः प्रकटीवादः। एतदभिधेयपक्षे उच्चारणप्रसूत्योः क्रमेणानुवाद्यविधेयभावः ॥ ४ ॥

एवं वाक्प्रसरान्तं भगवन्तं स्तुत्वा मध्यमधामसाफल्यमर्थयते—

ऊर्ध्वाधःस्थान्यतनुभुवनान्यन्तरा संनिविष्टा
नानानाडिप्रसवगहना सर्वभूतान्तरस्था।
प्राणापानग्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ५ ॥

परमादित्यस्य चिद्भानोर्ब्रह्मनाडीरूपा या सेति दिव्या मूर्तिः समुच्छ्रिताकृतिर्नोऽस्माकं प्रसन्ना प्रशस्ता प्रशमितप्राणादिकालुष्या अत एव श्वेता चिदानन्दघनतया स्फुरन्ती अस्तु। कीदृशी सा? या ऊर्ध्वमधश्च स्थितानि अतनून्यनल्पानि अनाश्रितादिकालाग्न्यन्तभुवनेशनानाभुवनानि देहे बहिश्चान्तरा मध्ये संनिविष्टा व्याप्यावस्थिता। तथा नानानाडीनां चक्षुरादिरोमरन्ध्रान्तानां सुषिराणां प्रसवेन स्फारेण गहना सर्वैर्दुष्प्रापा। सर्वेषां स्थावरादिदेवयोनिभेदान्तानां भूतानामन्तरस्था देहमध्ये वर्तमाना। यतश्चोक्तयुक्त्या गहना अत एव कैश्चिदेव प्राणापानयोः सर्ववाहप्रसवप्रवेशयोर्ग्रसननिरतैर्भक्षणप्रगल्भैः प्राप्यते समाविश्यते ॥ ५ ॥

किञ्च—

न ब्रह्माण्डव्यवहितपथा नातिशीतोष्णरूपा
नो वा नक्तंदिवगममितातापनीयापराहुः।
वैकुण्ठीया तनुरिव रवे राजते मण्डलस्था
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ६ ॥

ब्रह्मणो ब्रह्मबिलावरणनिविष्टस्याण्डं गर्भीकृतभूमूलमायाण्डप्रपञ्च
शक्त्यण्डं तेन न व्यवहिता अपि तु समन्ततः क्रोडीकारी पन्थाः प्रसरमा
यस्याः, तथा अतिशीतः सोमः, यत्युष्णो वह्निः, इयं तु द्वैतदाहाददद्वैतानन्
स्यन्दित्वाच्च नैवंरूपा । अपि तु समरसीभूताग्नीषोमात्मा । तथा नक्तंदि
रात्रिदिनं यो गमो भ्रमणं तेन नो इता प्रमेयभावं न प्राप्ता तद्वती । ता
अतापनीया परमाह्लादप्रदा । तथा अपगतो राहुराच्छादनप्रधानः शू
प्रमाता यस्याः सा । किञ्च, रवेश्चिद्भानोर्मण्डले रश्मिपरिवेषे रा
दीप्यते । बाह्यार्कमूर्तिस्तु ब्रह्माण्डव्यवहिता स्वर्लोकान्तमात्रावभासि
शिशिरग्रीष्मादावतिशीतोष्णरूपा अहर्निशं भ्रमन्ती सन्तापिका राह्वभि
चेति व्यतिरेकध्वनिः । वैकुण्ठस्य विष्णोर्मूर्तिरिवेत्युपमा । सापि च ब
वञ्चनावसरे ब्रह्माण्डे ब्रह्माण्डान्तर्निरुद्धमार्गा न केनचित् । अत एव ना
शीतोष्णरूपा । प्रकाशाह्लाददा भक्तानामित्यर्थः । नक्तंदिवगमेनाहोर
परिभ्रमणेन न मिता । देवादिभिर्नेयत्तया परिच्छिन्नेत्यर्थः । तापन
महाप्रतापवती । अपगतराहुरपक्रान्तरविमण्डला चेति श्लेषः । एव
मत्रोपमाश्लेषो व्यतिरेकध्वनिना संसृष्टः ॥ ६ ॥

अथ युगपदन्तर्बहिश्चार्कमूर्तिं स्तौति--

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद्बिन्दुरूपं
योगीन्द्राणां यदपि परमं भाति निर्वाणमार्गः ।
त्रय्याधारः प्रणव इति यन्मण्डलं चण्डरश्मे-
रन्तःसूक्ष्मं बहिरपि बृहन्मुक्तयेऽहं प्रपन्नः ॥ ७

तच्चण्डरश्मेश्चिद्दीप्तांशोर्मण्डलं मुक्तये समावेशात्मजीवन्मु
प्रपन्नोऽस्मि । कीदृशम् ? अन्तश्चिद्भुवि सूक्ष्ममाद्योन्मेषात्म । योगीन्
लभ्यम् । बहिरपि बृहन्महापरिमाणम् । यत्र सृष्टिस्थितिसंहारकारि
सत्त्वतमोनिविष्टब्रह्मविष्णुरुद्राभिधाय्यकारोकारमकाराख्यह्रस्वदीर्घप्लुत
त्रयात्मत्रिगुणवपुषि प्रणवे विश्ववेद्याविभागवेदनात्मा बिन्दुरिति त
लक्षितोन्मनान्ताप्रमेयपरिपाटीरूपं यस्य तादृग् ब्रह्म बृहद् बृंहकं च शास्त्र
आरूढमत्युत्कृष्टतया व्यवस्थितम् । यच्च परममसामान्यम् । योगीन्
मितयोग्यतिशायिपरतत्त्वैकभाजां निर्वाणमार्गो जीवन्मुक्त्युपायो
स्वप्रकाशतया स्फुरति । त्रय्याः प्राङ्निर्णीताया आधार आश्रयः । प्र
नूयते उत्कृष्टतया विमृश्यते परं पारमेश्वरं स्वरूपं येनेति कृत्वा

इत्येतन्नाम यत्। बाह्येऽप्यर्कमण्डले "नवयोजनसाहस्रो विग्रहोऽर्कस्य मण्डलम्। त्रिगुणम्" इति स्वच्छन्दादिष्टनीत्या यत्र बिन्दुरूपमिति सितवर्तुलाकारं ब्रह्ममयं तदसामान्यं बिम्बमारूढम्। तच्च योगिनां निर्वाणमार्गः, तेषां हि सूर्यमण्डल भेदनस्य श्रवणात्। तथा वक्ष्यमाणदृशा सामर्ग्यजुर्मयसूर्यमण्डलाकृतित्वात् त्रय्याधारः। प्रकर्षेण नूयमानत्वात् प्रणवो विश्वशरीरत्वाच्च प्रणवः ॥ ७ ॥

यस्मिन् सोमः सुरपितृनरैरन्हवं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः।
यस्मिन् वेदा मधुनि सरघाकारवद्भान्ति चाग्रे
तच्चण्डांशोरमितममृतं मण्डलस्थं प्रपद्ये ॥ ८ ॥

चिद्भानोर्मण्डलस्थं मध्यधामनिविष्टं तत्परमानन्दरूपममितमनल्पममृतं प्रपद्ये समाश्रये। यत्रामृते सोमः सर्वो मेयवर्गः सुरादिभिः सर्वैः प्रमातृभिः प्रतिदिनं कलाग्रासयुक्त्या पीयमानत्वात् क्षीणः क्षीणः सन् पुनः पुनः प्रविशति हृद्विश्रान्त्यनन्तरं निमज्जति। यत एव मण्डलाद्भूयोऽपि वर्धतेऽभिव्यज्यते मेयरूपश्चन्द्रः। यस्मिंश्च वेदाः सर्वशास्त्राणि मधुनि माक्षिके सरघाणां मधुकरीणामाकार इवाग्रे भान्ति पुरः स्फुरन्ति। यथा सरघा माक्षिकं पराखिचत्य परिवृत्य सोल्लासमासते, तथा सर्वे वेदा वाक्यैकवाक्यतया परासञ्चित्य परिवृत्य सोल्लासमासते, तथा सर्वे वेदा वाक्यैकवाक्यतया पराद्वयममृतमामृश्य भ्राजन्ते। बाह्येऽपि सोमः कृष्णपक्षेषु पितृदेवनरग्रस्तकलापञ्चदशकोऽमावास्यायां सूर्यमण्डलं प्रविश्य वर्धते। वेदाश्चार्कज्योतिर्लग्ना आसते ॥ ८ ॥

एन्द्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण
क्रान्ताः सप्त प्रकटहरिणा येन पादेन लोकाः।
कृत्वा ध्वान्तं विगलितबलिव्यक्तिपाताललीनं
विश्वालोकः स जयति रविः सत्त्वमेवोर्ध्वरश्मिः ॥ ९ ॥

"यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते" इति स्थित्या ऊर्ध्वा विश्वोत्कृष्टा रश्मयो यस्य। अत एव सतां विद्यमानानामशेषाणां भावः सत्त्वं महाप्रकाशात्मरूपम्। तदेव तत्परमार्थः। ततश्च प्रकाशमानतया

प्रकाशात्मन्येव विश्वस्य मग्नत्वात् प्रकाशो विश्वालोकः स एव रवि-श्चिद्भानुर्जयति सर्वोत्कर्षेण वर्तते। येनैन्द्रीमाशां प्राच्योन्मेषदशां पृथुकवपुषा योगिगम्यसूक्ष्मशाक्तस्पन्दात्मना पूरयित्वा उन्मिषितप्राणादिसंकोचचित्प्राधा-न्योच्छलितां कृत्वा "शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः" इति-श्रीपूर्वादिष्टनीत्या शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकल-सकलाख्याः क्रमात्क्रमं प्राणीयतुटिस्था निजशक्तिसहिताः सप्तलोकाः "पादोऽस्य विश्वा भूतानि" इति स्थित्या पादेन निजांशमात्रेणाक्रान्ताः क्रोडीकृत्य स्वज्योतिर्मयीकृताः। कीदृशेन? प्रकटाः स्वात्माभासा रूपादि-विश्वहरणाद्धरयश्चक्षुरादिशक्तयो यस्य। तदुक्तं श्रुतौ—"युक्ता ह्यस्य हरयः शता दश" इति। निःसंख्यशक्तिरात्मेति ह्यस्यार्थः। कथं क्रान्ताः? ध्वान्त-मात्मन्यनात्मप्रतीत्यात्माज्ञानं विलगिता बलिरनात्मन्यात्माभिधायिनी व्यक्तिर्यस्य तादृक् पाताललीनं निःशेषप्रशमितं कृत्वा। बाह्येनाप्यर्केण सप्ता-श्वारूढेनैन्द्रीं दिशं सूक्ष्मरूपेणापूर्य भूरादिलोकाः पादेन मारीचिभिर्ध्वान्तं ध्वंसयित्वा क्रमेण क्रान्ताः। प्रकटहरिणा च नारायणेन विलगिता बल्या-ख्यस्य दानवेन्द्रस्य व्यक्तिर्यत्र तद्ध्वान्तं दानवकुलं पाताललीनं कृत्वा भूरादिलोकाश्चरणविन्यासक्रमेणाक्रान्ताः। किं कृत्वा? पृथुकवपुषा बाल-वामनशरीरेण इन्द्रादिदिगापूरणं कृत्वा। सोऽपि विश्वालोकः सत्त्वप्रधान-श्चेत्यत्र श्लेषालङ्कारः। श्लेषोपमाध्वनिसंसृष्टिरियम् ॥ ९ ॥

ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदन्तं
दृष्ट्वा चान्तः प्रणवमुखरं व्याहृती सम्यगुक्त्वा।
यत्तद्वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं
तद्भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये ॥ १० ॥

ब्रह्मणा प्रजापतिना वेदेषु प्रणवमुखरमोङ्कारोच्चारणपूर्वं तदित्यादि गायत्र्याः सवितुर्विश्वप्रसूतिहेतोश्चिदादित्यस्य यत्तत्किमपीत्यसामान्यं भर्ग इत्याख्या यस्य तत्परमं सर्वोत्कृष्टं धाम परिस्फुरत्तात्म शाक्तं तेजो बाह्य-सूर्यसोमवह्न्यादिधामक्रोडीकारित्वाद्धामगर्भं वरेण्यमनुग्रहकारि उ... तत्प्रपद्ये समाविशामि। किं कृत्वा ब्रह्मणोक्तम्? किं कृत्वा च प्रपद्ये? प्रथममादावतनु अशरीरं श्रीभर्गशिखादिष्टनीत्या अकारपरामर्शात्म वी... श्वराख्यं च ब्रह्म बृहद् बृंहकं च परं शाक्तं धाम प्राणमूले अप्राणाद्यस्फु... त्ताधाम्नि ध्यात्वा विचिन्त्यानन्तरं नदन्तमिति नादाख्यं परविमर्शात्मा...

मन्तरित्युक्तशाक्तरूपप्राणितकलनतया स्थितं दृष्ट्वा स्वात्मतया साक्षात्कृत्य तन्नादविमर्शानुप्रवेशावष्टम्भवलोन्मिषत्प्रणवोच्चारणपूर्वम्। तथा 'भूः स्वाहा' 'भुवः स्वाहा' 'स्वः स्वाहा' 'भुर्भुवःस्वः स्वाहा' इति च मन्त्ररूपा समग्रमेयमानप्रमातॄणां ससंस्काराणां परब्रह्ममयत्वामर्शिनीर्व्याहृतीश्चतस्रः सम्यगित्यन्तरामर्शावष्टम्भाशैथिल्येनोक्त्वा उच्चार्य। अथ च "सर्वव्यवहारानेकरूपाः कथा जपः" इति शिवसूत्रादिष्टनीत्या तदभेदामर्शप्रधानतया परशाक्तरसप्लावितान् संपाद्य। शाक्तधामैकाग्र्यव्रशासादितशाम्भवधामावष्टम्भबलेन व्युत्थानदशामपि तदभेदरसप्रोक्षितां विधायेत्यर्थः। धामगर्भमित्यत्र धामशब्दस्तन्त्रेण द्विरुक्तः। तथा प्रणवमुखरमिति॥ १०॥

त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्विनाशाय युक्तः।
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
विद्योपायः पर इति बुधैर्गीयते खल्वविद्या॥ ११॥

हे भगवन्, त्वां स्तुतिभिः स्तोष्यामीति स्तोतृस्तुत्यस्तुतिकल्पनात्मा यो मे भेदग्रह एषैव चिदद्वयाप्रथनात्माविद्या, तथापि तस्या अविद्यायाः सुतरामतिशयेन विनाशाय निःशेषोन्मूलनाय युक्तो नित्यसंबद्धस्त्वां स्तौम्येव देहादिप्रमातृतानिमज्जनेन सर्वोत्कृष्टतया सततं परामृशामि, न तु क्षणमप्युदासीन आसे। त्वामेव चिदर्कं स्तौमि न तु परिमितां काञ्चन देवताम्। कीदृशं त्वाम्? स्थूलं बाह्यप्राणार्करूपम्। सूक्ष्मं मध्यनाडीगतं प्राणब्रह्मरूपम्। परं चानवच्छिन्नं विश्वात्मचिदानन्दघनम्। तदिति प्राक्तनवाक्यव्यावर्णितमेकमेव। नित्योदितं च। वाशब्दश्चार्थे। युक्तं चैतत्। यतो बुधैस्तत्त्वज्ञैरविद्यैव विद्योपायः पर इत्युक्तः। स्तोत्रस्तुत्यादिविभागकल्पनात्माविद्यया समस्ताविद्याबीजदेहादिप्रमातृत्वाभिमानप्रशमनेन चिदानन्दघनपरमात्मोत्कर्षपरामर्शात्मा स्तुतिः परमसमावेशप्रदेत्यर्थः॥ ११॥

स्तौम्येवेत्युक्तिं प्रपञ्चयति—

योऽनाद्यन्तोऽप्यतनुरगुणोऽणोरणीयान् महीयान्
विश्वाकारः सगुण इति वा कल्पनाकल्पिताङ्गः।
नानाभूतप्रकृतिविकृतीर्दर्शयन् भाति यो वा
तस्मै तस्मै भवतु परमादित्य नित्यं नमस्ते॥१२॥

हे परमादित्य चिदर्क, तस्मै तस्मै इति परसूक्ष्मस्थूलरूपाय विश्वात्मने तुभ्यं नित्यं नमः। सर्वकालं देहादिप्रह्वतया परामृशंस्त्वामेव समाविशामीत्यर्थः। कीदृशाय तस्मै ? यो अनाद्यन्तो देशकालाद्यनवच्छिन्नः। अतनुराकारानियन्त्रितः। अतश्च सार्वज्ञादिगुणास्पृष्टः। अणोरत्यन्तसूक्ष्मरूपतया योगिदृश्यात् परमाणोरप्यणीयानतिसूक्ष्मः न कस्यापि वेद्यः। अपि तु स्वप्रकाशचिदेकरूपः। न तु देशतः संकुचितः। परमाणोः सूक्ष्मस्य वेद्यत्वाद् दृश्यत्वाच्च। महीयान् व्यापकः। अतश्च विश्वक्रोडीकारित्वाद्विश्वाकारः। सार्वज्ञादिगुणयोगात् सगुणः। इत्येवंप्रकारया कल्पनया कल्पितानि पृथक्पृथगुल्लिखितान्यङ्गानि तत्तद्धर्मरूपा अवयवभागा यस्य तादृग् वेत्यनयोक्त्याऽवच्छिन्नवस्तुविषयशब्दविकल्पासंस्पृष्टं परमेकं स्वरूपमनवच्छिन्नमिति ध्वनयति। नानाभूतानि विचित्राः स्थावरादिब्रह्माण्डान्ताः प्राणिनस्तेषां प्रकृतीर्मायाप्रकृतिशुक्रशोणितादिकारणानि, विकृतीः कलाबुद्धिदेहादिकान् दर्शयन् य आभाति। संकुचितसर्वाभासोल्लासकतया वा यः स्फुरतीत्यर्थः॥ १२॥

तत्त्वाख्याने त्वयि मुनिजना नेति नेति ब्रुवन्तः
श्रान्ताः सम्यक् त्वमिति न च तैरीदृशो वेति चोक्तः।
तस्मात्तुभ्यं नम इति वचोमात्रमेवास्मि वच्मि
प्रायो यस्मात्प्रसरतितरां भारती ज्ञानगर्भा॥ १३॥

यस्मात्त्वत्तो भारती पश्यन्त्यादिवाक् ज्ञानगर्भा स्वावभाससंवित्प्रधाना प्रसरति तस्मै तुभ्यं नम इति वचोमात्रमेव, न त्वतिरिक्तं स्तुतिवाक्यादि वच्मि। ज्ञानस्य सर्ववाक्प्रसरहेतोरनवच्छिन्नस्य विभिन्नस्तुतिवाग्भिः स्तोतुमशक्यत्वात्। नमःशब्देन तु देहादिप्रह्वतां तुरीयकस्वचित्कर्षपरामर्शनस्य कर्तुं शक्यत्वात्। युक्तं चैतत्। यस्मान्मुनयोऽपि त्वयि त्वद्विषये तत्त्वाख्याने अणुर्न महान् न ह्रस्वं दीर्घं नेत्यादि ब्रुवन्तः श्रान्ताः क्लिष्टाः। न च तैस्त्वमित्येवंविधोऽसीति एतादृशो वेति एतत्तुल्यो वेति सम्यगुक्तः। वागगोचरत्वादेवेत्यर्थः॥ १३॥

सर्वाङ्गीणः सकलवपुषामन्तरे योऽन्तरात्मा
तिष्ठन् काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः।
यश्च प्राणारणिषु नियतैर्मथ्यमानासु सद्भि-
र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते॥ १४॥

हे परमादित्य चिदर्क, तस्मै निर्विशेषाय ते तुभ्यं नमः। यस्त्वं स्थावरादिदेवयोन्यन्तानां रुद्रक्षेत्रज्ञानां च सर्वेषां सर्वाङ्गेषु भवो व्यापकः सकलवपुषामन्तरे मितग्राहकात्मनि स्वरूपे योऽन्तरात्मा परमानन्दत्वात् "आत्मा चैवान्तरात्मा च" इति श्रीस्वच्छन्दादिष्टपुर्यष्टकप्रमाता तिष्ठन्नवस्थास्नुरपि युक्त्या योगेन शून्यैरपि न दृश्यसे। यथा काष्ठेऽग्निस्तिष्ठन्नपि युक्तिशून्यैररणिमथनानभिज्ञैर्न दृश्यते तत्काष्ठकवलीकारिज्वलद्रूपतया नोपलभ्यते। यश्च त्वं प्राणारणिषु सर्ववाहमार्गोदयविश्रान्तिपदेषु सद्भिर्योगिभिर्नियतैरभियुक्तैर्मथ्यमानासु—"ऊर्ध्वशक्तिनिपाताच्च अधःशक्तिनिकुञ्चनात्। रुद्रशक्तिसमावेशं यो जानाति स पण्डितः॥" इत्याम्नायादिष्टयुक्त्याऽनवरतान्दोलनतः प्रशमितमरुद्व्यापिकासु दृश्यं ज्योतिर्भवसि स्वप्रकाशचिद्रूपः स्फुरसि। अत्र पर्यायेण प्राणापानावूर्ध्वाधरारणिरूपौ। योगिप्रयत्नो मथनकाष्ठम्॥ १४॥

स्तोता स्तुत्यः स्तुतिरिति भवान् कर्तृकर्मक्रियात्मा
क्रीडत्येकस्तव नुतिविधावस्वतन्त्रस्ततोऽहम्।
यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं
त्वत्तो ह्यन्यत्किमिव जगतां विद्यते तन्मृषा स्यात्॥१५॥

हे गोपते चिन्मरीचिचक्रेश्वर, भवानेकोऽद्वितीयः स्तोत्रादिरूपतया क्रीडति स्वस्वातन्त्र्यात्तत्तद्रूपतया स्फुरति। यदुक्तं मयैव भैरवानुकरणस्तोत्रे—"स्तोता स्तुत्यः स्तुतिरिति यदपि विभिन्नं न किञ्चिदस्तीह। मृशसि यथा यद्रूपं चिद्रूपतया भवस्येतत्॥" इति। यतोऽहमिति भवत्कल्पितमेव। ततोऽहमिति संकोचप्रधानो मायाप्रमाता त्वत्स्तोत्रकरणेऽस्वतन्त्रस्त्वामेव चिदात्मानं स्तौमि। न त्वहं नामान्यः कश्चिदित्यर्थः। यच्च किञ्चित्त्वदात्मैवाहं प्रणयसुभगं प्रार्थनासुन्दरं वच्मि तत्सर्वं तथ्यं त्वत्परमार्थमेव। यतस्त्वत्तश्चिदात्मनो व्यतिरिक्तं जगतां किमिव विद्यते? न किञ्चिदस्ति। यदि वा तथापि किञ्चित्संकल्प्यते तन्मृषा स्यात्। नैव भवेत्। चिदात्मतां विना कस्यचिदपि चेतना चेति तस्य संकल्पविकल्पविषयत्वस्याप्ययोगेन गगनकुसुमतोऽपि निकृष्टत्वात्। इत्थं युक्तितस्त्वदभेदसारैव स्तुतिः॥ १५॥

प्रातीतिकक्रमेण तु यद्यपि भेदस्तथापीत्थं त्वमाराध्योऽस्माकमित्याह—

ज्ञानं नान्तःकरणरहितं विद्यतेऽस्मद्विधानां
त्वं चात्यन्तं सकलकरणागोचरत्वादचिन्त्यः ।
ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-
स्तस्माद्भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः ॥ १६

ऐन्द्रियकज्ञानवतां मायाप्रमातॄणामस्माकमिन्द्रियागोचरो भ
चिन्त्यत्वाद्ध्यानविषयो न भवतीति देहादिमितप्रमातृतामज्जनोन्म
चिदर्कभजनात्मकभक्तियोगसंपादनीयत्वद्भगवतो भक्तिमेव शाक्तस्फार
मयामृतप्राप्तयेऽस्म्याश्रितः । उक्तं च विज्ञानभैरवे––"भक्त्युद्रेकाद्विर
यादृशी जायते दशा । सा शक्तिः शाङ्करी नित्यं भावयेत्तां ततः शिव
इति ॥ १६ ॥

हार्दं हन्ति प्रथममुदिता या तमःसंश्रितानां
सत्त्वोद्रेकात्तदनु च रजः कर्मयोगक्रमेण ।
स्वभ्यस्ता च प्रथयतितरां सत्त्वमेव प्रपन्ना
निर्वाणाय व्रजति शमिनां तेऽर्क भक्तित्रयीव ॥ १

हे अर्क, तव भक्तिः प्रपन्ना समाश्रिता सती शमिनां शान्तरा
कलङ्कानां निर्वाणाय मोक्षाय व्रजति जीवच्छिवत्वाभिव्यक्तये घटते ।
यथा । सापि हि काम्यकर्म परिहृत्यानुष्ठीयमाना त्रय्यन्तविदामपवर्ग
तथा चैषा प्रथममुदिता समुन्मिषितमात्रा हार्दं प्रकाशानन्दात्म
तमस्त्वभेदाख्यातिरूपमाणवं मलं संश्रितानां भक्तिभाजां हन्ति नाश
तदनु सत्त्वस्य प्रकाशस्योद्रेकात्प्रकर्षात्कर्मयोगक्रमेण स्वात्मदेवताविश्र
फलशारीरकर्मानुष्ठानेन कार्ममलरूपं रजो हन्ति । तथा सुष्ठु अ
परिशीलनेन स्वीकृता सतो भावः सत्त्वं प्रकाशैकघनत्वमेव प्रका
सर्वत्र प्रथयतितराम् । न तु पशुवन्मायीयमलात्मभिन्नवेद्यप्रथाकृत् ।
त्रय्यन्तविदां तन्निष्ठानां सत्त्वं प्रथयति ॥ १७ ॥

तमासाद्य श्रियमिव गृहे कामधेनुं प्रवासे
ध्वान्ते भाति धृतिमिव वने योजने ब्रह्मनाडिम् ।
नावं चास्मिन् विषमविषयग्राहसंसारसिन्धौ
गच्छेयं ते परमममृतं यत्र शीतं न चोष्णम् ॥

तां भक्तिमाश्रित्य चिदर्कस्य ते सम्बन्धि परमममृतं परं शाक्तं धाम गच्छेयं समाविशयेम्। यच्छैशिरग्रैष्मबाह्यर्कधामवैलक्षण्याच्छीतमुष्णं च न भवति। अपि तु गोळदाहप्रकाशाह्लादकृदग्नीषोमात्म। कीदृशीं ताम्? गृहे शून्ये वेश्मनि श्रियमिव। सम्पूर्णभोगप्रदत्वात्। प्रवासे रिक्तबन्धुदेशे कामधेनुमिव चिन्तितमात्राभीष्टफलप्रदत्वात्। ध्वान्ते गाढतमसि भातिमिव। पूर्णप्रथाहेतुत्वात्। वने गहनपर्वतादौ धृतिमिव। विश्रान्तिहेतुत्वात्। योजने परशिवात्मैक्यावेशे ब्रह्मनाडिं सुषुम्णाम्। परमोपायत्वात्। विषमविषया एव ग्राहा भीषणा जलचरा यत्र तादृशे संसारसमुद्रे नावमिव। उत्तारकत्वात्॥ १८॥

अग्नीषोमावखिलजगतः कारणं तौ मयूखैः
सर्गादाने सृजसि भगवन् ह्रासवृद्धिक्रमेण।
तावेवान्तर्विषुवति समौ जुह्वतामात्मवह्नौ
द्वावप्यस्तं नयसि युगपन्मुक्तये भक्तिभाजाम्॥१९॥

हे भगवन्, अखिलस्य बाह्यस्य नीलसुखादेर्ग्राह्यरूपस्यान्तरस्य च ग्राहकरूपस्य देहादेर्जगतो यावग्नीषोमौ सर्ववाहवाही प्राणोऽपानश्च प्रकाशतावस्थानहेतुत्वात्कारणम्। तौ प्रसिसृक्षाप्रविविक्षात्मसर्गादानसमये वस्त्वाभासनविमर्शात्मसृष्ट्यादौ तन्निमित्तं च ह्रासवृद्धिक्रमेण द्वादशषोडशकलाकलनपर्यायितो मयूखैः सृष्ट्यादि देव्यात्मनिजमरीचिभिः सृजसि मुहुर्मुहुर्निर्मिमीषे। तावेव च भक्तिभाजामन्तर्विषुवति सम्यङ्नयनात्मसमानमरुत्प्रधाने कुम्भके समौ सोमसूर्यकलान्योन्यसंघर्षमिश्रितौ सन्तावात्मवह्नावुदानवह्नौ जुह्वतां मुक्तये शिवात्मभेदप्रथारूपाणवादिमलत्रयप्लुष्टोपलक्षितशिवाद्वैतप्राप्तये द्वावपि युगपत्क्रमं मयूखैरवास्तं नयसि विश्वात्मकव्यानव्याप्तिमाविश्य ज्ञानक्रियात्मपराग्नीषोमरूपस्वात्ममयौ संपादयसि॥१९॥

स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं ह्यनन्तं
सूक्ष्मत्वं वा तदपि सदसद्व्यक्त्यभावादचिन्त्यम्।
ध्यायामीत्थं कथमविदितं त्वामनाद्यन्तमन्त-
स्तस्मादर्क प्रणयिनि मयि स्वात्मनैव प्रसीद॥ २०॥

हे अर्क, ते देव स्थूलत्वं विश्वव्यापकत्वं प्रकृत्या गहनत्वान्नैव लक्षयितुं शक्यम्। यस्मादनन्तं दिक्कालाकारैरनवच्छिन्नम्। सूक्ष्मत्वमपि वा

"अणोरणीयात्" इत्येतद्व्याख्यानावसरप्राक्तयुक्त्या परप्रमात्रात्मा यत्तदपि सदसद्व्यक्त्यभावाद्भावाभावरूपत्वेनाप्रतीतेरचिन्त्यम्। तदित्थमनाद्यन्तत्वादविदितं त्वां कथमन्तःस्त्रान्ते चिन्तयामि न कथञ्चित्। तस्मान्मयि प्रणयिनि त्वत्प्रार्थनावहिते स्वयमेव प्रसीद प्रशमितदेहादिप्रमातृताभिमानकालुष्यः प्रस्फुर ॥ २० ॥

यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमन्त-
स्तत्सद्व्यक्ति जिगमिषु शनैर्लाति मात्राकलाः खे ।
अव्यक्तेन प्रणववपुषा बिन्दुनादोदितं स-
च्छब्दब्रह्मोच्चरितकरणव्यञ्जितं वाचकं ते ॥ २१ ॥

यत्किमप्यसामान्यं त्वं तदन्तरित्यन्तर्मुखानवच्छिन्नप्रकाशात्मनि पदे। शब्दतत्त्वमिति "शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः" इति श्रीस्वच्छन्दादिष्टानाहतभट्टारकरूपम्। परममिति परमोत्कृष्टम्। यदुक्तं श्रीकालोत्तरे—"नादाख्यं यत्परं बीजम्" इति। वेद्यमिति सुप्रकटसुस्फुरत्तात्मकत्वादनपह्नवनीयम्। न तु विदिक्रियाकर्मात्मकम्। यदुक्तं श्रीस्वच्छन्दे—

यस्य रूपं शरीरं वा नास्ति वर्णः क्रिया तथा ।
स कथं गृह्यते सूक्ष्मो ह्यग्राह्यो नित्यमव्ययः ॥ इति ।

श्रीभर्गशिखायामपि—

नैष वर्णो न वा शब्दो न चैवायं कलात्मकः ।
केवलः परमानन्दो वीरो नित्योदितो रविः ॥
नास्तमेति न चोदेति न शान्तो न विकारवान् ।
सर्वभूतान्तरचरो भानुर्भर्ग इति स्मृतः ॥ इति ।

तदेतत्परब्रह्मात्मशक्तिमद्रूपम्। सद्व्यक्ति जिगमिष्विति। "ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति स्थित्या शक्त्यात्मब्रह्मरूपतां जिघृक्षु खे सुषुम्णाधाम्नि अकारोकारमकारादिमात्रारूपाः कला विमर्शशक्तीः शनैः शनैः क्रमेण लाति गृह्णाति। इत्थं शक्तिमच्चिदर्कावभासितशब्दब्रह्मभित्तौ प्रणववपुषा ॐकारात्मना अव्यक्तेन पश्यन्तीवाक्प्रधानेन रूपेण न तु व्यक्तेन मध्यमादिवाग्भूमिकास्पृशा। "प्रणवः सर्वभेदेषु" इति स्थित्या क्रोडीकृताशेषवाच्यवाचकस्फारं शब्दब्रह्मोच्चरति स्वयं प्रवर्तते। न

तूच्चार्यते । कीदृक् ? बिन्दुनादाभ्यां समस्तवेद्याभेदिवेदनसमस्तवाचकाभेदि-परामर्शरूपाभ्यामुदितम् । सर्वोत्कृष्टगगनारूढं सत्कथं समुच्चरति अत्रागमिकीं युक्तिं स्मारयति—करणेन दिव्यकरणबन्धेन न तु जिह्वामूलमध्यादिना व्यञ्जितं प्रकटीकृतम् । यदुक्तं श्रीस्वच्छन्दे—

"दिव्यं तु करणं कृत्वा तत्त्वस्योच्चारणं कुरु" इत्यादि ।

यच्चैतच्छब्दब्रह्मतत्त्वशक्तिस्वरूपामर्शनमुखेनैव ते वाचकं तत्स्वरूपामर्शकम् ॥ २१ ॥

प्रातः सन्ध्यारुणकिरणभागृङ्मयं राजसं यन्मध्ये

चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा ।

सायं सामास्तमितकिरणं यत्तमोल्लासिरूपं

साह्नः सर्गस्थितिलयविधावाकृतिस्ते त्रयीव ॥ २२ ॥

हे भगवंश्चिदर्क, अह्नः सार्वजनीनस्य प्राणदिनस्य सर्गस्थितिलयविधौ ते सम्बन्धिनी सा कृतिः क्रोडीकृताशेषसृष्ट्यादिस्तुर्याख्या शक्तिर्विजृम्भत इत्यर्थः । का सा इत्याह—प्रातः हृदुन्मेषात्मनि प्रभाते गुणीभूतप्राणापानवृत्तिः शिवशक्तिसंघट्टात्मा या सन्ध्या तत्र येऽरुणकिरणा अनुन्मिषितवैचित्र्याद्दीप्ताः शरीरादयश्चक्षुरादिप्रकाशास्तान् भजते यदत एव राजसं विश्वराजानं विश्वप्रसरासूत्रणं च ऋङ्मयम् । यच्च परधामामर्शनात्मा स्तुतिकृच्च मध्ये मध्यधाम्नि यजुश्चिद्देवतापूजात्मक्रियाशक्तिप्रधानम् । द्वैतेन्धनप्लोषादिव ज्वलत् । ह्लादात्मसोमव्याप्त्युन्मज्जनाच्छुक्लभाः अमलमात्मभाःस्वरूपम् । सात्त्विकं च सतां भावः सत्त्वं प्रकाशमानत्वं तस्येदं सम्पादकम् । स्वप्रकाशावेशेन विश्वप्रकाशकमित्यर्थः । सायमूर्ध्वतुर्यार्धेऽस्तमितकिरणं गलितप्राणादिसंस्कारक्षयात् प्रशान्तसितोज्ज्वलितमरीचिनिचयम् । अतश्च निःसंस्कारद्वंदाद्वैतकवलनात्तदपेक्षयैव तमोवस्तुविश्रान्त्यैकरसत्वात् साम । एतत्त्रिविधं स्थूलसूक्ष्मपरस्वरूपं यल्लासि गृह्लासि सा तवाकृतिस्त्रयीव ऋग्यजुःसामानीव । तथाहि—प्रातरर्कदेवतास्तुतिप्रधाना ऋग्वेदव्याप्तिः । मध्ये कर्मानुष्ठानात्मा यजुर्वेदोदयः । सायं विश्रान्तिहेतुगीतप्रधाना सामवेदप्रधानतेति प्रतिदिनं स्थितिः ॥ २२ ॥

ये पातालोदधिमुनिनगद्वीपलोकाधिबीज-
च्छन्दोभूतस्वरमुखनदत्सप्तसप्तिः प्रपन्नाः ।
ये चैकाश्वं निरवयववाग्भावमात्राधिरूढं
ते त्वामेव स्वरगुणकलावर्जितं यान्त्यनश्वम् ।। २३ ।।

अतलादीनि सप्त पातालानि । क्षीराद्याः सप्तोदधयः । अत्र्याद्याः सप्त मुनयः । महेन्द्राद्याः सप्त पर्वताः । जम्ब्वादीनि सप्त द्वीपानि । भूराद्याः सप्त लोकाः ।

मोहो मदश्च गर्वश्च विषादः क्रोध एव च ।
भयं च हर्षणं चैव देहे सप्ताधयः स्मृताः ॥

इत्युक्ता मोहाद्याः सप्ताधयः । यवादीनि सप्तबीजानि । गायत्र्यादीनि सप्तच्छन्दांसि । भूताः प्राप्ताः । एतदामाशत्वात् । ईदृग्विश्वप्रपञ्चरूपा ये षड्जाद्याः सप्त स्वरास्ते मुखेषु येषां ते तन्मुखास्तानेवार्थान्नदन्तो ध्वनन्तः सप्त सप्तयो मनोबुद्धीन्द्रियात्मानोऽश्वा यस्य तादृशं त्वां प्रपन्नाः । ये च विरवयवा वाक् पश्यन्ती तस्या भावः सत्ता तन्मात्राधिरूढं मध्यधामोन्मिषत्पश्यन्त्यामर्शपरिमर्शितम् । अतश्चैकाश्वं च त्वां बुद्ध्वा ये प्रपन्नाः, उभयेऽपि ते त्वामेवानश्वं चिदर्कं परं ब्रह्म यान्ति त्वदेकतामाप्नुवन्ति । कीदृशम्? स्वरैः षड्जादिभिः गुणैः सत्त्वादिभिः कलाभिरकारादिभिर्वर्जितं निरुपाधिप्रकाशानन्दघनम् । साश्वोपासनानश्वप्राप्तिहेतुरिति विरोधाभासः ॥ २३ ॥

दिव्यं ज्योतिः सलिलपवनैः पूरयित्वा त्रिलोकी-
मेकीभूतं पुनरपि च तत्सारमादाय गोभिः ।
अन्तर्लीनो विशसि वसुधां तद्गतः सूयसेऽन्नं
तच्च प्राणास्त्वमिति जगतां प्राणभृत् सूर्य आत्मा ।। २४ ।।

हे भगवन्, त्वं ज्योतिःसलिलपवनैश्चित्प्रकाशकरन्ध्रप्रविशच्छाक्तामृतप्राणमरुद्भिस्त्रिलोकीं जागरस्वप्नसुषुप्तित्रयीं पूरयित्वा तस्यामेव त्रिलोक्यामेकीभूतं सामरस्यं प्राप्तं दिव्यं सारं तुर्यानन्दघनं गोभिरनुत्तरैर्मरीचिभिः पुनरिति पुनः पुनरादाय चमत्कृत्य अन्तरिति अन्तर्मुखे पदे लीनो वसुधां परां भूमिं विशसि तन्मयतया स्फुरसि तद्गतश्चान्नमदनविषयं

वेद्यजातं सूयसे आश्यानीभूय तद्रूपतया स्फुरसि। तच्चान्नं प्राणापानावस्थितिहेतुस्त्वमेव न त्वन्यत् किञ्चिदिति। अनया युक्त्या सूर्यः प्राणभृदात्मा च कथ्यसे। यदाह श्रुतिः—"अहमन्नमहमन्नादोऽहमन्नादश्च" इति। बाह्योऽपि सूर्यो भूर्भुवःस्वस्त्रयीं ज्योतिःसलिलपवनैस्तत्र तत्र समयं आपूर्य समरसीभूतं दिव्यं त्रिलोक्यां रसरूपं सारं रश्मिभिर्ग्रीष्मादावादाय पुनरपि भूमिमन्तस्तापनयुक्त्या लीनः सन् विशति। तद्गतश्चान्नमौषध्याख्यं प्राणावस्थिहेतुं जनयति। ततः स एवान्नमन्नदोऽन्नादश्च ॥ २४ ॥

अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे।
धर्माधर्मौ सदसदुभयं योऽन्तरावेश्य योगी
वर्तेतात्मन्युपरतमतिर्निर्गुणं त्वां विशेत् सः ॥ २५ ॥

यो योगी नित्यौ सततवाहिनौ प्राणापानावेव कवलनाप्यायनहेतुत्वादग्नीषोमौ ज्ञानक्रियाशक्तिप्राधान्यात् प्रकृतिपुरुषौ वेदनविमर्शत्वाद् बिन्दुनादौ प्रसरविश्रान्तिपदत्वाद् दिननिशे विकाससंकोचनिमित्तत्वात् सत्यानृते ऊर्ध्वाधोगतिकारणत्वात् धर्माधर्मौ बाह्यानां सत्तासत्तयोर्ज्ञापकत्वात् सदसदुभयमन्तरुदानधाम्नि आवेश्य विलाप्यात्मनि चिद्धाम्नि वर्तेतावतिष्ठेत स त्वां निर्गुणं सत्त्वादिगुणातीतं परमादित्यं विशत्येव ॥ २५ ॥

गर्भाधानप्रसवविधये सुप्तयोरिन्दुभासा
सापत्न्येनाभिमुखमिव खे कान्तयोर्मध्यसंस्थः।
द्यावापृथव्योर्वदनकमले गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन् षड्रसास्वादलोलः ॥ २६ ॥

हे भगवंश्चिद्भानो! द्यावापृथ्व्योः सर्वद्वादशान्तात्मान्तरिक्षदेहभूम्योः कान्तयोर्निजविज्ञानेनैव रमणीयतां प्रापितयोर्वदनकमले शक्तिनलिने गोमुखैरनुत्तरैर्मरीचिभिर्बोधयित्वा विकास्य असामान्यशाक्तानन्दास्वादनलम्पटः सन् पर्यायेण विचित्रोन्मेषनिमेषक्रमैरापिबसि चमत्कुरुषे। कीदृशः? मध्यसंस्थोऽग्नीषोमाधिरूढः। किमर्थम्? गर्भे स्वान्तर्यदाधानं प्रक्षेपोऽर्थाद्विश्वस्य प्रसवस्तदौचित्येन भासनं तद्विधानार्थम्। कीदृश्योर्द्यावापृथिव्योः? खे शून्यप्रमातरि सुप्तयोः "कलोद्बलितमेतच्च चित्तत्त्वं

कर्तृतामयम्। अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितम्॥" इति नीत्या शून्यप्रधानताश्रयेण निमज्जितपारमार्थिकस्वरूपयोरभिमुखावस्थितयोः। कथं सुप्तयोः? सापत्न्येन परस्परप्रतियोगितयैवाभिमुखं कृत्वा। उभयानुकूलत्वादाभिमुख्यमाश्रित्येत्यर्थः। बाह्योऽप्यर्को द्यावापृथिव्यो रात्राबिन्दुभासा सुप्तयोर्मीलितस्वरूपयोरभिमुखावस्थितयोर्मध्ये गोभिर्वदननलिने विकास्य तदीयविचित्ररसास्वादलोल आपिबति भौमान्तरिक्षान् रसान्। गर्भाधानाय ग्रीष्मादौ कर्षण्यादिनिजरश्म्यन्तर्निवेशनाय। प्रावृडादौ च प्रसवाय वर्षण्यादिमरीचिविसर्गतो नानौषध्युप्तये। अथ च सापत्न्येनाभिमुखयोः सुप्तयोरिन्दुभासोपलक्षितयोः कर्पूरात्त्छुरितयोः कान्तयोर्मध्यसंस्थो नायको वैदग्ध्याद् गोमुखैर्वक्त्रपद्मे पर्यायेण युगपद् बोधयित्वा लोचनपरिचुम्बनपुरःसरमुन्निद्रे विधाय वक्त्रासवामृतलम्पटो गर्भस्याधानप्रसवनिमित्तमापिबति रतयेऽत्यर्थं परिचुम्बतीति श्लेषालङ्कारः श्लेषध्वनिसंसृष्टश्च॥ २६॥

सोमं पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवम्।
आमावश्यं विघसमिव खे तत्कलाशेषमश्नन्
ब्रह्माण्डान्तर्गृहपतिरिव स्वात्मयागं करोषि॥ २७॥

हे चिदर्क! ब्रह्मरन्ध्रावस्थितशाक्तब्रह्मोपलक्षितस्याण्डस्य अन्तरिति धरामूलमायाशक्त्यण्डचतुष्टयस्य मध्ये गृहे स्वात्मयागं करोषि। किं कृत्वा? सोमं रूपादिपञ्चदशात्मकमेयं तेजसा निजमरीचिविस्फुरणेन पूर्णामृतं चरुरिव साधयित्वा "एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता" इति कृत्वा विश्वात्मनिजशाक्तामृताभासमयं स्वसंनिविष्टं विधाय। अनल उदानवह्निर्मुखं प्राप्त्युपायो यस्य ब्रह्माद्यनाश्रितान्तकारणाधिष्ठितधरादिशिवतत्त्वान्ताध्वविस्फारमयस्य जगतस्तस्य तर्पणं यत्तदेव वैश्वदेवं यागं तेन सोमेन चरुणा विधाय तस्य सोमस्य कलाशेषं जगत्तर्पणोपयुक्तकलापञ्चदशावशिष्टमूर्ध्वतुट्यार्धाख्यामावस्यासम्बन्धि अमाख्यकलारूपं विघसमिव कवलिताशेषसंस्कारकल्पमिवाश्नन्।

अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः।
पिबन्ति च सुराः सर्वे दश पञ्च पराः कलाः॥
अमाशेषगुहान्तःस्थामावस्या विश्वतर्पिणी॥

इति श्रीकालिकाक्रमादिष्टनीत्या विश्वदेवता परमार्थे स्वात्मनि चमत्कुर्वन् । कीदृक् त्वम् ? गृहपतिरिव । सोऽपि हि पूर्णामृतकलामामावस्यं चरुं प्रसाध्य तेनाग्निप्रमुखसर्वजगत्तर्पणं वैश्वदेवं च कृत्वा तच्छेषमश्नन् स्वात्मदेवतायागं करोति । बाह्योऽपि सूर्यः स्वरश्मितापप्रद्रावितसोमकलापञ्चदशकेन देवर्षिनरात्मजगत्तर्पणं विधायामाख्यकलाचमत्करणात्मश्वात्मयागं ब्रह्माण्डस्यान्तर्विधत्ते ॥ २७ ॥

कृत्वा नक्तं दिनमिव जगद्बीजमाव्यक्तिकं यत्
तत्रैवान्तर्दिनकर तथा ब्राह्ममन्यत्ततोऽल्पम् ।
दैवं पित्र्यं क्रमपरिगतं मानुषं चाल्पमल्पं
कुर्वन् कुर्वन् कलयसि जगत् पञ्चधावर्तनाभिः ॥ २८ ॥

हे दिनकर विश्वोदयकारिदिवससंपादक चिद्भानो, जगतः सदाशिवान्तस्य विश्वस्य यद् बीजमारम्भावसानयोरुदयापवर्गकारणं श्रीस्वच्छन्दादिष्टविततपरार्धात्मकालरूपमहोरात्रं तत्कृत्वाभास्य तत्रैवान्तर्जगतः कलादिक्षित्यन्तस्याशुद्धाध्वरूपस्य बीजं मायेयमहोरात्रं तदन्तरप्याव्यक्तिकं प्राकृतं तदनन्तरपि ब्राह्मं तत्रापि दैवं तत्रापि पित्र्यं पितृसम्बन्धि तत्रापि मानुषं क्रमेणाल्पमल्पं कुर्वन् कुर्वन्निव वैचित्र्यसहस्रैराभासयन्निव जगद्विश्वं पञ्चाधावर्तनाभिर्विचित्रजागरादिदशापञ्चकपरावर्तनैः कलयसि अन्तरवस्थितं बहिः क्षिपसि । निर्मिमीषे निर्मितं च कलयसि । इदमित्थमिदमिदमिति संख्यानेन स्थापयसि । स्थापितमपि कलयसि अन्तःसंहरसि । संहृतमपि कलयसि संस्कारगालनेन विमृशसि । विमृष्टमपि कलयसि स्वात्माभेदेन जानीषे स्वप्रकाशैकात्म्यामापादयसि । तथा पुनरपि स्वरूपात् कलयसि नवं नवमुल्लासयसि । इत्येवं सर्गस्थितिसंहृतिविलापनस्वात्मैक्याभासनपरस्परान्दोलनलीलाक्रान्तं करोषि । अत्र जगद्बीजमावर्त्य द्विर्योज्यम् । अल्पमल्पमिति वीप्सायाम् । अयमाशयः—यद्यस्य यावदहोरात्रं तत्तदीये प्राणचारे तदंशांशकास्वपि वा श्रीस्वच्छन्दादिष्टमासोदयादिषष्ट्यब्दोदयान्तप्रक्रियया योगिज्ञानापेक्षयातिपरिमितमाभासयति भगवान्, तत्राप्यन्तर्विश्वैकात्म्यप्रथनात् सादाशिवान्तकालकलनामशेषामाभासयतीत्याभासमानोऽयं कालो । न त्वस्य वास्तवं किञ्चित्तत्वमस्ति । अत एव कुर्वन्निवेतीवशब्देनायमेवार्थः स्पष्टः । वस्तुतो ह्येतावद्विश्वोदयावस्थानविलापनाद्यात्मा परमेश्वर एवेति स्फुरति । न तु चिदेकवपु-

षस्ततोऽतिरिक्तं किमप्यस्ति । अत्र च मानुषाद्यहोरात्रप्रमाणं श्रीस्वच्छन्दे चोक्तम् । तद्यथा—

मुहूर्तास्तु तथा त्रिंशदहोरात्रस्तु मानुषः ।
दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम् ॥
पितॄणां तदहोरात्रमनेनाब्दं तु पूर्ववत् ।
एवं देवैस्त्वहोरात्रः........................... ॥ इति ।

यत्त्विह दैवं पित्र्यं पृथगुक्तं तत्पितृसम्बन्ध्यहोरात्रो ज्ञेयः । तेषां शुक्लकृष्णरूपो हि सः । किञ्च—

कल्पो ब्रह्मदिनं प्रोक्तं चतुर्युगसहस्रकम् ।
षट्त्रिंशत्तु सहस्राणि ब्रह्मणः प्रलयोद्भवः ॥
अव्यक्तस्थेषु रुद्रेषु दिनरात्रिश्च तावती ।
प्राधानिकपरार्धेन दशधा गुणितेन तु ।
माया संहरते सर्वं पुनश्चैव सृजेज्जगत् ॥ इति ।

तथा—

शक्तिर्कालपरार्धस्य कोटिधा गुणितस्य च ।
अनाश्रितस्य देवस्य दिनमेतत् प्रकीर्तितम् ॥

इत्येवमादि । तथैकत्र प्राणचारे घटिकोदयात् प्रभृति षष्ट्यब्दोदयान्तं विततं तत्रादिष्टं ग्रन्थगौरवभयान्न दर्शितम् । एवमहोरात्रकृत्त्वेन जगद्विपरिवर्तकत्वं भगवत उक्तम् ॥ २८ ॥

ये त्वहोरात्रप्रशमे रूढास्ते लोकोत्तरा एवेत्याह—

तत्त्वालोके तपन सुदिने ये परं संप्रबुद्धा
ये वा चित्तोपशमरजनीयोगनिद्रामुपेता ।
तेऽहोरात्रोपरमपरमानन्दसंध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यान्ति निर्वाणसंज्ञम् ॥ २९ ॥

हे तपन महाप्रकाशरूप, ये योगिनस्तत्त्वालोकात्मनि शोभनेऽनिशोदितेऽनस्तमिते दिने पारमार्थिके सर्वदशानुस्यूते सर्वतोमुखे चित्प्रकाशे सम्यक् प्राणायामाद्यायासं विना विमर्शयुक्त्या प्रबुद्धा गलिताख्यातितामिस्राः । ये चान्ये चित्तोपशम एव सर्वबाह्याभ्यासनिवृत्तिहेतुत्वाद् रजनी, तस्यां योगनिद्रामुपेताः । प्रशमितविकल्पसविकल्पप्रकाशैक्यमापन्नः ।

उभयेऽपि ते प्राग्वर्णितसमस्ताहोरात्रोपरम एव परमानन्दरूपाः सन्ध्या निमज्जत्प्राणापानव्याप्तिशिवसामरस्यभुवः सर्वतोदिक्कमुदितास्तासु सौरमिति प्राणीयमपरममिति स्थूलं ज्योतिः संकुचितं प्रकाशं भित्त्वा निःसंस्कारं विलाप्य परं निर्वाणमार्गं यान्ति सदा परं शाक्तं धामाश्लिष्यन्ते ॥ २९ ॥

न केवलां चित्रां कालकलनामकालकलितस्वरूपसमापत्तिं च दर्शयसि, यावज्जगदुदयापायावपीत्याह—

आ ब्रह्मेदं नवमिव जगज्जङ्गमस्थावरान्तं
सर्गे सर्गे विसृजसि रवे गोभिरुद्रिक्तसोमैः ।
दीप्तैः प्रत्याहरसि च लये तद्यथायोनि भूयः
सर्गान्तादौ प्रकटविभवां दर्शयन् रश्मिलीलाम् ॥ ३० ॥

आब्रह्मणः शाक्ताद्रूपादाब्रह्म निजं परं शाक्तं रूपं वर्जयित्वा इदं सर्वं सादाशिवादिक्षित्यन्तं जङ्गमस्थावरे अन्तौ भागौ यस्य तादृग् जगत्सर्गे सर्गे प्रथमेच्चोन्मेषात्मन्यादिसर्गे भूयो भूय उद्रिक्तसोमैः स्फीतशाक्तामृतैर्गोभिर्मरीचिभिर्विसृजसि आश्यानीभूतं निजरश्मिरूपं प्रकटयसि । भूयो दीप्तैरग्निप्रधानैर्गोभिस्तज्जगद्यथायोनि प्रत्याहरसि स्वास्वातन्त्र्यावभासिततत्तत्कारणनिवेशपुरःसरं लये स्वनिर्देशगाशरणात्मनि संहारे प्रतीपमाहरसि चिदेकमयमेव करोषि । किं कुर्वन् ? सर्गस्य सृष्टेरादौ अन्ते प्रकटविभवां स्फुटमाहात्म्यां रश्मिलीलां प्रकटयन्निजमरीचिविलासमाभासयन् ॥ ३० ॥

श्रित्वा नित्योपचितमुचितं ब्रह्मतेजःप्रकाशं
रूपं सर्गस्थितिलयमुचा सर्वभूतेषु मध्ये ।
अन्तेवासिष्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा ॥ ३१ ॥

हे भगवन्, यः प्रकृत्या स्वभावेन परोक्षोऽक्षागोचर आत्मा असौ जगति सर्वभूतेषु मध्ये भवताऽन्तेवासिषु अनुग्राह्येषु आत्मनैव प्रत्यक्षो दर्शितः स्वप्रकाशतया प्रकटीकृतः । किं कृत्वा ? नित्योपचितं सदा परिपूर्णमुचितं चिदानन्दघनं रूपं श्रित्वा देहादिनिमज्जनेनोन्मग्नं विधाय । कीदृग

रूपम् ? ब्रह्मतेजःप्रकाशं बृहत्त्वाद् बृंहकत्वाच्च ब्रह्म द्वैतदाहित्वात्तेजो यस्य तादृशः प्रकाशः प्रथा यस्य । कीदृशेन भवता ? सर्गस्थितिलयमुचा जननादि-शून्येन यथान्तेवासिषु शिष्येषु शोभनेन दृष्टतत्त्वेन गुरुणा आत्मा दर्श्यते चिन्मयी सत्ता प्रकटीक्रियते, तथा त्वयान्तः परमात्मतया बहिश्च तेजो विश्वरूपतया स्वयमात्मा प्रकटीक्रियते ॥ ३१ ॥

लोकः सर्वो वपुषि नियतं ते स्थितास्त्वं च तेषा-
मेकैकस्मिन् युगपदगुणो विश्वहेतोर्गुणीव ।
इत्थंभूते भवति भगवन्न त्वदन्योऽस्मि सत्यं
किन्तु ज्ञस्त्वं परमपुरुषोऽहं प्रकृत्यैव चाज्ञः ॥ ३२ ॥

हे भगवन् परानन्दात्मक स्वातन्त्र्यशक्तिस्वरूपपरावागालिङ्गितमूर्ते, ते तव विश्वहेतोरशेषकारणस्य वपुषि प्रकाशानन्दघने स्वरूपे सर्वे लोका लोक्यमानाः पदार्थाः, लोकयितारश्च रुद्रक्षेत्रज्ञरूपाः प्रमातारः स्थिताः । त्वच्चिदात्मिकां सत्तां विना हि कथमेते त्वत्तो विश्वहेतोरुदियुः । तेषां च लोकानां संबन्धिन्येकैकस्मिन् वपुषि त्वं युगपदक्रमेणैव स्थितः । अन्यथा ते त्वत्प्रकाशतां विना हि कथं प्रकाशेरन् । अतश्च त्वं सत्त्वादिगुण-हीनोऽपि विश्वात्मताभासगुणाद् गुणीवाभासि । इत्थमुपवर्णिते विश्वा-त्मनि भवति सति सत्यमस्मि नान्या । किन्तु त्वमेवंभूतः परमः पुरुषो ज्ञः परिपूर्णः सार्वज्ञ्यादिधर्मः । अहमिति त्वयैव देहादिषु ग्राहित-प्रमातृभावः प्रकृत्या त्वन्मायामाहात्म्यादज्ञः । अतश्च देहादिप्रमातृता-निमज्जनेनाज्ञतां प्रशमय्य नित्यं स्वात्मसमावेशेन ज्ञतां ममोन्मज्जयेत्यर्था-दुक्तं भवति ॥ ३२ ॥

संकल्पेच्छाद्यखिलकरणप्राणवाण्यो वरेण्याः
संपन्ना मे त्वदभिनवनाज्जन्म चेदं शरण्यम् ।
मन्ये चास्तं जिगमिषु शनैः पुण्यपापद्वयं तद्
भक्तिश्रद्धे तव चरणयोरन्यथा नो भवेताम् ॥ ३३ ॥

इत्थमज्ञस्यापि मे त्वदभिनवनाच्चिदात्मत्वदाभिमुख्यप्रवृत्त-त्वत्परामर्शात्मस्तुतिवशात् । संकल्पः स्थूलेच्छा । इच्छा सङ्कल्पकारणभूता सूक्ष्मविकल्पपरामर्शात्मा । आदिशब्दात् प्रयत्नस्तदनन्तरमालोचनादानादि-प्रवृत्तानि वाग्वर्जान्यखिलानि करणानि सत्सहवृत्तिः प्राणः, सर्वत्रात्र

सूक्ष्मपरामर्शरूपतया व्यापकत्वेन स्थिता वाणी चेत्येते मम वरणे परानुग्रहे साधवो वरेण्या जाताः, तथेदमिति पश्चिमजन्म शरण्यं शरणे साधु अनुग्राह्यानुग्रहैकपरं सम्पन्नम्। अहं हि सर्वदशासु चिदर्कपरामर्शपरः परानप्यनुगृह्णन् स्थितः। किञ्च, मन्ये स्वानुभवेनैवैतच्चेतये यत्पुण्यपापद्वयं सुकृतासुकृतजातं सर्वं तदित्यनन्तजन्मार्जितं शनैरस्तं जिगमिषु हिमविलायं विलीयमानं स्थितम्। प्राक्संचितसर्वकर्मणां हि ध्वंसेऽपि देहारम्भककर्मणां ध्वंसोन्मुखत्वाज्जिगमिष्वित्युक्तम्। अन्यथेति। यदि नैवं स्यात्तत्कथं भवच्चरणयोर्भक्तिश्रद्धे भवेताम्। नैव स्याताम्। यदुक्तं नन्दिशिखायाम्––

यदा शिवेऽभिलाषो वै जायते च नृणां सदा।
तदा शिवाभिमानास्ते जायन्ते परमाणवः॥
मुक्तास्तदैव ते दीक्षां प्राप्नुवन्ति गुरोस्ततः॥ इति॥ ३३॥

सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्त-
स्तत्राप्येकं तव नुतिफलं जन्म याचे तदित्थम्।
त्रैलोक्येशः शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्याम्॥ ३४॥

हे देव, यद्यपि त्वत्प्रपन्नेषु त्वत्समाविष्टेषु संसारहेतुसर्ववासनादाहाद् भूयो जननमरणे न स्तः, तथापि त्वन्नुतिस्त्वत्स्तुतिरेव फलं यस्य तादृगिदमेकं पश्चिमजन्म याचे। यथा भवदवमर्शातिमचमत्काराधायि एतन्मागात्। तदित्थमनेनैव त्वन्नुतिरसाविष्टेन प्रकारेणास्मिन्नेव देहे परः शम इव शाम्यत्यस्मिन् विश्वमिति व्युत्पत्त्या परः शङ्करात्मस्वभाव इव जाग्रत्स्वप्नसुषुप्तात्मनि त्रैलोक्ये ईशः प्रभुः। न तु परतन्त्र। अत एव पुण्यो दर्शनस्पर्शनादिना परानुग्राही कायो यस्य तादृक्। अयोनिरिति नित्योदितचिदानन्दैकघनः सन् जगतो विश्वस्य तारणाय संसाराब्धिमध्ये प्लव इव पोत इव स्थिरः स्यां चिरकालं भूयासम्॥ ३४॥

सौषुम्णेन त्वममृतपथेनैत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄन् शान्तभाभिः कलाभिः।
पश्चादम्भो विशसि विविधाश्चौषधीस्तद्गतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रतार्क॥ ३५॥

हे अर्क ! अतो हेतोस्ते जगतो मित्रता यौगिकमित्रशब्दाभिधेयत्वम्, यतस्त्वं सौषुम्णेन मध्यमेनामृतपथेनाप्यायिना मार्गेण शीतांशुभावमपान-चन्द्रत्वमेत्यागत्याग्रे प्रथमं सुरादीन् सर्वान् प्रमातॄन् पुष्णासि लब्धावस्थितीन् करोषि। केन शान्तभाभिनन्तर्मुखीभावेनोपसंहृतबाह्यप्रथाभिः कलाभिरादि-विसर्गान्तस्वाभाविमर्शशक्तिभिः । पश्चादनन्तरम्भ इति बहिः प्रसरप्रवृत्ता सर्ववाहान् विशसि स्वामृताच्छुरितान् करोषि। विविधाश्चौषधीर्विश स्थावरादिसर्वबाह्याभासान् स्वप्रकाशपूरितान् विधत्से। तद्गतो मेयप्रपञ्चा त्मतया स्फुरितोऽपि त्रिभुवनं विश्वमेवमिति तदाभासनविमर्शनयुक्त्यै चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादीन् प्रीणासि तर्पयसि। बाह्योऽप्य सुषुम्णामार्गेणामृतसंक्रमणयुक्त्या चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादी पुष्णाति। शान्तभाभिर्निवृत्तदीप्तिभिः कलाभिः शक्तिभिरम्भो विश दक्षिणायने आसाररूपतां स्वीकरोति। ओषधीश्च विशति सरत करोति। तद्गतश्च वैश्वदेवयागानुयागक्रमेण त्रिभुवनं पुष्णन् जगन्मि त्वमेव दर्शयति ॥ ३५ ॥

मन्दाक्रान्ते तमसि भवता नाथ दोषावसाने
नान्तर्लीना मम मतिरियं गाढनिद्रां जहाति।
तस्मादस्तंगमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर परं नीयतामाशु बोधम् ॥ ३६

हे नाथ दिनकर स्वामिन् चिदर्क, त्वया तमस्यज्ञाने मन्दा निर्मूलनायाघ्राते सति इयं मदीया मतिर्धी रागद्वेषाणामवसाने जाते *अन्तर्लीनान्तर्मुखीभूतापि* गाढनिद्रां त्वदभेदाख्यातिं न जहाति। तस्मा त्वया अस्तंगमितं तमो यया तादृश्यात्मभासा स्वदीप्त्या कारणभू आश्वविलम्बितमेव परं बोधं प्रशान्ताख्यातिनिजज्योतिरात्मतां नी प्राप्यताम्। सूर्यो देवता यस्याः सा सौरीति कृत्वा पद्मिनीव नलिनी सापि त्वया दोषावसाने प्रभाते तमसि मन्दाक्रान्तेऽन्तर्लीना क संश्लिष्टदला गाढनिद्रां न जहातीत्यस्तंगमिततमसा स्वात्मभासा गाढ ज्योतिषा प्रबोध्यते त्वया ॥ ३६ ॥

येन ग्रासीकृतमिव जगत्सर्वमासीत्तदस्तं
ध्वान्तं नीत्वा पुनरपि विभो दद्दयाघ्रातचित्तः ।
धत्से नक्तंदिनमपि गती शुक्लकृष्णे विभज्य
त्राता तस्माद्भवपरिभवे दुष्कृते मेऽपि भानो ।। ३७ ।।

हे विभो भानो चिन्मरीचिमालिन्, येन तमसाऽज्ञानेन जगदिदं ग्रासीकृतमासीत्, तदनुगृहीतान् प्रत्यस्तं नीत्वा विनाश्य तद्दयाघ्रातचित्त इव तदनु कम्पयैव शुक्लकृष्णगती विभज्य व्युत्थानावसरे प्राणापानभूमिकामवरुह्य तद् ध्वान्तं पुनरपि धत्से पुष्णासि । निर्व्युत्थानं समाधिं झगिति न वितरसीत्यर्थः । यथा बाह्यो भानुर्ग्रासीकृतजगत्तिमिरं विनाश्य पुनर्दययेव नक्तंदिनं निशादिने विभज्य धत्ते पुष्णातीति श्लेषोपमा । यत एवं दुरात्मनि तमस्यपि त्वमनुकम्पावानिव ततो मे मम परिभवे व्युत्थानात्मनि क्लेशेऽपि त्राता रक्षिता भव । कीदृशे परिभवे ? दुष्कृते दुष्टं कृतं करणं विषयहानादानादिपरिभवो यत्र । निर्व्युत्थानसमावेशरसास्वादिनं मां कुर्वित्यर्थः ।। ३७ ।।

व्युत्थितः समावेशप्राप्नुवन् व्युत्थानदशानिर्भर्त्सनपरः समावेशपरं भगवन्तं प्रार्थयितुमाह—

आसंसारोपचितसदसत्कर्मबन्धाश्रिताना-
माधिव्याधिप्रजनमरणक्षुत्पिपासार्दितानाम् ।
मिथ्याज्ञानप्रबलतमसा नाथ चान्धीकृतानां
त्वं नस्त्राता भव करुणया यत्र तत्र स्थितानाम् ।। ३८ ।।

सत्पुण्यम् । असत्पापम् । यत्र तत्र स्थितानामिति देशे कालेऽवस्था-वैचित्र्ये च त्राता समावेशप्रथनेन रक्षकः । शिष्टं स्पष्टम् ।। ३८ ।।

सत्य सत्यस्खलितवचसां शौचलज्जोज्झिताना-
मज्ञानानामफलसफलप्रार्थनाकातराणाम् ।
सर्वावस्थास्वखिलविषयाभ्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणाम् ।। ३९ ।।

भोगेषु विषयसुखेषु लम्पटानामस्माकमर्भकाणां बालानामिव त्वं पितृतया जनकत्वेन त्राता भवेति प्राग्वत्। त्वं ह्यस्माकं तत्त्वदृष्ट्या जनकः। सत्यासत्येत्युभयत्र समम्। स्खलितं प्रमादि एकत्र, अन्यत्राऽस्पष्टवर्णत्वम्। एवं शौचं चैत्तं शारीरं च। अफला सफला च या प्रार्थना तया कातराणामधीराणाम्। यत्तत्प्रार्थयमानानामिति। सुबोधमन्यत्॥ ३९॥

यावद्देहं जरयति जरा नान्तकादेत्य दूती
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः।
गाढं कण्ठे लगति सहसा जीवितं लेलिहान-
स्तावद्भक्ताभयद सदयं श्रेयसे नः प्रसीद॥ ४०॥

हे भक्ताभयद, यावद्व्युत्थितामरणावसानां दुर्दशां नाऽनुमस्तावन्नोऽस्माकं प्रसीद देहादिसंस्कारकालुष्यप्रशमनेन निर्मलीभव। निर्व्युत्थानप्रकाशानन्दघनपरमसमावेशामृतरसास्वादसुखितानस्मान् संपादयेत्यर्थः। स्पष्टमन्यत्॥ ४०॥

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं दहननयनोद्दामदंष्ट्राकरालम्।
यावद् दृष्ट्वा व्रजति न भिया पञ्चतामेष काय-
स्तावन्नित्यामृतमय रवे पाहि नः कांदिशीकान्॥ ४१॥

मृत्योरन्तकस्य वक्त्रं दृष्ट्वा यावदेष काय इति सपुर्यष्टको देहो भिया भीत्या पञ्चतां मृत्युं न व्रजति तावदेव रवे चिदर्क नित्यामृतमय अनस्तमितपरमानन्दैकघनस्वभाव नोऽस्मान् कांदिशीकान् व्युत्थाने त्वत्समावेशप्राप्तिं विना कां दिशं कायतः का दिक्का दिगस्माकमिति क्रन्दतः पाहि निर्व्युत्थानसमावेशान् संपादय। कीदृङ् मृत्योर्वक्त्रम्? विश्वेषां प्राणग्रसनो जीवितभक्षको रसनाटोपो लोलरसनाव्यापारो यस्य तादृशि कोपे प्रगल्भं प्रौढम्। तथा दहनानि प्लोषकानि नयनादि यस्य तादृक्। तथा उद्दामाभिरूर्जिताभिर्दंष्ट्राभिः करालम्॥ ४१॥

शब्दाकारं वियदिव वपुस्ते यजुःसामधाम्नः
सप्तच्छन्दांस्यपि च तुरगा ऋङ्मयं मण्डलं च।
एवं सर्वश्रुतिमयतया मद्दयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रन्दमाकर्णयेमम्॥ ४२॥

हे भगवन्, ते तव निर्णीतदृशा सामवेदात्मकं धाम तेजो यस्य तादृशः। यजुर्वेदात्मकं शब्दाकारं वपुः शरीरं वियदिव व्यापकम्। तदपि शब्दाकारमिति शब्दानाकरोति समस्तशब्दाश्रयः। अपि च गायत्र्यादि सप्तच्छन्दांसि ते तुरगाः। मण्डलं प्रभा परिवेषोऽपि ऋग्वेदमय इत्येवं सर्वश्रुतिमयत्वात्। यद्वा अनुकम्पाप्रधानादनुग्रहान्मत्तो मत्सकाशादुक्तवक्ष्यमाणप्रार्थनापरत्वात् कृपणं विरसं संसारविभावकत्वाच्च करुणं करुणरसप्रधानमिममाक्रन्दं त्वत्प्रसादप्रार्थनापरं प्रलपितं क्षिप्रमुदीरणानन्तरमेवाकर्णय करुणयाऽस्मदनुजिघृक्षयाऽवधारय ॥ ४२ ॥

नाशं नास्मच्चरणशरणा यान्त्यपि ग्रस्यमाना

देवैरित्थं सितमिव यशो दर्शयन् स्वं त्रिलोक्याम्।

मन्ये सोम क्षततनुममागर्भवृद्ध्या विवस्वन्

शुक्लच्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा ॥ ४३ ॥

हे भगवन् विवस्वन् चिद्भानो, अस्मच्चरणशरणा देवैरपि ग्रस्यमाना नाशं न यान्ति इत्येवं सितं शुभ्रं यशस्त्रिलोक्यां दर्शयन्निव सोमं क्षततनुं देवैरपि ग्रस्तसमस्तकलं सुषुम्णाख्यमध्यनाड्या अंशवो मरीचयस्तद्भासा दीप्त्या हेतुभूतया अमाख्यकलया गर्भेऽन्तर्या वृद्धिस्तया स्वां शुक्लां छायां संपूर्णसितां कान्तिं नयसि प्रापयसीति मन्ये जानामि। अत्र रहस्यदृशा देवा इन्द्रियाणि सोमोऽपानयुक्त्यान्तःप्रविष्टः षोडशकलारूपात्मा मेयवर्गः सर्ववाहोल्लासयुक्त्या कलाग्रासेन क्षीणकलः सन् सुषुम्णांशुभासा मध्यधामस्फारेणोन्मिषच्छुभाख्यतुर्यप्रकाशदीप्त्या अमाया अन्ततुर्यार्धस्फुरच्छक्तेर्गर्भेऽन्तर्या वृद्धिः प्राणादिप्राधान्यनिमेषोन्मिषच्छाक्तवीर्यभाभिः स्फुरिता, तया शुक्लां चिदेकघनां नयसि प्रापयसीत्यर्थः। बाह्यस्तु स्पष्टः ॥ ४३ ॥

आस्तां जन्मप्रभृति भवतः सेवनं तद्धि लोके

वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम्।

ज्योतिर्मात्रं स्मृतिपथमितो जीवितान्तेऽपि भास्वन्

निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः ॥ ४४ ॥

हे भास्वन्, जन्मप्रभृति यत्त्वत्सेवनं तदपरिमितफलं केन वाच्यं केन वक्तुं शक्यम्, इयत्तया परिच्छेद्यत्वाभावात्। तद्यस्माद् भुक्तिमुक्तिप्रकारं

भुक्तिर्विषयभोग एव स्वात्मानन्दविश्रान्तिदत्वेन जीवच्छिवत्वाभिव्यक्तात्मा मुक्तिरेव च चिच्चमत्कारावेशरूपा भुक्तिः, न तु विषयासक्तिरूपा । तां भुक्तिं मुक्तिं प्रकाशयति सेवकांस्तन्मयान् संपादयति जीवितान्ते निर्वाणावसरेऽपि ज्योतिर्मात्रात्मा त्वं सतां स्मृतिपथं प्राप्तो निर्वाणाय मुक्तये प्रभवसि । अतस्ते समः कोऽन्यः । असामान्यमहिमाऽसीत्यर्थः ॥ ४४ ॥

अप्रत्यक्षत्रिदशभजनाद्यत्परोक्षं फलं तत्
पुंसा युक्तं भवति हि समं कारणेनैव कार्यम् ।
प्रत्यक्षत्वं सकलजगतां यत्समक्षं फलं मे
युष्मद्भवतेः समुचितमतस्तत्तु याचे यथा त्वाम् ॥ ४५ ॥

अप्रत्यक्षेन्द्रचन्द्रादिदेवताराधनादाराधकानां यत्स्वर्गप्राप्त्यादि परोक्षं कालान्तरे भावि फलं तद्युक्तम् । यतो मृद इव मृण्मयो घटः कारणोचितमेव सर्वत्र कार्यं भवति । त्वं तु चिदर्कः सर्वेषां प्रत्यक्षः स्वप्रकाशः, चिदर्कस्वप्रकाशात्मतां विना कस्याप्यप्रकाशादिति । त्वद्भवतेर्हेतोर्मम नित्योदितत्वत्समावेशात्मफलं समुचितम् । अतो हेतोस्तत्फलं याचे प्रार्थये । यथा कृतिमतीषु देवतासु सतीषु त्वामेव याचे तथा निर्व्युत्थानसमावेशात्मैव फलं याचे । न तु मितं किञ्चित् ॥ ४५ ॥

ये चारोग्यं दिशति भगवान् सेवितोऽप्येवमाहु-
स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः ।
भुवतेर्मुवतेरपि च जगतां यच्च पूर्णं सुखानां
तस्यान्योर्कादमृतवपुषः को हि नामास्तु दाता ॥ ४६ ॥

येऽपि च केचिदविमृष्टसमावेशात्ममुख्यफला भगवान्सेवित आरोग्यं दिशतीत्याहुस्तेऽपि जगति तत्त्वज्ञाश्च सुभगाश्च । यतो भोगयोगप्रधाना भोगाय योगाय चारोग्यं वाञ्छन्ति । युक्तं चैतत् । यतोऽमृतवपुषः परानन्दप्रकाशघनाच्चिदर्कादन्यः को नाम भोगमोक्षयोस्तदाश्रयस्य पूर्णसुखात्मन आरोग्यस्य च दाता । न कश्चित् । "पूरणगुणसुहितार्थ" इति तृप्त्यर्थैः सह षष्ठीसमासनिषेधाज्ज्ञापकात् सुखानां पूर्णमित्यत्र षष्ठी ॥ ४६ ॥

हित्वा हित्वा गुरुचपलतामप्यनेकान्निजार्था-
न्यैरेकार्थीकृतमिव भवत्सेवनं मत्प्रियार्थम् ।
तेषामिच्छाम्युपकृतिमहं स्वेन्द्रियाणां प्रियाणा-
मादौ तस्मान्मम दिनपते देहि तेभ्यः प्रसादम् ॥ ४७ ॥

हे दिनपते चिद्भानो, यैरिन्द्रियैरन्तर्बहिःकरणैर्गुर्वीं चपलतां महती-मनवस्थितिं पुनः पुनः प्रवृत्तामपि तथाऽनेकान्निजार्थान् विषयविश्रान्त्यात्मकानि नानास्वप्रयोजनानि हित्वा त्यक्त्वा भवत्सेवनमन्तर्मुखीभावयुक्त्या त्वत्परिशीलनं मम प्रियार्थमेवैकार्थीकृतमभिनिवेशेनाश्रितम् । तेषां प्रियाणां स्वेन्द्रियाणामहमुपकारमिच्छामि । तस्मान्ममादौ तेभ्यः प्रसादं देहि मायीयदेहपरिहारेण निजमरीचिचक्रात्मतां प्रकटयेत्यर्थः ॥ ४७ ॥

किं तन्नामोच्चरति वचनं यस्य नोच्चारकस्त्वं
किं तद्वाच्यं सकलवचसां विश्वमूर्ते न यत् त्वम् ।
तस्मादुक्तं यदपि तदपि त्वन्नुतौ भक्तियोगा-
दस्माभिस्तद्भवतु भगवंस्त्वत्प्रसादेन धन्यम् ॥ ४८ ॥

हे विश्वमूर्ते अनवच्छिन्न, त्वन्नुतिविषये इदन्तावच्छेदप्रधानतया असमञ्जसप्रायं किमप्यस्माभिस्त्वद्भक्तित उक्तं तद्विश्वस्य वाच्यवाचकात्मनस्तव प्रसादादन्तर्नैर्मल्यप्राप्तेर्धन्यमस्तु त्वद्रूपतयैव स्फुरतु ॥ ४८ ॥

या पन्थानं दिशति शिशिराद्युत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडाद्यम् ।
ताभ्यामन्या विषुवदभिजिन्मध्यमा कृतशून्या
धन्या काचित्प्रकृतिपुरुषावन्तरा मेऽस्तु वृत्तिः ॥ ४९ ॥

प्रकृतिपुरुषौ वामदक्षिणवाहौ अन्तरा तन्मध्ये काचिदसामान्या धन्या संपन्मयी मे वृत्तिः स्थितिरस्तु । कीदृशी ? विषुं व्याप्तिमर्हतीति विषुवत् । अभिजयति द्वैतप्रशमनात् सर्वोत्कर्षेण वर्तत इत्यभिजित् । सर्वमध्यवर्तित्वान्मध्यमा । स्वानन्दविश्रान्तिसारत्वात् कृत्यैः सौम्यक्रूरादिभिः कार्यैः शून्या । तथा देवप्रीतिकारित्वाद्देवयानं हृदो द्वादशान्तं यावत् प्रसरणरूपं शिशिरवसन्तग्रीष्मस्वभावमुत्तरपन्थानमुत्तरायणं या प्राणाख्या

वृत्तिर्दिशति प्रथयति, या वा अपानाख्या वृत्तिर्द्वादशान्ताद्धृत्प्रवेशरूपा प्रावृट्शरद्धेमन्तरूपां दक्षिणं पन्थानं दक्षिणायनं भोगप्रदत्वात् कृष्णं पितृ-प्रीतिहेतुत्वात्पितृपथं दिशति ताभ्यामन्या व्यतिरिक्ता जीवन्मुक्तिप्रदा। उन्मनाख्येत्यर्थः। षट्त्रिंशदङ्गुलेऽङ्गुलपट्के हृदःप्रभृतिमकरादिराश्युदय इत्यर्थः श्रीस्वच्छन्दादिशास्त्रेष्वस्ति ॥ ४९ ॥

स्थित्वा किञ्चिन्मन इव पिबन् सेतुबन्धस्य मध्ये
प्राप्योपेयं ध्रुवपदमथो व्यक्तमुद्दाल्य तालु।
सत्यादूर्ध्वं किमपि परमं व्योम सोमाग्निशून्यं
गच्छेयं त्वां सुरपितृगती चान्तरा ब्रह्मभूतः ॥ ५० ॥

सुरपितृगती अन्तरा ऊर्ध्वाधःप्रवेशात्मनिर्णीतदेवपितृमार्गयोर्मध्ये चकारात् सर्ववाहानामप्यन्तर्ब्रह्मभूतोऽनवच्छिन्नतां प्राप्तस्त्वां गच्छेयं परतत्त्वात्मचिदर्करूपः स्याम्। कीदृशं त्वाम्? सत्याद्विश्वसत्ताप्रदात् सामरस्याद्धाम्न ऊर्ध्वमुत्कृष्टं प्रकाशानन्दैकघनं किमपि परमं व्योमेत्यनुत्तर-चिदाकाशरूपं सोमाग्निशून्यं प्रशान्तप्राणापानसंस्कारम्। किं कृत्वा? तालुलम्बिकाख्यरौद्रग्रन्थिधामव्यक्तिं कृत्वा। दिव्यकरणबन्धाश्रयत उद्दाल्य निर्भिद्य। अथो अनन्तरं ध्रुवपदं प्राप्य समस्तवेद्याविभागप्रकाशात्म-बिन्दुस्थानमासाद्य। सेतुबन्धस्य मध्य इति निरोधकोर्ध्वशक्त्या तट-द्वयान्तर्बाहिप्राणापानाद्युत्तरणोपायनादनादात्मसृष्टिनिरुद्धसमस्तकरन्ध्रमार्गे स्थित्वाऽधिरुह्य किञ्चिन्मनः पिबन्निव समनान्तसविकल्पकमनःसंस्कारं प्रशमयन् ॥ ५० ॥

सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायरुद्धया
रागद्वेषोपशमसमतायोगमेवारुरुक्षुः ।
धर्माधर्मग्रसनरशनामुक्तये युक्तियुक्तां
स श्रीसाम्बः स्तुतिमिति रवेः स्वप्रशान्तां चकार ॥ ५१ ॥

श्रयन्त्येतां योगिन इति श्रीस्तया मोक्षलक्ष्म्या सहितः साम्बो भगव-द्वासुदेवसुत इत्येवंरूपां रवेश्चिदर्कस्य स्तुतिं स्वप्रशान्तामात्मविश्रान्तिपराम-करोत्। 'सुप्रतिष्ठाम्' इति वा पाठः। कीदृशीं स्तुतिम्? युक्त्या परस्वरूप-विश्रान्त्यात्मना योगेन युक्ताम्। तत्ख्यापयित्रीमित्यर्थः। स इत्यस्य विषयं दर्शयति—यः सवितुर्विश्वकारणस्य चिद्भानोः सर्वात्मत्वं वैश्वरूप्यमेव

योगमेकत्वमिच्छति । "वस्तुनोऽन्येन वस्तुना" इत्याम्नायदृशा योगं परैक्यमित्युक्तदृशा रोद्धुमिच्छुः स्वीचिकीर्षुः । न त्वन्यत्किञ्चित् । कीदृशं योगम् ? सर्वदोषमूर्धन्ययो रागद्वेषयोरुपशमे सति या समता साम्यं तद्रूपम् । केन ? वाङ्मनःकायसहितया बुद्धया । वाचा स्तुतिभिः, मनसाऽनुसंधानतः, कायेन कायप्राधान्येन निमज्जनात्मकप्रणामेन, बुद्धयाऽध्यवसायेन । किमर्थमिमां स्तुतिमकरोदित्याह––धर्माधर्माभ्यां यद्ग्रसनमर्थादबुद्धस्य जगतस्तदेव रशना बन्धनरज्जुस्तस्या मुक्तये । एतत्स्तोत्रपाठावमर्शाभ्यां जना जीवन्मुक्तिमायान्त्वित्याशयादित्यर्थः ॥ ५१ ॥

भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं
श्रीसाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।
यः सावित्रं पठति नियतं स्वात्मवत् सर्वलोकान्
पश्यन् सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ॥ ५२ ॥

इदमध्यात्मगर्भं क्रोडीकृतरहस्यम्, प्रकटं बाह्यार्थदृशा, गहनं चाध्यात्मकार्थयोगात्, सावित्रं चिद्भानुसबन्धि स्तोत्रं श्रीसाम्बेनोक्तं यः कश्चित् स्वात्मानमिव सर्वलोकान् पश्यंश्चिदभेदात्मविश्वं स्तोत्रार्थं भावयन्नियतं निश्चयेन पठति अनवरतं विमृशति, सोऽन्ते चण्डरश्मेर्द्वैतग्रासिनश्चिदर्कस्य मण्डलं लीढविश्वसमरसीभूतमरीचिचक्रमेति । तन्मयो जायते । शुकवद् भगवद्व्याससुतवत् । कीदृशेन साम्बेन ? भक्तिश्रद्धे आदी यासां तत्त्वार्थचिन्तादीनां ता एवाखिलास्तरुण्यो नवनवाः सुन्दर्यस्तासां वल्लभेन क्षणमपि परिहर्तुमशक्येन प्रेयसा । न तु रूपलावण्यतिशयमात्रात् समस्तबाह्यरमणीस्पृहणीयेन । इत्यनेन व्यतिरेकलभ्येनार्थेन भगवद्वासुदेवसुतत्वमात्मनः प्रकटयति ॥ ५२ ॥

उपसंहारभङ्ग्या जनाननुजिघृक्षुराशास्ते––

इति परमरहस्यश्लोकपञ्चाशदेषा
तपननवनपुण्या सागमब्रह्मचर्चा ।
हरतु दुरितसम्बर्द्धणिताक्रणिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजाम् ॥ ५३ ॥

इत्युक्तक्रमान्महारहस्यार्थयुक्ता "स्थित्वा किञ्चिन्मन इव पिबन्" इत्यन्तश्लोकानां पञ्चाशदेषा तपनस्य विश्वविचित्राखण्डिप्रतापस्य भगवतश्चिदर्कस्य नवनेन स्तुत्या पुण्या पवित्रा। तथा सागमा विश्वोपनिषद्रूपमाहेश्वरशास्त्रार्थसतत्त्वगर्भा ब्रह्मचर्चा पराद्वयविमर्शो यस्यां तादृशी अस्मद्वर्णिता सती आकर्णिता वो युष्माकं सर्वेषां दुरितं हरतु किल्विषं दुरध्यवसायं च नाशयतु। भक्तिभाजां च शुभसिद्धि दिशतु अभीष्टां भोगमोक्षलक्ष्मीं घटयतामिति शिवम् ॥ ५३ ॥

कश्चिच्छैवः परशिवसमावेशगाढानुरागो-
द्रेकस्फूर्जन्नभिनवदशावेशवैवश्यशाली ।
सत्स्तोत्रेऽस्मिन् विवृतिरचनां क्षेमराजो न्ययुङ्क्ते-
त्येतन्नैवं झटिति घटितं दर्शनीयं हि सद्भिः ॥

इति महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीवि-
राजानकश्रीक्षेमराजप्रणीतविवृतिसमेता
श्रीसाम्बपञ्चाशिका समाप्ता

ॐ नमः सच्चिदानन्दाय

अथ

विरूपाक्षपञ्चाशिका

विद्याचक्रवर्तिकृतविवृतिसमेता

प्रथमः स्कन्धः

नमो विश्वशरीराय विश्वैकात्म्यावभासिने ।
नित्यप्रत्यवमर्शाय शम्भवे विश्वसिद्धये ॥ १ ॥
संवित्तिसिद्धान्तसिद्धार्थसारसंग्रहरूपिणीम् ।
पञ्चाशिकां विरूपाक्षप्रोक्तां व्याकुर्महे वयम् ॥ २ ॥

इह विश्वानुग्रहैकरसिकः श्रीमान् परमशिवभट्टारकः परिगृहीतलीलाविग्रहः श्रीविरूपाक्षनाथपादनाम्ना परिभ्रमन् कदाचिद् दिविषदां नाथं गन्धसिन्धुरायोघनं पारमैश्वर्यमभिमन्यमानधिगम्य तत्पुरस्तादिच्छामात्रेण प्रादुष्कृतमहाचलयुगलाहवस्तद्दर्शनकौतुकातिशयप्रशान्तैश्वर्यस्मये सर्वभावेनोपपन्ने तत्र तदवबोधनाय समस्तसंवित्तिसिद्धान्तार्थपरमनिष्कर्षभूतमेतत् पञ्चाशिकाशास्त्रमवतारयामास। तत्र प्रथमचरमयोः श्लोकयोरुपक्रमोपसंहाररुपत्वात् "शुकवामदेवयोः (५० श्लो०) इत्यस्य च प्रासङ्गिकत्वादनुपदेशरूपत्वम्। अवशिष्टाः श्लोकाः पञ्चाशद्रूपा इति शास्त्रमेतत् पञ्चाशिका। तत्र विमतिपदमित्यादिश्लोकसप्तकरूपेण प्रथमस्कन्धेन शरीरबाह्यतया प्रतीयमानस्य विश्वस्य शरीरत्वमुपपत्तिभिरवस्थापितम्। अथ देहदेहिभावलक्षणभेदभ्रमापासनाय *प्रत्यवमर्शात्मेत्यादित्रयोदशश्लोकात्मना* द्वितीयस्कन्धेन प्रकाशैकात्म्यं विश्वस्य वितत्य विवेचितम्। अथ प्रत्यभिज्ञातस्य प्रकाशैकात्म्यस्यासम्भावनाविपरीतभावनादिभिर्दोषैः संस्पर्शो मा भूदिति प्रत्यवमर्शप्रकाराः सप्रपञ्चं प्रदर्शिता अहमेकोऽनस्तमितप्रकाशेत्याद्येकोनविंशतिश्लोकात्मना तृतीयस्कन्धेन। अथ चतुर्थस्कन्धेन मत्स्थमपीत्यादिश्लोकैकादशकात्मकेनाप्रबुद्धप्रबुद्धादीनां प्रतीतिप्रकारोपन्यासपुरस्कारेण परापरसिद्धिप्रादुर्भावसरणिः पर्यन्ते महासिद्धिश्चोपदिष्टेति चतुःस्कन्धकमिदं शास्त्रम्। अवान्तरविशेषास्तत्र तत्रोपवर्ण्यन्ते।

अथ ग्रन्थं व्याकुर्मः । तत्र शास्त्रमवतारयितुं पीठिकाबन्धमारचयति—

गन्धगजसमररसिकायेन्द्राय प्रकटिताद्रियुगसमरः ।
निजसिद्धिबीजमस्मै कथयति पृष्टो विरूपाक्षः ॥ १ ॥

पृष्ठ इति प्रश्नलिङ्गानुमेयेन शक्तिपातेनास्य तत्त्वोपदेशार्हत्वादधिकारित्वमिन्द्रस्य सूचितम् । कथयति शाब्दीं दीक्षां प्रवर्तयितुमुपक्रमते ॥ १ ॥

तत्रादौ शरीरबहिर्भावेन प्रतीयमानस्य विश्वस्य शरीरत्वं साधयितु पञ्चावयवोपपन्नं वाक्यमुपन्यस्यति––

विमतिपदमङ्ग सर्वं मम चैतन्यमात्मनः शरीरमिदम् ।
शून्यपदादीलावधि दृश्यत्वात् पिण्डवत् सिद्धम् ॥ २ ॥

अङ्गेत्युपदेश्यमभिमुखीकरोति । विमतिपदमिदं शून्यपदादीलावधि सर्वं ग्राहकाभिमानिना त्वया देहबाह्यत्वेन चैतन्यात्मना मया देहत्वेन च प्रतीयमानत्वाद् विवादास्पदमेतदनाश्रितादिभूम्यन्तं विश्वं मम शरीरम् । तत्र हेतुः––दृश्यत्वादिति । यथा ते ग्राहकत्वदवच्छिन्नस्य दृश्यत्वात् पिण्डः शरीरम्, तथा मम चैतन्यात्मनोऽनवच्छिन्नस्य विश्वमेव दृश्यत्वाच्छरीरम् । उपनयस्यार्थात् सिद्धिमभिसन्दधानो निगमयति––सिद्धिमिति । सर्वस्य ह्ययं स्वानुभवसिद्धोऽर्थः । यदा प्रतिनियतं नीलपीतादिविशेषरूपं ग्राह्यं प्रत्युन्मुखी-भवति, तदायं ग्राहकः स्वयमप्यवच्छिन्नप्रकाशो भवति । स च प्रकाशावच्छेदो ग्राह्यावच्छेदोपाधिक एव । यदा पुनः सर्वमेव वस्तु सामान्यतोऽनुसन्धत्ते, तदा चैतन्यात्मकोऽनवच्छिन्नप्रकाशोऽयम्, देशकालादिप्रकाशकस्य देशकालादिभिरवच्छेदासम्भवात् । अतस्तदा दृश्यत्वाद् विश्वमेव शरीरम् । यदि तथा न स्यात्, तदा ग्राहकपदे पिण्डोऽपि शरीरं न स्याद् दृश्यत्वाविशेषात् । अतो ग्राहकत्वलक्षणविशेषविगलने तवापि चैतन्यात्मनो विश्वमेव शरीरमित्युपदिष्टं भवति ॥ २ ॥

ननु दृश्यत्वमात्रं देहत्वे न हेतुः, अपि त्वहन्तया प्रतीयमानत्वम् । प्रतीयते च पिण्डोऽहन्तया । विश्वं पुनरिदन्तया । अतः कथमुक्तार्थसिद्धिरित्यत आह—

सम्पन्नोऽस्मि कृशोऽस्मि स्निह्यत्करणोऽस्मि मोदमानोऽस्मि ।
प्राणिमि शून्योऽस्मीति च षट्सु पदेष्वस्मिता दृष्टा ॥ ३ ॥

सम्पद् गृहक्षेत्रादेर्विषयस्य धर्मः, कार्श्यं देहस्य, स्नेहश्चक्षुरादेरिन्द्रियस्य, मोदोऽन्तःकरणस्य, प्राणनं वायोः, शून्यता सुषुप्तपदस्य मायापर्यायस्य। एषु विषयादिषु षट्सु पदेषु, अस्मिता दृष्टा अहमभिमानस्तवापि स्वानुभवसिद्धः। इत्थञ्च सति यदा देहबाह्यत्वेनाभिमते विषयेऽहमभिमानः, तदा दृश्यत्वाद् विषयोऽपि शरीरम्। यदा तु नाहमभिमानः, तदा देहेन्द्रियाद्यपि न शरीरम्। अतः पिण्डेऽस्मिता तद्बहिर्भूते वस्तुनीदन्तेति यद्वैषम्यमाशङ्कितं तदविमर्शमात्रकृतो विप्रलम्भ एवेति भावः ॥ ३ ॥

ननु तथापि प्रतिनियतेषु विषयादिषु वस्तुषु षट्सु अस्मिता दृश्यते, न सर्वत्रेत्यत आह––

विषयशरीरेन्द्रियधीप्राणनिरोधप्रसिद्ध्यदस्मित्वाम् ।

इत्थं चितिमखिलेऽध्वनि धारयतो विश्वदेहत्वम् ॥ ४ ॥

विषयादिषु षट्सु येयमस्मिता प्रसिध्यति सा चितेरेवोपपद्यते, न तु ग्राहकस्य, तस्य शून्यपदे निमग्नत्वात्। इत्थं षट्सु पदेषु प्रसिद्ध्यदस्मित्वां चितिं यदि अखिलेऽध्वनि धारयसि षडात्मनीव सर्वत्रैव शिवादौ धरण्यन्ते वस्तुनि नित्यशुद्धामेव प्रत्यभिज्ञां दाढर्येनानुसन्धत्से, तदा तवापि विश्वदेहत्वं प्रत्यभिज्ञाविषयो भविष्यतीति शेषः। उक्तनयेन षट्सु पदेष्वस्मिता चितेरेव न ग्राहकस्य। चितेश्चानवच्छिन्नप्रकाशात्मनः प्रतिनियतेष्वस्मिता नोपपद्यते, उपपद्यते च सर्वत्रैव। तामिमां चितेः सर्वत्रैव नित्यसिद्धामस्मितां प्रतिपत्तिदाढर्येन यद्यवमृशसि, तदा ते नित्यसिद्धमेव विश्वशरीरत्वं प्रत्यभिज्ञातं स्यादिति तात्पर्यम् ॥ ४ ॥

ननूक्तनयेन सर्व एव लोको विश्वशरीरः प्राप्तः। न च तथा दृश्यते, पिण्डमात्रेऽहन्तायाः परिनिष्ठानात्। अतः प्रत्यक्षसिद्धमेतद् देहेऽभिमन्तृत्वं कथमन्यथयितुं शक्यत इत्यत आह––

उत्क्रम्य विश्वतोऽङ्गात् तद्भागैकतनुनिष्ठिताहन्तः ।

कण्ठलुठत्प्राण इव व्यक्तं जीवन्मृतो लोकः ॥ ५ ॥

विश्वतोऽङ्गात् शरीरभूताद्विश्वस्मादेव शिवादेर्वस्तुन उत्क्रम्य अनुत्क्रान्तः सन्नपि स्वाविमर्शेनोत्क्रान्त इव भूत्वा तद्भागैकतनुनिष्ठिताहन्तस्तदन्तर्भूतायां कस्याञ्चिदेकस्यां तनौ सुरनरतिर्यगात्मिकायां दृढप्ररूढाहम्भावः, अत एव कण्ठलुठत्प्राण इव लोको व्यक्तं जीवन्मृतो

जन्तुजातमेतज्जीवन्मृतकल्पं सत्यं वर्तत एव। न तत्रापलापः कश्चित्। तत्र हेतुर्विचार्यमाणः स्वाविमर्शलक्षणा मायैव। विमर्शे तु लब्धे सर्वो विश्वशरीरः शिव एव ॥ ५ ॥

यत इत्थमतः—

देहेऽस्मितया यद्वज्जडयोरास्फालनं मिथो बाह्वोः ।
इच्छामात्रेणेत्थं गिर्योरपि तद्वशाज्जगति ॥ ६ ॥

ग्राहकाभिमानितस्ते देहेऽस्मितया मिथः करयोरास्फालनं यथेच्छामात्रेण, तथा चैतन्यात्मनो मम जगत्यस्मितया गिर्योरास्फालनमिच्छावशादेव प्रवर्तते। देहे दृढोऽहमभिनिवेश इच्छा चेतीयदेव हि ते करास्फालने हेतुः, न तु हेत्वन्तरं किञ्चित्। तथा ममापि जगति दृढोऽहमित्यभिनिवेश इच्छा चेति गिर्यास्फालने हेतुः। अतो जगत्यहमभिनिवेशशैथिल्यादेव तवैतदनैश्वर्यम्। तद्दार्ढ्येन तु नित्यसिद्धमेवैश्वर्यं तवाप्याविर्भविष्यतीत्यभिप्रायः ॥ ६ ॥

ननु अस्मितेच्छामात्रं चेतीयता न करास्फालनसिद्धिमनुपश्यामः, अपि तु बिन्दुप्राणादिचेष्टालक्षणायां सत्यामेव सामग्र्याम्। अतः कथक्तार्थोपपत्तिरित्यत आह—

बिन्दुं प्राणं शक्तिं मन इन्द्रियमण्डलं शरीरं च ।
आविश्य चेष्टयन्तीं धारय सर्वत्र चाहन्ताम् ॥ ७ ॥

बिन्दुः ग्राहकग्रहणादिप्रतीतिविशेषोदयादर्वाक्तनी स्वरसवाहिनी सामान्यभूता सूक्ष्महंप्रतीतिः। प्राणोऽभिमानाध्यवसायाद्यन्तःकरणक्षोभहेतुरसुः। शक्तिपदेन बुद्ध्यहंकारौ परिगृहीतौ, तयोरध्यवसायाभिमानप्रतीत्यात्मनोः शक्तिरूपत्वात्। षडेतान् बिन्द्वादीनर्थान् आविश्य चेष्टयन्तीं स्वसंस्पर्शलवमहिम्ना परिस्पन्दयन्तीम् अहन्तां सर्वत्र धारय। येन देहे दृढप्रतिपत्त्या धारयसि, तेनैव च नयेन यदि सर्वत्र धारयसि, तदा तवेदृश्यः सिद्धयो नित्यसिद्धा एव स्थिता इति भावः ॥ ७ ॥

ननु येयमहन्ता, सा भावनामात्रपरिनिष्पन्नविकासा, न पुनरीश्वरत्वकर्तृत्वादिधर्मोत्कर्षशालिन्यनुभूयते। अतः कथमेवंविधसिद्धिसम्भव इत्यनास्थां शमयितुमाह—

ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति ।
एतेऽहन्तायाः किल पर्यायाः सद्भिरुच्यते ॥ ८ ॥

येयं त्वयाऽहन्ता प्रत्यभिज्ञाता सैव ईश्वरता सैव च कर्तृत्वं स्वातन्त्र्यं चिन्मयत्वं च । यो यः शास्त्रेष्वीश्वरत्वादिः सिद्धयतिशयः, स सर्वोऽप्यहन्तामय एव । अत ईश्वरत्वादयः पर्याया वाचकाः । अनेनाहन्तायामीश्वरत्वाद्यननुभवनिबन्धना येयमनास्था सा निरस्ता, यथा यथा प्रत्यभिज्ञानादार्ढ्यं तथा तथा नित्यसिद्धानामीश्वरत्वकर्तृत्वादीनां विभूतीनामाविर्भाव इत्यासूत्रितं चेति शिवम् ॥ ८ ॥

इति विरूपाक्षपञ्चाशिकायां विवृतिसमेतायां विश्वशरीरत्वविवेचनस्कन्धः प्रथमः ॥

द्वितीयः स्कन्धः

इत्थं प्रथमस्कन्धेन विश्वशरीरत्वं प्रतिपाद्येदानीं देहदेहिभावादिभेदभ्रमबाधनाय प्रकाशस्य वैश्वात्म्यं द्वितीयस्कन्ध आरभ्यते। तत्र ग्राहकत्वादिविशेषविगलनेन सामान्यरूपा येयं स्वरसवाहिनी चितिः, नेयम् अहमिति प्रतीयते, अतः कथमियमहन्तेत्याशङ्क्याह––

प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परावाग् या।
आद्यन्तप्रत्याहृतवर्णगणा सत्यहन्ता सा॥ ९॥

प्रत्यवमर्शात्मा विमर्शस्वभावा। असौ सर्वस्यैव स्वानुभवसिद्धत्वाद् असावित्यध्यक्षतया निर्देष्टुमुचिता। चितिः विगलितचेत्योपरागा चेतनस्य स्वरूपेणावस्थितिः। स्वरसवाहिनी निरोधकाभावादनिशं स्फुरद्रूपा। सा विमर्शमयत्वाद् वाक्। तत्रापि स्वरूपज्योतिष्ट्वेनैव प्रकाशनात् स्वरूपव्यतिरिक्तपश्यन्त्यादिरूपा नेयम्, अपि तु परैव, यदागमः––"स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी" (वा० प० स्वो० १। १४२) इति। शुद्धवाग्रूपत्वाद् येयं वर्णात्मिका, सा प्रत्याहारयुक्त्या गृहीताभ्यामकारहकाराभ्यामहन्तेति निरुच्यते, न पुनरहमिति प्रतीयमानतयैवेयमहन्ता॥ ९॥

नन्वहन्ता नामाहमो धर्मः। स कोऽन्य उपलभ्यते, यः प्रत्यवमर्शरूपचितिव्यतिरिक्तोऽहंव्यपदेशमर्हतीत्यत आह––

स्वपरावभासनक्षम आत्मा विश्वस्य यः प्रकाशोऽसौ।
अहमिति स एक उक्तोऽहन्ता स्थितिरीदृशी तस्य॥ १०॥

स्वं निष्क्रान्तप्रकाशात्मकं परं च प्रत्यवमर्शादिनीलान्तमवभासयितुं शक्तश्चेतनाचेतनात्मकस्य जगतः स्वात्मभूतो योऽयमस्ति प्रकाशः, स देशकालादिभेदकानां स्वात्मन्यसम्भवाद् एकोऽद्वितीयः सन्नागमेषु अहमिति आम्नातः। यस्य समनन्तरनिरूपितचरी प्रत्यवमर्शात्मिका दशैव अहन्ता। अत्रायमाशयः––योऽयं प्रत्यवमर्शादिनीलान्तस्य वेद्यस्यावभासको वेदनैकस्वभावः सर्वप्रमितिभाक् प्रकाशो नासौ स्वयमिति पर इति वा व्यपदेशमर्हति, तयोर्वेद्यत्वात्। अतः स एक एव, तस्य भेदकस्य प्रमाणस्यासम्भवात्।

तस्य प्रत्याहृताभ्यामकारहकाराभ्यामहमित्युक्तिरागमेषु। तत्रापि यद्यपि अहेति प्रकृतिमात्रमर्थवत्, तथापि केवलायाः प्रकृतेर्व्यवहारानर्हत्वादहमिति प्रत्ययसध्रीचीनतया व्यवहारः। तस्य कारणातायां येयमुद्भूतप्रत्यवमर्शता साऽहन्तेति ॥ १० ॥

नन्विदमिति वेद्यम्, अहमित्यहंप्रत्ययात्मको ग्राहकः, समनन्तरनिरूपितः प्रकाशश्चेति त्रितयमुपलभामहे। कथमुक्तार्थसिद्धिरित्यत आह––

विच्छिन्नाविच्छिन्ने इदमित्यहमित्युभे प्रथे तस्य।
आभास्याभासकतां स्फुटयन्त्यौ चेत्यचित्पदयोः ॥ ११ ॥

तस्य निरूपितस्य प्रकाशस्य धर्मभूते द्वे प्रथे भवतः––एका विच्छिन्ना मिथो व्यावृत्तिरूपा इदमित्येवमात्मिका, अन्या त्वविच्छिन्ना इदंप्रथापेक्षयाऽनुवृत्ता। तत्रेदंप्रथा चेत्यपदे आभास्यतां स्फुटयति, अहंप्रथा त्वाभासकतां चित्पदे। इदंप्रथा हि नीलमिदं पीतमिदमिति परस्परव्यावृत्तिरूपा। नहि तस्यामप्रसृतायां नीलादावाभास्यता प्रकाशते। अहंप्रथा तु नीलं पीतं च वेद्मीत्यनुवृत्तिरूपा। तत्प्रथनैकनिबन्धनमाभासकत्वं चित्पदे ॥ ११ ॥

एवं स्थिते––

एकः स आत्मनासौ नहि क्रमोऽस्तीह देशकालाभ्याम्।
भेदिनि मिथः स युक्तश्चेत्ये भेदाश्रयः खलु सः ॥ १२ ॥

स प्रकाश आत्मना एकोऽद्वितीय एव, न तु प्रकाशो ग्राहकश्चेति द्विरूपः। नन्विहेदानीं ग्राहकोऽस्मीति देशतः कालतश्च क्रमोऽस्ति। कथमैक्यमित्याशङ्क्याह––नहि क्रमोऽस्तीह देशकालाभ्याम्। अत्र प्रकाशे देशकालनिबन्धनः क्रमो भेदो नास्ति। तत्र हेतुः––चेत्ये मिथो भेदिनि स युक्तः। इदं नीलम् इदं पीतमिति भेदशालिनि चेत्ये नीलं पीतं च वेद्मीति स युक्तोऽनुवृत्तः। एतदेव हृदयङ्गमीकरोति––भेदाश्रयः खलु सः। चेत्यधर्मस्य भेदस्याश्रय एव ह्ययम्। भेदो हि नाम व्यावृत्तरूपता। अभेदोऽनुवृत्तरूपता। देशकालकृतो भेदश्चेत्य एवास्ति। तद्भेदाश्रयभूते चित्पदे भेदभ्रमस्तदुपाधिनिबन्धन एव ॥ १२ ॥

उक्तनयेन स्वरूपनिरूपणे न भेदः कश्चित् प्रकाशग्राहकयोः। अथ वेद्यमपि निरूप्यमाणं न प्रकाशाद् भिन्नमुपपद्यत इत्यभिप्रायेणाह––

स्वाङ्गे चिद्गगनात्मनि दुग्धोदनिभः स्वशक्तिलहरीणाम्।
सम्भेदविभेदाभ्यां सृजति ध्वंसयति चैष जगत् ।। १३ ।।

एष एव प्रकाशः स्वाङ्गे स्वस्वरूपे भित्तिभूते चिद्गगनात्मनि अनवच्छिन्नचिन्मये स्वशक्तीनां सम्भेदविभेदाभ्यां खेचर्यादिरूपाणां स्वरश्मीनां सम्भेदेन एकार्थग्रहणोन्मुखतया जगद् शिवादि सृजति अवभासयति विभेदेन, विज्ञातार्थवैमुख्येन ध्वंसयति संहरति च, यथोदधिर्लहरीणां सम्भेदेन तरङ्गबुद्बुदादीनि सृजति विभेदेन च संहरति। शिवादिवस्तु ग्रहणादर्वागपि गगनकल्पा चिदेवास्ति। अवबिभासयिषायां तु खेचरी गोचर्यादिक्रमेण शक्तीनामेककार्यपरतया बहिर्मुखीभावलक्षणेन सम्भेदेन सृजति। विमृष्टे वस्तुनि ताभिरेव कारणलयक्रमेण प्रत्यग्भावरूपं चिद्भेदमपागताभिः संहरति। ताः शक्तयस्तच्च जगत् प्रकाशबहिर्भूततया नास्तीति प्रतिपत्तिदार्ढ्याय प्रकाशस्योदधित्वेन शक्तीनां लहरीत्वेनार्थसामर्थ्यात् जगतस्तरङ्गादित्वेन रूपणं कृतम्। ततो जगत् तद्भेदस्तत्कारणभूता शक्तयश्च विमृश्यमानाः प्रकाश एवेत्युपपादितं भवति ।। १३ ।।

यतो ग्राह्यादि न किञ्चित् पृथगस्ति वस्तु, सर्वात्मकतया प्रकाश एवास्ति, अतो ग्राह्यादिभेदभ्रमसंस्कारोन्मूलनाय चितिरेवोक्तयुक्तिप्रत्यभिज्ञाता दार्ढ्यप्रतिपत्त्या भावनीयेत्याह--

रूपादिपञ्चविषयात्मनि भोग्यहृषीकभोक्तृरूपेऽस्मिन् ।
जगति प्रसरदनन्तस्वशक्तिचक्रा चितिर्भाव्या ।। १४ ।।

यदेतद् भोग्यतत्साधनभोक्तृरूपं विश्वम्, तद् विचार्यमाणं रूपादिपञ्चविषयात्मकमेव भवति। तथा हि यदा रूपं भोग्यत्वेन विषयो भवति तदा तद्ग्रहणसाधकं चक्षुस्तदात्मकं ग्रहीता च ताद्रूप्यमापद्यते। एवं रसादिष्वपीति भोग्यहृषीकभोक्तृरूपेऽस्मिन् जगति प्रसरदनन्तस्वशक्तिचक्रा व्याप्रियमाणनानाविधरश्मिपुञ्जा चितिर्भावनीया। अनेन वस्तूनामानन्त्यमिति, आनन्त्याद् भावनं दुश्शकमिति, चिद्व्यतिरिक्तत्वमेषां चेति ये भ्रमास्ते निरस्ताः ।। १४ ।।

इत्थं जगत् पञ्चधा संक्षिप्य चिदात्मकत्वं चावस्थाप्य पुनर्भावनालाघवाय त्रिधा संक्षिप्योपदिशति चिदात्मकत्वम्--

सोमरविवह्निलक्षणभोग्येन्द्रियभोक्तृभानपिण्डात्मा ।
बिन्दुर्विमर्शधर्मा षण्णामेकोऽध्वनां प्राणः ।। १५ ।।

भोग्यं सोमलक्षणं पराग्रूपत्वात्। इन्द्रियाणि रविलक्षणानि पराक्प्रत्यगात्मकत्वात्। भोक्ता वह्निलक्षणः प्रत्यगेकस्वभावत्वात्। एतत्त्रितयात्मकमेव विश्वम्, न व्यतिरिक्तं किञ्चित्। एषां भोग्यादीनां यो भानपिण्डो भोग्यत्वादिविशेषविगलनेन सामान्यात्मकं भानं तद्विमर्शमयं स बिन्दुरुच्यते। स बिन्दुरेक एव षण्णामध्वनां प्राणः उदयविश्रान्तिहेतुत्वादात्मभूतः। सोमाद्यभिमानिनीनां तिसृणां देवतानां पारमार्थिकं स्वरूपं विचार्यमाणं भोग्यादित्रयात्मकमेव, न तु तल्लीलाविग्रहमण्डलादिस्वरूपम्, मण्डलादेर्वेद्यरूपत्वेनेन्द्रियत्वभोक्तृत्वानुपपत्तेः। भोग्यादेश्च भोग्यादिविशेषरूपेण प्रतीयमानस्य निर्विशेषप्रतीत्यात्मको बिन्दुः प्राण इति बिन्दोरेव विकृतिः षड्विधोऽयमध्वा ॥ १५ ॥

एतदेव विशदीकर्तुमाह—

व्यक्तं हि पदार्थात्मकमिदं जगन्नित्यमेव तल्लग्नम्।
शक्त्यात्मकमव्यक्तं तत्रैव पुनर्निमज्जति च ॥ १६ ॥

जगदेतद् द्विविधं स्थूलं सूक्ष्मं च। स्थूलं व्यक्तमुच्यते। सूक्ष्मं च शक्तिरुच्यते। तत्र पदार्थात्मकं यदेतद् व्यक्तं जगद् तद् नित्यमेव तल्लग्नम् उदयादिदशासु सर्वदा बिन्दुशक्तिलग्नमेव। यत् पुनरव्यक्तं शक्त्यात्मकम्, तदपि तत्र निमज्जति। स्थूलतया सूक्ष्मतया वा प्रतीयमानं यद्यावदस्ति जगत्, तत् सर्वं प्रत्यवमर्शात्मकचितिबहिर्भावेन नोपपद्यते, जलबहिर्भावेन तरङ्गादिवदिति यावत् ॥ १६ ॥

अथ येयं चितिः, तामेव नानाविधसिद्ध्यपेक्षया विविधेति परिकल्प्य केचिदुपासते, न पुनरुपास्यं वस्त्वन्तरमस्तीत्यत आह—

षोडशधैनं नवधा षोढा भिन्दन्त्यथ त्रिधा च बुधाः।
आधारभेदलक्ष्यं बहुसिद्धिकरं च सेत्स्यन्तः ॥ १७ ॥

एनम् उपपादितरूपं बिन्दुम् आधारभेदलक्ष्यं षोडशाद्यात्मना भिन्नेष्वाधारेषु लक्ष्यत्वेन परिक्लृप्तम्। अत एव बहुसिद्धिकरम् आधारभेदोपाधिना सिद्धिवैविध्यावहं सेत्स्यन्तः साधकाः षोडशधा भिन्दन्ति आधारषोडशके षोडशात्मेति भावयन्ति, तथा नवधा षोढा त्रिधा च। अस्य षोडशादिरूपेण भेदेन आधाराणां षोडशादिभेदयोग उपाधिः, स्वरूपे भेदासम्भवात्। सेत्स्यन्त इति वदतोऽयमभिप्रायः—अलब्धैतत्स्वरूपप्रत्यभिज्ञानसिद्धयो मितयोगिन एवैवं भेदेनोपासते, न तु सिद्धाः। ते

तु चिदैक्यप्रतिपत्तिदार्ढ्यलक्षणजीवन्मुक्त्येकरसाश्रितिगैकात्म्येनैव सन्ततमुपासते ॥ १७ ॥

अथान्वयव्यतिरेकाभ्यामण्डस्य भावाभावरूपं बिन्दुं मार्ताण्डत्वेन निर्ब्रुवन् स त्वमेवेत्युपदिशति युगलकेन—

यस्य विमर्शस्य कणः पदमन्त्रार्णात्मकस्त्रिधा शब्दः ।
पदतत्त्वकलात्मार्थो धर्मिण इत्थं प्रकाशस्य ॥ १८ ॥
स्वेन विना मृतमण्डं स्वावेशबलेन जीवयन्नेकः ।
मार्ताण्डः परमोऽसौ परनभसि न किं त्वया दृष्टः ॥ १९ ॥

यस्य विमर्शस्येति वैयधिकरण्यम् । इत्थं प्रकाशस्य धर्मिणो धर्मित्वेनैवमुपपादितस्य प्रकाशस्य धर्मभूतो यो विमर्शोऽहन्तेति निरुक्तचरः, तस्य कणोंऽशमात्रमयं वर्णपदमन्त्रात्मकतया तत्त्वभुवनकलात्मकतया च प्रतिस्वं त्रैविध्यात् षडात्मकः शब्दार्थरूपोऽध्वा । असौ परमो मार्ताण्डो यस्य धर्मिण इति यः परामृष्टचरः प्रकाशः, असावेवापरस्य लौकिकस्य मार्ताण्डस्य प्रकाशकत्वात् परमो मार्ताण्डः । कथमस्य मार्ताण्डता । स्वेन विना स्वस्य विश्वोन्मुखीभावमन्तरेण मृतमण्डं निमिषितमेव । तच्छिवादि विश्वं स्वावेशबलेन स्वस्यैतदुन्मुखीभावमहिम्ना यतो जीवयति उन्मेषयति । ईदृशोऽसौ मार्ताण्डः परनभसि भौतिकस्य नभसोऽवच्छेदकत्वात् परे हृदयाकाशे त्वया न किं दृष्टः । किमिति निषेधकाक्वा दर्शनाभावं कालत्रयेऽपि निरस्यति । योऽसौ प्रकाशरूपो मृतस्याण्डस्यानुप्राणनात् परमो मार्ताण्डः, स परनभोव्यपदेशयोगिन्यभिव्यक्तिस्थाने हृदये त्वया सर्वदा दृश्यत एव, तस्यादर्शने वस्त्वन्तरदर्शनासम्भवात् । अतो हृदयावच्छिन्नतयैव प्रतीयमानो योऽयमनवच्छिन्नरसो प्रकाशः, स एव त्वमिति प्रत्यभिज्ञापितमिति ॥ १८–१९ ॥

प्रत्यभिज्ञातस्य विश्वोत्पादकत्वं विविच्य दर्शयति—

चिद्गगनक्षीरोदं स्वयमिच्छामन्दरेण संक्षोभ्य ।
तच्छक्तिवीचिभिरसावुत्थापयतीन्दुमण्डाख्यम् ॥ २० ॥

अनवच्छिन्नचिन्मयमब्धिं स्वयं स्वातन्त्र्येणैव इच्छामन्दरेण संक्षोभ्य अवबिभासयिषालक्षणेन गिरिणा कार्योन्मुखतां नीत्वा तच्छक्तिवीचिभिः

खेचर्यादिरूपस्वशक्तिरूपैरेवोर्मिभिरण्डाख्यमिन्दुमुत्थापयति स्वेच्छावशतः स्वाभिन्नमेव विश्वं स्वभित्तावेव त्वमिति प्रत्यभिज्ञापितः प्रकाशोऽवभासयतीत्यर्थः ॥ २० ॥

अथाण्डस्यावान्तरकक्ष्या विभागेनोपन्यस्य स्वात्मभित्तिलग्नतां स्वानुभवसाक्षिकतया दर्शयति—

शक्तिर्माया प्रकृतिः पृथ्वीति चतुर्विभागमण्डं यत् ।
यश्च विभागोऽस्य पुनर्बहुधा सर्वं स्थितं मयि तत् ॥ २१ ॥

शक्तिर्बिन्दुः । तेन कारणेन शुद्धाध्वलक्षणं कार्यमुपलक्ष्यते, मायया मिथ्याध्वात्मकम्, प्रकृत्या शुद्धेतरात्मकम्, पृथिव्या स्थूलभोग्यभोगायतनादि । इति चतुर्विभागं यदण्डं यश्चास्य विभागो भुवनादिरूपः, तत् सर्वं मयि स्थितं परस्मिन्नेव प्रकाशे वर्तते । स्थितमिति भूतार्थतायामविवक्षा, स्थितेस्त्रैकालिकत्वाद् इति शिवम् ॥ २१ ॥

इति विरूपाक्षपञ्चाशिकायां विवृतिसमेतायां प्रकाशैकात्म्यविवेचनस्कन्धो द्वितीयः

तृतीयः स्कन्धः

इयता सन्दर्भेण विश्वात्मकत्वमात्मनो युक्त्यनुभवोपपन्नतया प्रतिपादितम्। अथ निश्चितस्य वैश्वात्म्यस्यासम्भावनया विपरीत-भावनया वोपरागो मा भूदिति तृतीयस्कन्ध आरभ्यते। तत्र मयि स्थितमिति कथनेनाधाराधेयभावलक्षणेन योऽयं भेदः प्रतीतः, तं व्यतीहारे निरस्यति--

अहमेकोऽनस्तमितप्रकाशरूपोऽस्मि तेजसां तमसाम्।
अन्तःस्थितो ममान्तस्तेजांसि तमांसि चैकस्य॥ २२॥

अनस्तमितप्रकाशरूपो नित्योदितप्रकाशमयः एकोऽद्वितीयः तेजसां तेजस्त्वेनाभिमतानां बुद्ध्यादिकरणानामर्कादिज्योतिषां च अन्तःस्थितोऽस्मि प्रकाशमानत्वेन तेषामन्तरात्मतयाऽहमस्मि। तथा तमस्त्वेन प्रकाशमानत्वात् तमसां बिन्दुमायादीनां चान्तःस्थितोऽस्मि। प्रकाशात्मनि मय्यन्तरवस्थिते तेजस्तेजस्तया तमस्तमस्तया च चकास्यादित्याशयः। तानि तेजांसि तमांसि च ममान्तःस्थितानि प्रकाशात्मकोऽहमेक एव भावाभावात्मकजगद्रूपतया परिस्फुरामि। अतो न भेदस्याशङ्कितस्यावकाशः कश्चि-दिति भावः॥ २२॥

इत्थं ग्राहकसामान्यापेक्षया ग्राह्यापेक्षया च चितेरेवाभेदमुपपाद्य 'सः त्वम् अहम्' इति त्रिस्कन्धकस्याभासस्य भेदाभावं विवेचयितुमाह--

प्रथमो मध्यम उत्तम इति पुरुषा भेदिनस्त्रयोऽपि मिथः।
मत्तस्तु महापुरुषात् प्रत्यवमर्शात्मनो न बहिः॥ २३॥

'सः' 'त्वम्' 'अहम्' इति विजातीयव्यपदेशयोगाद् मिथो भेदिनः परस्परव्यावृत्तरूपा य एते प्रथमो मध्यम उत्तम इति त्रयः पुरुषाः, त एवैते प्रत्यवमर्शात्मनोऽनुवृत्ततया महापुरुषान्मत्तो न बहिः मद्व्यतिरिक्तं तत्त्वान्तरम्। य एते प्रथमादयः पुरुषास्ते मिथो व्यावृत्तरूपा अपि प्रत्यवमर्शात्मकमदायत्तसर्गापवर्गत्वाद् मद्भित्तौ मदेकात्मतया प्रतीयमानत्वात् न मद्बहिः॥ २३॥

ननु प्रथममध्यमपुरुषप्रतियोगित्वेन अहमित्यवच्छिद्यसे, अनवच्छिन्न-प्रकाशात्मकश्चासि। इत्थं भेदे कथमैकात्म्यमित्यत आह—

युष्मच्छेषापोहवदहमिति यद्भाति भिन्नमिह रूपम्।
तदिदं भागविभेदो न त्वहमेकोऽस्मि यन्नित्यम्॥ २४॥

युष्मदपोहवच्छेषापोहवच्च मध्यमप्रथमपुरुषाभ्यां व्यावृत्तमित्यर्थः। अत एव भिन्नं तदुभयप्रतियोगि यदेतद् अहमिति रूपं भाति। तदिदं भाग-विभेदः स इतिवत् त्वमितिवच्च ममांशविशेषः कश्चित्, न त्वहं न तु मे पारमार्थिकं स्वरूपम्। तत्र हेतुः—एकोऽस्मि यन्नित्यं नित्यम् अनवच्छिन्न-प्रकाशैकघनोऽस्मि यतः। प्रकाशैकात्मकत्वमनवच्छिन्नत्वात् सदातनं सत् तात्त्विकं मे स्वरूपम्। अहमिति तु रूपमवच्छिन्नत्वादागन्तुकं सत् स इत्यादिवदंशविशेष एवेति भावः॥ २४॥

यथा चैवं ग्राहको विशेषतो विविच्यमानोऽपि ममैवांशः, तथा ग्राह्य-मपि विशेषतो विविच्यमानं ममेव शक्तिप्रसर इत्याह—

द्यावापृथिवीदेशः कालोऽहो रात्रिरिति ययोः प्रसरः।
ते भानतिरोधिकृती शक्ति मे भाववृन्दस्य॥ २५॥

द्यौ पृथिवी चेति योऽयं देशः, यश्चाहो रात्रिश्चेति कालः, तदेतत् क्रोडीकृतग्राह्यान्तरं ग्राह्यद्वयं ययोरेव प्रसरः, ते भाववृन्दस्य भानतिरोधाने ममैव शक्ती। सर्वस्यैवार्थजातस्य यद् भानं यच्च तिरोधानं ते हि ममैव शक्ती। शक्तिसम्भेद एव खलु मे पदार्थानां भानम्, विभेद एव तिरोधान-मित्युक्तं प्राक् "स्वशक्तिलहरीणाम्। सम्भेदविभेदाभ्यां सृजति ध्वंसयति च" (१३ श्लो०) इति। इत्थं च भावनां भानतिरोधानरूपे ये एते शक्ती, तयोरेव प्रसरभूतोऽयं देशः कालश्च भावप्रतियोगितया अभावप्रतियोगितया च स्थितः। स मद्बहिर्भावेन नास्तीत्यर्थः॥ २५॥

भानतिरोधानाभ्यां यत् कृत्यान्तरमुपलक्षितम्, तद् विशेषतो विविच्य दर्शयति—

धूमावती तिरोधौ पुष्टौ ह्लादा च भास्वती भाने।
क्षोभे च परिस्पन्दा व्याप्तौ विश्वीति शक्तयः पञ्च॥ २६॥

धूमावतीति मे शक्तिः प्रथमे, पुष्टौ आप्यायने ह्लादाख्या, अवभासने भावस्ती, क्षोभे परिस्पन्दने स्पन्दाख्या, व्याप्तौ विभ्विति पञ्च मे शक्तयः ॥ २६ ॥

शक्तीनामप्रत्यक्षत्वात् कार्यमुखेनैव स्वरूपनिश्चय इत्यभिप्रेत्य कार्यमुखेनैव ता निरूपयति––

धूमावती पृथिव्यां ह्लादाप्सु शुचौ तु भास्वती प्रथते ।
वायौ स्पन्दा विभ्वी नभसि व्याप्तं जगत् ताभिः ॥ २७ ॥

इत्थं च सति जगत् षडध्वात्मकं विश्वमेताभिर्व्याप्तं ममैव धूमावत्यादिभिः पञ्चभिः शक्तिभिः क्रोडीकृतम् । अनेन सर्वदा पञ्चकृत्यकारित्वं चिदात्मनो दर्शितमिति मन्तव्यम् । तथा हि––अवभासनं सृष्टिः, स्थापनं क्षोभः संहरणं तिरोधानं स्वशब्देनैवोक्तम् । व्याप्तिरनुग्रहः ॥ २७ ॥

एवमाभासनादिभिर्निष्पादितं जगद्विमर्शशक्तिस्पर्शमात्रेण प्रकाशैकार्णवतामापद्यत इत्याह––'निजधर्मिणम्' इत्यादिभिः 'कात्स्न्येंनाविष्टमिव' इत्यन्तैश्चतुर्भिः श्लोकैः––

निजधर्मिणं प्रकाशं स्वरूपयन्ती प्रकाश्यवर्गस्य ।
शक्तिर्विमर्शरूपा शरीरयत्यखिलमस्य मम ॥ २८ ॥

विमर्शरूपा मम शक्तिः प्रत्यवमर्शरूपिणीयं चितिः, अखिलं मम शरीरयति शिवादिधरण्यन्तं विश्वं मदेकात्मतामापादयति । कीदृशी निजधर्मिणं धर्मभूतायाः स्वास्योदयलयादिभित्तिभूतमाश्रयं प्रकाशम् उपलब्ध्यैकरूपं चैतन्यं प्रकाश्यवर्गस्य स्वरूपयन्ती ज्ञेयजातस्य तात्त्विकस्वरूपत्वे व्यवस्थापयन्ती सर्वस्यैवास्य भेद्यजातस्य पर्यन्ते निर्बाधमवशिष्यमाणं स्वरूपं प्रकाश एवेति स्वानुभवसाक्षिकमुपदर्शयन्ती ममेयं विमर्शरूपा चितिशक्तिरखिलमेतच्छिवादिकमस्मान् मदीयमेवापादयति ॥ २८ ॥

तथाहि––

ज्ञातृज्ञानज्ञेयात्मकमखिलं मद्विमर्शवह्निशिखा ।
दग्ध्वा प्रकाशरूपं शुभ्रं भस्मावशेषयति ॥ २९ ॥

मद्विमर्शवह्निशिखा विमर्शोऽयं सर्वात्मव्यापकेन रूपेण सर्वाध्वव्यापकज्वालात्वेन प्रतीयते । ममायमीदृशो विमर्शो ज्ञातृज्ञानज्ञेयात्मकम् अखि

दग्ध्वा ज्ञातृत्वादिविशेषांशांस्तत्क्षणमेवोपमृद्य प्रकाशरूपं प्रकाशसामान्यात्मकं शुभ्रम् अकृत्रिमानन्दघनत्वात् क्लेशादिभिरकलुषितं भस्म सन्मात्रां विभूतिम् अवशेषयति तदेकार्णवीकरोति ॥ २९ ॥

ननु विमर्शसमनन्तरमेव वेद्यांशे भेदलय इति युक्तम्। ग्राहकांशे तु विमर्शनक्रियाकर्तुर्भेदेनावस्थानान्न कदाचिद् भेदकलानिवृत्तिरित्यत आह—

अकठोरमद्विमर्शज्वालाग्रस्ते तिरोधिमद् भानम्।
अङ्गारवदिव भस्म प्रथते तत्राणुवर्गस्य ॥ ३० ॥

तत्र ज्ञातृज्ञानाद्यात्मनि प्रक्रान्तेऽखिले अकठोरमद्विमर्शज्वालाग्रस्ते अहं विमृष्टानित्यहमंशे भेदावशेषणाद् अनतिप्रकाशितदाहशक्तिना मद्विमर्शेनाक्रान्ते सति अणुवर्गस्य भानं ग्राहकवर्गस्यावशिष्टा अहमिति प्रतीतिः। कीदृक्? तिरोधिमद् उपसंहृतवेद्यतया वेद्यांशाविनाभूतप्रसरेण भेदेनाच्छादितम् अङ्गारवद् भस्मेव प्रथते अन्तस्थितसूक्ष्माङ्गारभसितराशिकल्पतया प्रतीयते ॥ ३० ॥

यदि स एव दाहस्तीव्रस्तदा पश्येत्याह—

कात्स्न्येनाविष्टमिवारण्यपुराद्यग्निना मयापि जगत्।
चित्रमवधूय भेदं ननु गृह्णात्येकरूपत्वम् ॥ ३१ ॥

मया सर्वभेदोपसंहरणैकस्वभावविमर्शात्मना कात्स्न्येनाविष्टं निश्शेषतो विमृष्टं जगद् एतच्छिवादिभूम्यन्तम् अग्निना कात्स्न्येनाविष्टमरण्यपुरादिकमिव चित्रं नानाविधं भेदम् अवान्तरविशेषम् अवधूय स्वात्मनि निमग्नं कृत्वा एकरूपत्वं गृह्णाति प्रकाशैकघनीभवति। नन्वित्यनेनास्य सर्वानुभवसिद्धतामाविष्करोति ॥ ३१ ॥

कात्स्न्ये विमर्शाविष्टे जगति सर्वभेदभ्रमोपशमो भवतीत्युक्तम्। तमेव कात्स्न्येनावेशप्रकारं विविच्य दर्शयति—

अन्तर्मुखं स्वरूपं ज्ञेयस्य ज्ञानमस्य तु ज्ञाता।
ज्ञानस्य ज्ञातृतनोश्चितिरेकाऽस्यास्त्वहं नान्यः ॥ ३२ ॥

इह हि भावानां द्वे स्वरूपे भवतो बहिर्मुखमन्तर्मुखं च। तत्राद्यं स्थूलं व्यावृत्तमपारमार्थिकं च। यत् पुनरन्तर्मुखं तत् सूक्ष्ममनुवृत्तरूपं पारमार्थिकं

च। इत्थं स्थिते ज्ञेयस्य घटादेर्यद् अन्तर्मुखं पारमार्थिकं स्वरूपं तद् घट इ ज्ञानमेव, बाह्याकारस्य तत एवोदयात्, तद्भित्तिलग्नत्वेनैवावस्थाना तत्रैव च लयात्, अस्य तु ज्ञाता घटज्ञानस्यापि तदुदयस्थितिनिदानभूतो ग्राहक एवाभिमन्तृतारूपोऽन्तर्मुखं रूपम्। ज्ञानस्य ज्ञातृतनोश्चितिरे उक्तनयेन ज्ञेयाविभेदिनो ज्ञातृतामापन्नस्य प्रत्यवमर्शरूपा चितिरेवान्तरत तत्त्वम्। अस्यास्त्वहं नान्यः चितेरपि प्रत्यवमर्शलक्षणायाः प्रत्यवमर्शा निमज्जने निष्कृष्टप्रकाशात्मकः "अहमिति स एव उक्तः" (१० श्लो इति निरूपितचरोऽहमेव काष्ठाप्राप्तं तत्त्वम्, नान्यः कश्चिन्मद्व्यतिरि ऽर्थः। इन्द्रियार्थसम्पातसमनन्तरमयं घट इति योऽयं विकल्प उत्प तदुत्पत्तेरर्वाग् घटस्य घटत्वेन वा वस्त्वन्तरत्वेन वा व्यपदेष्टुमशक्यत ज्ञेयस्यान्तर्मुखं स्वरूपं ज्ञानमेव। ज्ञानस्यापि ज्ञात्रेकायत्तोदयलयस्य ज्ञा वान्तरतमं रूपम्, ज्ञातुरप्यनेनैन नयेन चितिरेव। चितेरप्यहमेवैकोऽ चरितं तत्त्वन्। इत्थं कार्त्स्न्येन विमर्शाग्न्यावेशे निर्विवादमेकस्वरूपत्वं ग्राह दीनां प्रकाशेन सहेत्युपदिष्टं भवति॥ ३२॥

इत्थं ज्ञेयादित्रयस्य प्रकाशापेक्षया भेदाभावमुपपाद्य मिथोऽपि न भे कश्चिदिति विवेचयति--

अक्रमता मे क्रमिकं ज्ञात्राद्यं सक्रमाक्रमा तु चितिः।
मद्वद् ज्ञाता ज्ञानं शक्तिरिव त्रितयवद् ज्ञेयम्॥ ३३

अक्रमता मे निकृष्टप्रकाशपरमार्थस्य मम चित्यादिचतुष्टयापे स्वापेक्षया चाक्रमत्वमेव, सर्वानुस्यूतरूपतया व्यावृत्तिलवस्याप्यसम्भव क्रमिकं ज्ञात्राद्यं ज्ञाता ज्ञानं ज्ञेयमिति मिथो व्यावृत्तरूपतया प्रतीतेस्त्रि मेतत्क्रमिकम्। चितिस्तु सक्रमाऽक्रमा ज्ञात्राद्यपेक्षया सक्रमा, मदपे त्वक्रमेति द्विरूपा। इति प्रबुद्धस्य ते प्रतीतिप्रकाराः। वस्तुतस्तु मद्वद् ज्ञा यथा चित्यादिचतुष्टयानुवृत्तेर्ममाक्रमत्वम्, तथा ज्ञानज्ञेयानुवृत्तेस्तदु पेक्षया मदपेक्षया च ज्ञातुरक्रमत्वम्। ज्ञानं शक्तिरिव यथा चितिर्ज्ञा पेक्षया सक्रमा मदपेक्षया त्वक्रमेति स्थितम्, तथा ज्ञानमपि ज्ञेयापे सक्रमं मदपेक्षया त्वक्रममिति शक्तिरिव। त्रितयवद् ज्ञेयं ज्ञाताहं चेति, शक्तिश्चेति, ज्ञेयान्तरं चेति त्रियतम् ज्ञेयम् एतत्त्रितयवत्। यथा ज्ञा चेत्यक्रमौ तद्वादावामप्यपेक्ष्य ज्ञेयमक्रमम्। अनयैव रीत्या शक्तिज्ञानापे सक्रमाक्रमम्। चितिस्तूभयापेक्षयोभयरूपेति यो भ्रमः स निरस्तः

ज्ञाताहं चेति, ज्ञानं शक्तिश्चेति, ज्ञेयं त्रितयं चेति न तत्त्वान्तरम् । अत्रैतदाकूतम्—इदं वनमित्यादौ तर्वपेक्षया वनस्य वनापेक्षया तरूणां चानुवृत्तिरेवेति सर्वत्राभेद एव । यदा तु चूतश्चम्पक इत्यादिप्रतीतिः, तदा वनापेक्षया चूतचम्पकयोरनुवृत्तिरिति न भेदः परम्परापेक्षया तु व्यावृत्तिरेवेति भेदः । इत्थं प्रकृतेऽपि प्रकाशापेक्षया समष्टिव्यष्ट्योश्च न भेदः, परस्परापेक्षया तु यथायोग्यमवस्थानम् । अतः सर्वत्रानुवृत्तक्रमत्वम्, सक्रमत्वं द्वैरूप्यं च व्यावृत्तमिति प्रकाशैकात्म्यमेव पारमार्थिकम्, भेदस्त्वविमर्शस्यैव विलसितमिति ॥ ३३ ॥

एतदेव विविच्य दर्शयति—

पीतादिषु हि न नीलं तेष्वत्र च भाति चाक्षुषं ज्ञानम् ।

न श्रौतादिषु तदपि ज्ञाता तेष्वत्र चानुगतः ॥ ३४ ॥

यदुक्तं ज्ञेयं ज्ञेयान्तरापेक्षया क्रमिकमेवेति, तदुदाहर्तुमाह—पीतादिषु हि न नीलं यदा हि पीतमिति प्रतिपत्तिः, न तदा नीलम् । एवं मिथो व्यावृत्तरूपत्वाद् ज्ञेयं ज्ञेयान्तरापेक्षया क्रमिकमेव । यच्चोक्तं ज्ञानशक्तिरिव सक्रमाक्रममिति, तदुपदर्शयति—तेष्वत्र च भाति चाक्षुषं ज्ञानं तेषु पीतादिष्वत्र नीले च, न श्रौत्रादिषु । तदपि श्रौत्रं श्रावणं ज्ञानं, तदपि चाक्षुषम् । एवं सक्रमाक्रमत्वाद् ज्ञानं शक्तिरिवेति युक्तम् । यच्चोक्तं मद्वद् ज्ञातेति, तदर्थमाह—ज्ञाता तेष्वत्र चानुगतः । तेषु पीतनीलादिषु चाक्षुषेषु । अत्र श्रौत्रादिके । अतः सर्वत्रानुवृत्तरूपत्वान्मद्वद् ज्ञातेत्यपि सिद्धम् ॥ ३४ ॥

यत इत्थमर्थस्वरूपनिर्णयः, ततः—

ज्ञातारं मां ज्ञानं शक्तिं त्रितयात्मकं पुनर्ज्ञेयम् ।

अविकल्पं भावयतः सोऽहं सा तत् त्रयं तच्च ॥ ३५ ॥

ज्ञातारं मामविकल्पं भावयतः सोऽहम् उक्तेन नयेन विकल्पहेतोरसम्भवाद् ज्ञातृप्रकाशावैकात्म्येन भेदसंस्कारोपशमादन्तर्दृढप्रतिपत्त्या परिशीलयतस्तद्भेदभ्रमापगमलक्षणा सिद्धिर्भवति । तथा ज्ञानं शक्तिम् अविकल्पं भावयतः सा तद् उक्तनयेनैव शक्तिज्ञानयोरभेदभावनादार्ढ्येन तदभेदप्रत्यभिज्ञानरूपा सिद्धिः । तथा च त्रितयात्मकं पुनर्ज्ञेयं तथा भावयतः त्रयं तच्च । वेद्यस्य प्रकाशज्ञातृभ्यां शक्तिज्ञानाभ्यां ज्ञेयान्तरेण सह (च) स्थितो

योऽयं दुरुत्तरो भेदभ्रमः, तस्य समूलोन्मूलनरूपा सिद्धिः सद्य एव। अत्र 'सोऽहं' 'सा तत्' 'अयं तच्च' इत्येषु त्रिष्वपि वाक्येषु भवतीत्यादिका क्रिया नोपात्ता, अपि तु तादात्म्यस्य स्वरूपमेव निवेदितम्। अतो नैतदेषामैकात्म्यं साध्यम्, अपि तु नित्यसिद्धमेवोक्ताभिर्युक्तिभिः प्रत्यभिज्ञायत इत्यनुसंहितमाचार्येण ॥ ३५ ॥

तत्र ज्ञातुः क्रमिकत्वस्य नित्यसोपाधिकत्वात् प्रकाशतादात्म्यं नित्यसिद्धमित्युपदिशति—

सन्तानान्तरवाहे ज्ञाता व्यावृत्तभासनः क्रमिकः।
जीवाख्यो मद्योगान्मद्वत् स्यादक्रमाभासः ॥ ३६ ॥

सन्तानान्तरवाहे नीलसंकल्पविकल्पाद्येकसन्तानसमनन्तरं पीतसङ्कल्पविकल्पादौ सन्ताने वहति सति व्यावृत्तभासनो ज्ञाता क्रमिकः 'नीलस्यावभासकोऽस्मि' 'पीतस्यावभासकोऽस्मि' इति परस्परपरिहाररूपेणावस्थितग्रहणत्वाद् ग्राहकः क्रमवान्। यदा चेत्थं क्रमिकता, तदैव चासौ जीवाख्यः, वस्तुतः शिवस्य सतोऽस्य जीव इति संज्ञा तत्कालमात्रमेव। मद्योगात् तु यदेतन्मयि क्रमिकत्वं तद् वेद्योपाधिकमेव। वस्तुतस्तु नीलस्य पीतस्य चावभासकत्वादनुवृत्तः सन् सर्वदा सर्वानुवृत्तप्रकाशात्मक एवास्मीत्येवंरूपत्वान्मम परप्रकाशस्य योगाद्वस्तुविमर्शलक्षणात् संस्पर्शात् मद्वत् स्यादक्रमाभासः। यथा प्रकाशो नित्यमक्रममेव भासते, तथा ग्राहकोऽपि। तस्यामेव पीतादिग्रहणदशायां प्रकाशैकात्म्येनाक्रममेवावभासते। अनेन प्रबुद्धस्य विश्वप्रतियोगित्वं यदा तदैव शिवत्वम्, यदा तु प्रतिनियतार्थप्रतियोगित्वं तदा ग्राहकत्वमिति द्वैरूप्यानतिक्रमाद् जीवत्वसंस्कारः सदानुवर्तत एवेति योऽयं भ्रमः स्थितः, स दूरतरमुत्सारित उक्तनयेन पीतादिग्रहणदशायामप्यक्रमपरिपूर्णैकघनप्रकाशात्मकशङ्करस्वभावत्वादित्युपदिष्टं भवति ॥ ३६ ॥

अथ वेत्त्रतिरिक्ततया वेद्यमिति वेदनमिति च कक्ष्याद्वयकल्पनं यावतीमेवास्ति विमर्शवन्ध्यां कालकलां तावदेवास्ति वेद्यं वेदनं च। विमर्शे तु कृते नोभयमप्यस्ति प्रकाशबहिर्भावेनेत्युपदिशति—

वेद्यं स्वक्रमविद्धां वित्तिमनुप्रविशदङ्गविषयाद्यम्।
वेदितरि वित्तिमुखतो लीनं तल्लक्षणं भवति ॥ ३७ ॥

अङ्गविषयाद्यं भोगायतनभोग्याद्यात्मकं देहपीतादि वेद्यम्। स्वकर्मविद्धां वित्तिमनुप्रविशद् "अर्थेनैव विशेषोऽस्ति निराकारतया धियाम्" इति नयेन योऽर्थ उपाधिस्ताद्रूप्यमापद्यमानं वेदनमनुप्रविशति, ग्रहणकौतुकोपरमादिन्द्रियव्यापारनिवृत्तौ पीतज्ञानं मम जातमिति वेदनात्मतामापन्नो। अथ वेदितरि वित्तिमुखतो लीनं वित्तिमेव मुखीकृत्य वित्तिलयसमये वेदितरि लीयते। तथा लीनं सत् तल्लक्षणं भवति ऊर्मौ लीनम् ऊर्मिलयमुखेनाब्धौ बुद्बुदादीव तदेकात्मतां वस्तुतः सतीमेवावलम्बते। इह प्रकाशस्यैव शिवादिवस्तुतदुदयस्थित्यादितद्भेदादिरूपप्रपञ्चात्मना स्फुरणात् प्रकाशबहिर्भूतं न किञ्चिदुपलभ्यते, न चोपपद्यते, नाप्युपयुज्यते। अतो वेत्तृवेदनादिविकल्पानामूर्म्यादिवत् तदभिन्नतयैव यदुन्मज्जनं तदेव वेत्त्रादिवस्तु सत्ता तदुदयादिस्तद्भेदश्च। अस्यार्थस्यैवं विमर्श एव शिवत्वम्। अमन्दो विमर्शः प्रबुद्धता। अविमर्शस्तु पशुत्वमित्युपदेशनिष्कर्षः॥ ३७॥

अथ यथा वेदकस्य 'सः' 'त्वम्' इत्यादिप्रत्ययविषयतया भेदमाशङ्क्य परिहृतः "प्रथमो मध्यमः" (२३ श्लो०) इत्यादिना, तथैव वेद्यस्यापि स्मृत्यादिप्रत्ययविषयतया भेदानाशङ्क्य परिहरति—

स्मृत्यनुभवानुसंहितिवशतस्तज्जगदिदं तथा तदिदम्।
स्वैर्यहमाभासयिता भिन्नं चापोहनेन मिथः॥ ३८॥

स्मृतिवशात् तदिति, अनुभववशाद् इदमिति, अनुसंहितिः प्रत्यभिज्ञा तद्वशात् तदिदमिति च शिवादि जगत् स्वैर्यहमाभासयिता स्वतन्त्रोऽहं सृजामि। कथं भिन्नं चापोहनेन मिथः मिथो व्यावर्तनेन भिन्नं चकारादभिन्नं च। सोऽयं स्वैरिम्णो महिमा। मिथो व्यावर्तनस्यान्यान्यनिमेषरूपत्वाद् भिन्नतया सृजामि, उक्तयुक्तिभिः प्रत्यवमर्शने कृते व्यावृत्त्यपगमादभिन्नतया च, विमर्शस्य व्यावृत्त्यात्मकनानानिमेषग्रसनैकस्वभावत्वात्। विमर्शशैथिल्ये हि 'तद्' 'एतद्' इत्यादि व्यावृत्तरूपतोदयः, कृते तु विमर्शे तदादिविशेषविगलनात् प्रकाशैकसाम्राज्यमिति भावः॥ ३८॥

उक्तरीत्या प्रकाशमेव भित्तित्वेनाश्रित्य तदभिन्नतयैव तदेतदादिभेदानामुदयलयाद्यनभ्युपगच्छतो भेदवादिनो बाधकं तर्कमाह—

स्मृतिरनुभवस्य भानं सोऽर्थस्य द्वौ सहानुसन्धानम्।
त्रितयमपि मां विनैकं क्रमरहितं न घटते विदुषाम्॥ ३९॥

अनुभवस्य भानम् अयं नील इत्याद्यर्थविषयस्य ज्ञानस्य यदेतद् भानं, तन्नीलाद्यर्थव्यपेक्षया स्मृतिः। सोऽर्थस्य स इति स्मृतिमूलभूतानुभवः परामृश्यते। अर्थस्येत्यत्र भानमित्यनुकृष्यते। अर्थस्य भानं त्वनुभव इत्यर्थः। द्वौ सह तावेतौ स्मृत्यनुभवौ द्वावपि दृष्टचरार्थप्रतिसन्धानवेलाया-मेकप्रत्ययतापन्नौ अनुसन्धानं प्रत्यभिज्ञोच्यते। तदेतद् क्रमिकं त्रितयमपि क्रमरहितं मामेकं विना न घटते सर्वप्रमितिभाजनमत एवानुस्यूतं प्रकाशमेकमन्तरेण नोपपद्यते। यद्यक्रमिकः सर्वानुसन्धाता प्रकाशो नाभ्युपगम्येत, तदा क्रमिकाभिमतं तदेतदित्याद्यपि निर्भित्तिकं चित्रमापद्येतेत्यर्थः॥ ३९॥

यत इत्थम्, अतः—

अस्तमितमर्थजातं भात्वा भिन्नमिव रुद्धतद्भानम्।
मद्भानैकात्म्येन स्रोत इवाब्धौ स्थितं हि मयि॥ ४०॥

अर्थजातं भिन्नमिव भात्वा वस्तुतो भेदासम्भवाद् इदंनीलज्ञानस्या-प्युपशमावसरे नीलमस्तमितमिति च भानं रुणद्धि प्रकाशस्यान्तरवमज्ज-यति। तथाभूतं तु मद्भानैकात्म्येन वर्तते। अथार्थजातमपि प्रकाशात्मकमेव प्रान्ते भवतीति भावः॥ ४०॥

इति श्रीविरूपाक्षपञ्चाशिकायां विवृतिसमेतायां
विमर्शस्कन्धस्तृतीयः

चतुर्थः स्कन्धः

अथ चतुर्थो विभूतिस्कन्ध आरम्भणीयः। तत्र विभूत्याविर्भावाङ्गत्वेनाप्रबुद्धादीनां प्रतीतिप्रकारः प्रथमं निरूप्यते 'मत्स्थमपि' इत्यादि श्लोकचतुष्केण। तत्राप्रबुद्धः, प्रबुद्धकल्पः, प्रबुद्धः, सुप्रबुद्धकल्पः, सुप्रबुद्ध इति पञ्च प्रमातारः। तेषु यस्य यादृशी प्रतीतिः, तां विभज्य दर्शयति——

मत्स्थमपि भुवनवृन्दं बहिरिव मद् भाति मायया भविनाम्।
अथ विद्यया भवेद् भवपदिनामन्तर्बहिष्ट्वेन ॥ ४१ ॥

मत्स्थमपि उक्तन्यायेन प्रकाशात्मतया मद्भित्तिलग्नमपि भुवनवृन्दम् अनाश्रितादिकालाग्न्यन्तं भुवनमण्डलं भविनां बहिरिव मद् भाति। भवो भेदप्रतिपत्तिः, तद्वतां सांख्यादिसिद्धान्तानाम्। तत्र हेतुः मायया अभिन्ने वस्तुनि भिन्नप्रतीत्यात्मिकया मायया। भवपदिनां तु येषां भवो नास्ति तत्संस्काररूपं तु भवास्पदमस्ति ते भवपदिनो विद्याप्रमातारः सम्प्रज्ञातसमाधेरर्वाक्पर्वप्रविष्टाश्च, तेषाम् अन्तर्बहिष्ट्वेन भवेद् अन्तःसङ्कल्पादिरूपतया भिन्नमिवाभाति। तत्र हेतुः—— विद्ययेति शुद्धया ॥ ४१ ॥

अथानयोर्यस्य बहिर्भाति, सोऽत्र संविदुपदेशे योग्यः पशुरित्याह——

ग्राहकमेवं त्वजडं जडमन्यद् ग्राह्यमस्य यो मनुते।
मायाविमोहितात्मा बोध्यः सोऽणुर्भवी सद्भिः ॥ ४२ ॥

ग्राहकम् अजडं चिदात्मकम्, ग्राह्यं जडमचिदात्मकम्, अन्यच्च मनुते यः स मायाविमोहितात्मा येयं ग्राह्याभिमते वस्तुनि जडत्वेनान्यत्वेन च प्रतीतिः, सैव माया, तया विमोहितात्मा अप्रत्यभिज्ञातस्वरूपः, अत एव भवी सद्भिर्बोध्योऽणुः प्रत्यभिज्ञातस्वरूपैर्गुरुभिरुपदेश्यः पशुः, यदागमः——

अन्यतन्त्रेषु ये मुक्ता धर्माधर्मक्षयान्नराः।
तेऽत्र रुद्राणवः प्रोक्ताः कालकर्मविवर्जिताः ॥ इति।

अनेन तार्किकमीमांसकादीनामप्रत्यभिज्ञातचेत्यविविक्तचित्स्वरूपाणां सच्छास्त्रोपदेशे नैवाधिकार इत्युपदिष्टं भवति। तेषु संवित्तिसिद्धान्तप्रकाशने प्रत्यवायश्रुतिश्च––

अन्यायात् कथनं कुर्वन्नकाले मृत्युमाप्नुयाद् ॥ इति।

अतः पशुषु संवित्तिसिद्धान्तार्थो गोपनीय इति शिवाज्ञा सर्वथा नोल्लङ्घनीयैव ॥ ४२ ॥

एवमप्रबुद्धस्य प्रबुद्धकल्पस्य च प्रतीतिप्रकारो विविच्य दर्शितः। यस्तु प्रबुद्धः, तस्येदानीं विवेचयति––

जडतात्मिकामिदन्तामथाजडत्वात्मिकामहन्तां च।
सामानाधिकरण्यादिदमहमिति बुध्यते द्विपदी ॥ ४३ ॥

द्विपदी भवोद्भवोभयसंस्कारवशात् भेदाभेददशावस्थितो जडतात्मिकामिदन्ताम् इदमिति प्रतीयमानं जडं वस्तु अथाजडत्वात्मिकामहन्तां च अजडमिति प्रतीयमानमहंवस्तु च सामानाधिकरण्याद् अभेदारोपणेन भेदांशमवमज्जयन् इदमहमिति बुध्यते स्वशरीरकल्पतया द्वैरूप्येण पश्यति। सेयमीश्वरदशा ॥ ४३ ॥

अथ यः सुप्रबुद्धकल्पो यश्च सुप्रबुद्धः, तयोः प्रतीतिप्रकारं विवेचयति––

उद्भविनां केवलया निमग्नमन्तःपदे दृशा भाति।
मग्नोन्मग्नोभयविधमुन्मनया मयि पुनः पूर्णे ॥ ४४ ॥

अभेदप्रतिपत्तिलक्षणं कैवल्यमुद्भवः। तद्वताम् अन्तःपदे अहमात्मके स्वरूपे निमग्नं भाति इदंप्रतीतिविषयं वेद्यं निमिषितं प्रतीयते। केन हेतुना दृशा विमर्शशक्त्या। इयमहन्ताच्छादितास्फुटेदन्तामयी सदाशिवदशा। अतः सुप्रबुद्धे अत एव पूर्णे मयि प्रकाशे मग्नोन्मग्नोभयविधं निमिषितत्वेनोन्मिषितत्वेन च द्विरूपं प्रतीयते। यथा हि जलधौ तरङ्गादि निमिषदुन्मिषच्च भवति, सर्वस्यामेव दशायां जलधिरेव तत् तथा शिवादि विश्वं मदात्मकमेव सदुन्मिषति, मद्व्यतिरिक्तं च मय्येव निमिषतीति। एवं वस्तुयाथात्म्यप्रत्यभिज्ञाने हेतुः, उन्मनया स्वस्वरूपावस्थितिरेवोन्मना, यदागमः––

उन्मना सा तु विज्ञेया मनो यत्र न विद्यते। इति ॥ ४४ ॥

एवमुपदिष्टं प्रतीतिक्रमं पर्यालोचयतो यदोन्मनया पूर्णत्वसिद्धिरविचला, तदा स योगी सिद्धः सुप्रबुद्ध उच्यते। तस्येच्छामात्रेणाभिमतानां

विभूतीनामाविर्भावो भवतीत्याह श्लोकाष्टकेन। तत्रापरसिद्ध्याविर्भाव-प्रकारं प्रपञ्चयति—

रविसोमतडिद्वज्राम्बुदवाडवजलधिगिरिगुहारण्यैः ।
दृढभावितात्मभावैर्योगी तत्कर्म निर्वहति ॥ ४५ ॥

वज्रं दम्भोलिः। दृढभावितात्मभावैः दृढमात्मत्वेन भावितैः रव्यादिभिः योगी तत कर्म निर्वहति रव्यादिष्वर्थेषु यद्यज्जगत्प्रकाशनादि कर्म तत्तन्नित्यसिद्धं सदेव प्रत्यभिज्ञानदार्ढ्याद् अर्थक्रियाकारितालक्षणं निर्वाहं नयतीत्यर्थः। अत्रैतदाकूतम्——उक्तनयेन रव्याद्यर्थरूपेण स्वयमेवावतिष्ठते, विमर्शदौर्बल्येन तु विभिन्न इव स्थितः। प्रबलेन विमर्शेन भेदभ्रमसंस्कारापगमे विश्वात्मकस्य सतः सर्वा एव सिद्धयो नित्यसिद्धा एव प्रत्यभिज्ञानदार्ढ्यादर्थक्रियाकारिण्यो भवन्तीति सर्वत्रैव सिसाधयिषुणा विश्वात्मकपरिपूर्णपरप्रकाशात्मकस्वस्वरूपादविचलतैव रव्याद्यात्मकत्वभावना सर्वात्मकत्वभावनाशेषतां नेतव्येति श्रीगुरवः॥ ४५॥

या देवता यमर्थं करोति तेनार्थिनो दृढं तस्याम् ।
विधृताहङ्कारस्य क्षणेन सोऽर्थः समायाति ॥ ४६ ॥

या देवतास्ति लोके हेरम्बभारतीहरिहरादिका, सा यं यमर्थं करोति प्रत्यूहध्वंसवाक्प्रवर्तनपालनसंहरणादिकं कार्यं निष्पादयति, तेनार्थिनः तेन प्रयोजनवतः तमर्थं सिसाधयिषोरित्यर्थः। तस्यां दृढं विधृताहङ्कारस्य तस्यामविचलत्वेनैकात्म्यमनुसन्दधतो योगिनः क्षणेन सोऽर्थः समायाति सोऽर्थो निर्विलम्बं सिद्ध्यति॥ ४६॥

अथ तत्र सिद्धिराह—

धारणसंग्रहपाकव्यूहाप्रतिघातलक्षणैर्भूतैः ।
स्वस्वनिविष्टाहन्तैर्योगिन इष्टा क्रिया भवति ॥ ४७ ॥

धारणलक्षणं भूतं पृथिवी। संग्रहलक्षणमापः। पाकलक्षणं तेजः। व्यूहोऽवयवसंहननम्, तल्लक्षणं वायुः। अप्रतिघातोऽव्याहतप्रसरत्वम्, तल्लक्षणमाकाशः। एतैः पञ्चभिर्भूतैः प्रतिस्वं दृढमात्मत्वेनानुसंहितैः योगिन इष्टा क्रिया भवति सिसाधयिषितधारणादिकर्मसिद्धिर्भवति॥ ४७॥

इति तन्मात्राकर्मज्ञानेन्द्रियमानसास्मिताधीषु ।
अव्यक्ते पुंसि तथा धृतचितिशक्तिश्च तत्कर्मा ॥ ४८ ॥

अस्मिताहङ्कारः। एतेषु तन्मात्रादिपुमन्तेषु तत्त्वेषु इति धृतिचितिशक्तिः उक्तेनैव नयेन विधृताहङ्कारः। स च तत्कर्मा तत्तत्कर्मसिद्धिमान् भवति ॥ ४८ ॥

रागनियत्योः काले विद्याकलयोर्गुहासरस्वत्योः।
ईशसदाशिवशक्तिषु शिवे च तद्वत् कृताहन्तः ॥ ४९ ॥

गुहा माया। सरस्वती शुद्धविद्या। तद्वदिति तत्कर्मेत्यनुकृष्यते ॥ ४९ ॥

प्रसङ्गाच्छुकादीनां सिद्धयः क्षोदीयस्य इत्याह—

शुकवामदेवयोरपि कृष्णदधीच्योस्तथा च वत्यस्य।
भूतात्मयोगजं खल्व षें वैश्वात्म्यमाख्यातम् ॥ ५० ॥

भूतात्मयोगजं पञ्चभूतधारणोद्भवम्। वैश्वात्म्यं भूतपञ्चकात्मप्रपञ्चरूपम्। आर्षे इतिहासादौ शास्त्रे। उक्तास्वेतासु सिद्धिषु गुहासिद्धयन्ता अपराः, अन्याः पञ्च पराः सारस्वत्यादिसिद्धयः ॥ ५० ॥

अथेदानीं सर्वसिद्धिमूर्धन्यं सिद्धिद्वयं श्लोकाभ्यामाह—

कालाग्निकोटिदीप्तां दाहे पाशोच्चयस्य पटु तृप्तौ।
अमृतौघवृष्टिमूर्तिं स्मर शक्तिं भव गुरुर्जगतः ॥ ५१ ॥

कालाग्निकोटिदीप्तां प्रलयप्रबुद्धकालाग्निकोटिवत् सर्वाध्वनिर्दाहक्षमानवच्छिन्नज्वालाजालरूपतया दीप्यमानाम्। पाशोच्चयस्य दाहे शक्तिं पटु स्मर षडध्वलक्षणस्य पाशस्य दाहरूपायां शुद्धौ चितिं निरर्गलमनुसन्धेहि। तृप्तौ अमृतौघवृष्टिमूर्तिम् आप्लावनलक्षणायां तु शुद्धौ तद्वदेव सर्वाध्वक्रमणक्षमानवच्छिन्नसुधासमुद्रसहस्रसम्पातमयीं पटु स्मर। अत्र दाहाप्लावनाभ्यां सकलीकरणमप्युपलक्ष्यते यदुक्तमाचार्यप्रवरैः—

कालाग्निकोटिरुचिमम्ब ! षडध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम्।
श्यामां घनस्तननतां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥ इति।

अत इष्टदेवतामूर्त्यात्मकसङ्कल्पकोटिमयत्वेन विश्वानुचिन्तनलक्षणं सकलीकरणमप्युपदिष्टं मन्तव्यम्। भव गुरुर्जगतो यावतोऽध्वनः शुद्धि

कृता, तावतो निश्शेषस्यैव जगतोऽनुग्रहीतृतया गुरुराचार्यप्रवरो भूयाः। अत्रैतदाकूतम्––यदेतच्छोधनं क्रियते न तदस्य देहात्मकतया संक्षिप्तस्य षडध्वसंघातस्य, अपि तु सर्वस्यैव, उक्तनयेन सर्वस्यैवाचार्यादेर्विश्वशरीरत्वात्। न ह्येतदाचार्यादित्वं यत् प्रतिनियतदेहेन देहित्वम्। अतो विश्वशरीरेण सता विश्वस्यैव शुद्धिः कार्येति शास्त्रोपपादितयुक्तिक्रमेण प्रकाशैकात्म्यमस्य विश्वस्य पश्यतो यत् स्वरूपावस्थानं स सर्वस्यैवाध्वनो दाहः। तदेव च प्रकाशैकात्म्यं विमृश्यमानं चिच्चमत्कारात्मकमाप्लावनम्। "प्रकाशस्य विमर्शैकघनताप्रत्यभिज्ञानदार्ढ्यात् परानन्दाविर्भावः सकलीकरणम्" इति श्रीमद्योगीश्वराचार्यपादाः ॥ ५१ ॥

एवं गुरुलाभरूपां परामाद्यां सिद्धिमुपदिश्य द्वितीयामप्युपदिशति––

ख्यातिमपूर्णां पूर्णख्यातिसमावेशदार्ढ्यतः क्षपय।
सृज भुवनानि यथेच्छं स्थापय हर तिरय भासय च ॥ ५२ ॥

सारस्तवायं सर्वोपदेशनिष्कर्षः। अपूर्णा पूर्णा चेति ख्यातिद्वयमेवास्ति, न वस्त्वन्यत्। तत्र पूर्णख्यातिं वस्तुभूतां सुदृढमवष्टभ्य कादाचित्कत्वादवस्तुभूतामपूर्णां ख्यातिं क्षपय प्रतिक्षणमनुसन्धानदार्ढ्यादुन्मूलय। तथा क्षपयन् सृज भुवनानि यथेच्छं स्थापय हर तिरय भासय च। तथावस्थितस्य ते ये स्वस्वरूपावारकतया सम्मता पदार्थानामाभासनशक्त्यादयो विकल्पाः, त एव ते जगत्सृष्ट्यादिरूपतया प्रत्यभिज्ञाताः सर्वसिद्धिसमष्ट्यात्मकं पारमैश्वर्यमाविष्करिष्यन्ति। अत एवं स्वरूपे नित्यमवतिष्ठस्वेत्युपदेशसर्वस्वम्। अत्र 'रविसोम' इत्यादिषु शिवान्तासु विभूतिषु 'तत्कर्म निर्वहति' इत्यादिना ताटस्थ्यप्रकाशनात् 'समरशक्ति भव गुरुर्जगतः' इति, 'अपूर्णख्यातिं क्षपय भुवनानि सृज' इति च सादरमुपदेशाच्च पक्षपातः प्रत्याय्यते। अत एवं प्रत्यभिज्ञातस्वरूपेण सिद्ध्यन्तरस्याभासभूतत्वात् तदभिनिवेशो न कार्यः। अग्रे तु सिद्धिद्वये नित्यप्रत्यवमर्शाभिनिवेशिना भवितव्यमित्यनक्षरमुपदिश्यत इति शिवम् ॥ ५२ ॥

अथ शास्त्रमुपसंहरन्नाह––

इति बोधितः स इन्द्रो देवेष्वधिकारमलमपोह्य स्वम्।
आविष्टशक्तितत्त्वः शिववदपश्यत् स्वमात्मानम् ॥ ५३ ॥

इति प्रथमस्कन्धेन शरीरबाह्याभिमते शिवादिवस्तुनि शरीरतां सोपपत्तिकं प्रत्यभिज्ञाप्य अथ विश्वशरीरत्वशुद्धौ द्वितीयस्कन्धेन शरीर-

त्वेन प्रतियोगिभूतस्य सतः स्वस्वामिभावलक्षणं भेदभ्रममपनेतुं विश्वस्य प्रकाशैकघनत्वमुपपत्तिभिः स्थिरीकृत्य तथा स्थिरीभूतस्य वैश्वात्म्यस्य विपरीतभावनादिभिर्दोषैर्दौर्बल्यं मा भूदिति तृतीयस्कन्धेन विविधान् वैश्वात्म्यविमर्शनप्रकारानुपदिश्य चतुर्थे स्कन्धेन सिद्ध्याविर्भावं जगद्गुरुत्वशिवत्वयोर्महासिद्ध्योर्नित्यसिद्धत्वप्रत्यभिज्ञानलक्षणां महासिद्धिं चाविचलामुक्त्वा बोधितो वस्तुयाथात्म्यं सम्यक्प्रत्यभिज्ञापितः स इन्द्रः स्वं देवेष्वधिकारमलमपोह्य स्वर्गस्याहमधिपतिरिति परस्वरूपसंकोचलक्षणं पशुत्वमवधूय स्वात्मानं शिववदपश्यत् शिवो भगवत्त्वेन पुरोऽवस्थिताः श्रीमदाचार्यविरूपाक्षनाथपादाः, एवं बोधितस्य तस्य गुरुव्यतिरेकेण शिवान्तरासम्भवात् तद्वदपश्यत्। न तदानयोर्बोध्यबोधकयोर्ज्ञाने तारतम्यकला काचित्, अपि तु 'जगतोऽस्य गुरुः साक्षात् परमेश्वर एवास्मि' इति निष्प्रत्यवायं प्रत्यपद्यतेति शिवम् ॥ ५३ ॥

स्वरूपप्रत्यभिज्ञानमनायासेन लिप्सुभिः।
पञ्चाशिकासु विशदा वृत्तिरेषा निषेव्यताम् ॥

कृतेयं विवृतिर्लघ्वी श्रीविद्याचक्रवर्तिना।
गोविन्दचन्द्रधीनाम्नि निकषे विनिवेशिता ॥

नमः शिवाय गुरवे देवायानन्दमूर्तये।
परब्रह्मस्वरूपाय देवदेवाय शम्भवे ॥

इति श्रीविरूपाक्षपञ्चाशिकायां महामाहेश्वरविद्याचक्रवर्त्तिकृतविवृतिसमेतायां विभूतिस्कन्धश्चतुर्थः ॥

इति विरूपाक्षपञ्चाशिका

ॐ सच्चिदानन्दाय नमः

अथ

त्रिपुरामहिमस्तोत्रम्

श्रीदुर्वासोमुनिप्रणीतम्

श्रीनित्यानन्दविरचितटीकासमलङ्कृतम्

श्रीश्रीविद्यानन्दनाथाङ्घ्रियुग्मं स्मृत्वा स्वान्तध्वान्तभानुप्रभावम्।
सर्वोत्कृष्टं क्रोधभट्टारकोक्तं स्तोत्रं श्रीमत्सुन्दरी श्रीमहिम्नः ॥१॥
पूर्वं कैश्चिद् व्याकृतं नेति भीतो गूढार्थत्वादल्पबुद्धिस्तथापि।
शिष्टैरिष्टैरीरितोऽहं गुरूक्त्या नित्यानन्दः सादरं व्याकरोमि ॥२॥

न शब्दशास्त्रव्युत्पत्तिर्न न्यायनिपुणा मतिः।
केवलं गुरुपादाब्जस्मृतिरत्र गतिप्रदा ॥३॥

त्रैलोक्यवन्द्यं गिरिजाभिनन्द्यं विज्ञानगम्यं वरदं वरेण्यम्।
विघ्नौघभङ्गाय च कार्यसिद्ध्यै विश्वेश्वरं विश्वगुरुं नमामि ॥४॥
कुलारविन्दादकुलारविन्दं गत्वाऽमृतौघैरनुषिच्यमानाम्।
रसारविन्दानि निजारविन्दे पुनः प्रयान्तीं प्रभजे परेशीम् ॥५॥

इह खलु सकलागमाचार्यचक्रवर्ती साक्षाच्छिव एवाऽनसूयागर्भसंभूतः क्रोधभट्टारकाख्यदुर्वासा महामुनिः श्रीमहात्रिपुरसुन्दर्याः सानुभावं महिमस्तोत्रं चिकीर्षुरादौ कूटत्रयदेवताभावनारूपं मङ्गलमाचरति—

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम्।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम्॥ १॥

हे श्रीमातः, ते वपुर्मे स्वान्ते स्फुरतु। कथंभूतं वपुः? उद्यद्भानुसहस्रनूतनजपापुष्पप्रभम्। पुनः कीदृशम्? त्रिलोकीमहासौन्दर्यार्णव-

मन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम्, त्रिलोकनिलयम्, ज्योतिर्मयम्, वाङ्मयं चेत्यन्वयः। हे श्रीमातर्हे श्रीजननि। हे त्रिपुरे त्रितयमात्ररूपे। परात्परतरे सूक्ष्मात्सूक्ष्मे। देवि दिव्यक्रीडारसपरे। त्रिलोकीमहासौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम्, त्रिलोकी त्रयाणां लोकानां समाहारस्तस्या महासौन्दर्यमेवार्णवस्तन्मन्थनोद्भवायाः सुधायाः प्राचुर्यस्य यो वर्णोऽत्युज्ज्वलत्वं तद्वत्, इत्यनेन वाग्भवकूटदेवताभावना प्रतिपादिता। उद्यद्भानुसहस्रनूतनजपापुष्पप्रभम् उद्यद्भानवो बालार्कास्तेषां सहस्राणि नूतनजपापुष्पाणि च अनुदितसूर्यकालीनो जपापुष्पाणि च तेषां प्रभेव प्रभा यस्य, इत्यनेन कामराजकूटदेवताभावना प्रतिपादिता। ते श्रीमहात्रिपुरसुन्दर्याः, वपुः स्वरूपम्। स्वान्ते हृदये। मे उपासकस्य। स्फुरतु भावनागोचरं भवतु। त्रिलोकनिलयं त्रिलोकं नितरां लीयते यस्मिन्, यच्छायायां मग्नं भवति। अथवा त्रिलोकस्य निलयमुत्पत्तिस्थानं कामकलारूपम्। वामकेश्वरतन्त्रादौ कामकलाक्षरादेव सृष्ट्यादेरुक्तत्वात। एतद्विवरणं कामराजकूटप्रभाववर्णने षष्ठश्लोके वक्ष्यति च। ज्योतिर्मयं ज्योतींषि सूर्याग्निसोमादीनि तन्मयम्। वाङ्मयं परापश्यन्तीमध्यमावैश्वरीरूपम्। तृतीयकूटस्थ सौभाग्यप्रदत्वाज्ज्योतिर्मयत्वं सारस्वतत्वाद्वाङ्मयत्वं च, ज्योतिषः सामयजुःशुक्लभास्वरत्वात्। अनेन तृतीयकूटभावना प्रतिपादिता। एवं महात्रिपुरसुन्दरीरूपस्य त्रिविधभावनयाऽवश्यं सौभाग्यं वाक्प्रदत्वं प्रतिपादितम्। अतः परं विद्योद्धारपक्षे व्याख्यानम्। तत्र श्री श्रीबीजम्, मा मायाबीजम्, अतोऽतः परं त्रिपुरा त्रिबीजवती। बालाद्वयं तु संप्रदायबलात्, अन्तर्मुखैरेव ज्ञेयम्। ई प्रणवः। एतद्विवरणमष्टमश्लोकव्याख्याने स्फुटीभविष्यति। परात् मायाबीजात् परतरा लक्ष्मीः श्रीबीजं देवीति सम्बुद्धिः। त्रिलोकी त्रिकूटा तस्यास्त्रितयमात्ररूपतया कूटत्रयेण लोकत्रयव्यापकता प्रसिद्धैव सौन्दर्यपदेन बालायास्तृतीयं कूटमुट्टङ्कितम्। अर्णवोद्भवसुधाप्राचुर्यवर्णोज्ज्वलमिति पदेन बालाया वाग्भवत्वं सूचितम्, तस्यामृतमयत्वेन वाक्प्रदत्वात्। उद्यदादिपदेन बालायाः कामकूटत्वं सम्भावितम्, तस्य सिन्दूरवर्णत्वेन वश्यप्रदत्वात्। ते वपुरित्यनेन मायाबीजं स्वान्ते स्वस्या विद्याया अन्ते मे इत्यत्र माशब्देन श्रीबीजम्, ईशब्दः कामकलावाचकः। एवं रूपं महाविद्याश्रीषोडशाक्षरीस्वरूपं साधकस्य हृदये स्फुरत्विति। इदं सर्वथैव गोप्यमपि मया सांकेतिकशब्दैः शिष्टानां साधकानां परितोषार्थं प्रकटीकृतम्॥ १॥

इदानीं मूलाधारचक्रस्थितां सकलविद्यामन्त्रचक्रकारणभूतां मूलाधरादिचक्रविभेदेन क्रमेण सहस्रदलकमलकर्णिकान्तर्महामध्यत्रिकोण-सिंहासननिविष्टां चिद्रूपिणीं प्रस्तौति––

आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते ।
ब्रह्माण्डाब्जमहासने जननि ते मूर्ति भजे चिन्मयीं
सौषुम्णायतपीतपङ्कजमहामध्यत्रिकोणस्थिताम् ॥ २ ॥

हे जननि, सौषुम्णायतपीतपङ्कजमहामध्यत्रिकोणस्थितां ते मूर्ति ब्रह्माण्डाब्जमहासनेऽहं भजे इत्यन्वयः। आदिक्षान्तसमस्तवर्णसुमणिप्रोते आदयोऽकारादयः, क्षान्ताः क्षकारान्ताः समस्ताः पञ्चाशद्वर्णाः स्वरव्यञ्जनात्मकास्त एव सुमणयो मुक्ताफलप्रायास्ते प्रोता गुम्फिता यस्मिन्। वितानप्रभे वितानवत्प्रभा शोभा यस्य, अत्युज्ज्वलत्वादतिविस्तृतत्वाच्च। ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते ब्रह्मादिप्रतिमाभिरभिकीलिता मण्डिताः षडाधाराणां षोडशदलद्विदलान्तचक्राणां कक्षाः कर्णिकारूप-मध्यप्रदेशास्तत्रोन्नते। ब्रह्माण्डाब्जमहासने ब्रह्माण्डं ब्रह्मरन्ध्रस्थानं तत्राब्जं नाम सहस्रदलं कमलं तत्र महासनं तदन्तर्गतकर्णिकामध्यवर्ति महात्रिकोणं तदेव महासनं तस्मिन्। मूर्ति कुण्डलिनीरूपां चिन्मयीं ज्ञानात्मिकां सौषुम्णायतपीतपङ्कजमहामध्यत्रिकोणस्थितां सौषुम्णं सुषुम्णा-संबन्धि आयतं विस्तृतं पीतं हरिद्राभं पङ्कजं कमलं तस्मिन् महामध्यं कर्णिकास्थानं तत्र त्रिकोणमकथादिवर्णमयत्रिरेखं तत्र स्थितां तत्रत्यविन्दु-रूपस्वयंभूलिङ्गं परिवेष्ट्य सार्धत्रिवलयेन भुजगीमिव सुप्तामिति। समस्त-वर्णसुमणिप्रोत इति। कोऽर्थः? ब्रह्माण्डाब्जमहासनं नाम सहस्रदलं कमलं तस्य नालरूपा सुषुम्णानाडी मूलाधारचतुर्दलकमलान्तर्गतं त्रिकोणं कन्दरूपं षडाधारकमलपत्रेषु ते पञ्चाशद्वर्णाः स्थूलवर्णकारणभूता देहे प्राणप्रवेशावधि प्राणनिर्गमनकालपर्यन्तं सर्वदैव मणिवत्कीलितप्राया-स्तिष्ठन्तीत्यर्थः। साम्प्रदायिकैर्यदान्तर्मालया जपः क्रियते तदा सुषुम्णां सूत्रस्थाने परिभाव्यैकपञ्चाशन्मातृकावर्णान् मणीन् विभाव्य मूलाधारादि-ब्रह्मरन्ध्रपर्यन्तमकारादिक्षकारान्तं मनसा प्रजप्य पुनः क्षकारमारभ्य ब्रह्मरन्ध्रान्मूलाधारपर्यन्तं च प्रजप्य शतसंख्या समाप्यते, [ते]न विद्या वीर्यवती भवतीति। इदं परमरहस्यं गुह्याद् गुह्यं शिष्टानां साधकानां

परितोषार्थमत्र लिखितं गुरुभिः क्षन्तव्यम्। यथाश्रुतोऽर्थस्तु मुनीनां योगीश्वराणां संभवत्येव। यदा योगाग्निना परिप्लुष्टानना कुण्डलिनी शक्तिर्मूलाधारादधोगतत्रिकोणादुत्थाय षडाधारभेदेन क्रमेण सुषुम्णारन्ध्रद्वारा सहस्रदलकमलं प्राप्य परिभ्रमति, तदा तदन्तर्गतचिच्चन्द्रमण्डलस्राविताऽमृतबिन्दुरूपमातृकाक्षराणि सुषूम्णाख्यब्रह्मसूत्रद्वारा तत्तदाधारगततत्तद्देवताभिषेकपूर्वकमूलाधारत्रिकोणपर्यन्तं निरन्तरं परिगलन्ती तस्मिन् काले सहस्रदलकमलरूपवितानमध्यगतसुषुम्णाब्रह्मसूत्रे मुक्तामणिप्रोतस्रग्रूपता भातीति। षडाधारवर्णनं तत्तच्चक्रे चित्तनिवेशनफलं चोक्तं नागभट्टैः—
"अथाधारपङ्केरुहाण्यत्र वक्ष्ये सुषुम्णान्तरस्थानि संक्षेपतोऽहम्" इत्यादि, "पुनरुत्थापनमप्ययोमृतस्य" इत्यन्तं त्रिपुरासारे पञ्चमपटलस्यादितो द्रष्टव्यमिति॥ २॥

अतः परं सकलशब्दजालप्रकाशार्कसंकेतसारविद्यादिभूतं केवलं द्वादशस्वररूपं वाग्भवमभिनन्दनपूर्वकं प्रस्तौति—

वन्दे वाग्भवमैन्दवात्मसदृशं वेदादिविद्यागिरो
भाषा देशसमुद्भवाः पशुगताश्छन्दांसि सप्त स्वरान्।
तालान् पञ्च महाध्वनीन् प्रकटयत्यात्मप्रसारेण यत्
तद्बीजं पदवाक्यमानजनकं श्रीमातृके ते परम्॥ ३॥

हे श्रीमातृके, ते तद्वाग्भवं बीजमहं वन्दे। कथंभूतम्? ऐन्दवात्मसदृशम्। पुनः कथंभूतं तत्? यदात्मप्रसारेणेदं सर्वं शब्दजालं प्रकटयति। पुनः कीदृशम्? पदवाक्यमानजनकम्। इत्यन्वयः। वन्दे अभिवादयामि। वाग्भवमृग्यजुःसाम्नामाद्यक्षरत्रयसमुदायरूपम्। ऐन्दवात्मसदृशम् इन्दोरिदमैन्दवं चन्द्रमण्डलं तस्यात्मा अमृतं तत्सदृशन्, वाग्भवस्याप्यमृतप्रायाक्षरस्रावित्वात्। वेदादिविद्यागिरो वेदस्मृतिशास्त्रपुराणागमादीनां शब्दपारावाररूपाः। भाषाः संस्कृतप्राकृतपैशाचिकाः। देशसमुद्भवास्तत्तद्देशगतमनुष्याणां कवित्वव्यवहारक्षमाः। पशुगताः पशुपक्षिव्यवहारयोग्याः। छन्दांसि अनुष्टुबादीनि। सप्तस्वरान् निषादादीन्। तालान् ध्रुवाद्यान्। पञ्च महाध्वनीन् भेर्यादीन्। प्रकटयति व्यक्तीकरोति। आत्मप्रसारेण आत्मनोऽमृतस्य प्रसारः प्रस्रवणं तेन। यत् यस्मात्। सर्वं शब्दजालं प्रसरति। तत् तस्मात् बीजं बीजप्रायम्। पदवाक्यमानजनकं पदमक्षरसमुदायरूपम्, वाक्यं पदसमुदायरूपम्, मानानि प्रत्यक्षा-

नुमानोपमानशब्दादीनि, तेषां जनकं प्रादुर्भावकारकम्। श्रीमातृके सकलशब्दजालमातृभूते पञ्चाशद्वर्णरूपायाः परमुत्कृष्टम् ॥ ३ ॥

पूर्वं संकेतसारविद्यादिमं वाग्भवं प्रणम्येदानीं चतुर्विधपाण्डित्यमहाकाव्यरचनासामर्थ्यप्रदं बालाविद्यादिमं वाग्भवं प्रस्तौति—

त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमां नाप्नोति शश्वद्विना
तद्बीजं व्यवहारजालमखिलं नास्त्येव मातस्तव ।
यज्जाप्यस्मरणप्रसक्तिसुमतिः सर्वज्ञतां प्राप्य कः
शब्दब्रह्मनिवासभूतवदनो नेन्द्रादिभिः स्पर्धते ॥ ४ ॥

हे मातः, तव तद्वाग्भवबीजं विना कोऽपि त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमां शश्वन्नाप्नोति । किञ्च, तव तद्बीजं विना लोकेष्वखिलं व्यवहारजालं नास्त्येव । अन्यच्च तज्जाप्यस्मरणप्रसक्तिसुमतिः सन् सर्वज्ञतां प्राप्येन्द्रादिभिः सह को न स्पर्धते। अपि तु स्पर्धत्ये(त ए)वेत्यन्वयः। त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमां त्रैलोक्ये स्वर्गमृत्युपातालेषु स्फुटाः (टां) सुरासुरमनुष्यमनोरञ्जनयोग्याः (योग्यां) मन्त्राणामुपदिष्टानुपदिष्टानाम्, तन्त्राणां पठितानाम्, महिमां सामर्थ्यन्। मन्त्राणां सामर्थ्यं शापानुग्रहादिकम्। तन्त्रसामर्थ्यं व्याख्यातृत्वम्। नाप्नोति कश्चिदपि नावगच्छतीत्यर्थः। शश्वन्निरन्तरम्। तद्बीजं विना वाग्भवबीजसाधनमन्तरेण। व्यवहारजालं तूत्थानोपवेशनदानोपादानक्रयविक्रयशुद्धाशुद्धाद्यपारम् । अखिलं सांसारिकपारमार्थिकम्। (तद्बीजं विना)। नास्त्येव न सम्भवत्येव। एवकारोऽत्रान्ययोगव्यवच्छेदार्थकः। मातर्जननि, तव वागीश्वर्याः। तज्जाप्यस्मरणप्रसक्तिसुमतिस्तस्य वाग्भवस्य जाप्यं विध्युक्तप्रकारेण स्मरणं यदा तदा शयनोपवेशनभ्रमणकालेऽपि मानसिकमेव तत्र प्रसक्तिस्तत्परता तया सुमतिः सर्वशास्त्राभिनिविष्टः। सर्वज्ञतां वागीश्वरताम्। प्राप्य लब्ध्वा। कः यः कश्चित्। शब्दब्रह्मनिवासभूतवदनः शब्दब्रह्मसकलप्राणिगतचैतन्यभूता चिच्छक्तिः। तस्या निवासभूतं मन्दिरप्रायं वदनं यस्य। नकारोऽत्राप्रसक्तिनिरासकः। इन्द्रादिभिः सुरेशमुख्यैः सह स्पर्धते ईर्ष्यां कर्तुं क्षमते। "अकारो वै सर्ववाक्" इति श्रुतेः ॥ ४ ॥

पूर्वस्मिन् श्लोके सम्पूर्णं वाग्भवं स्तुत्वेदानीं वाग्भवकूटोपरितनमात्रां कुण्डलिनीं प्रस्तौति—

मात्रा याऽत्र विराजतेऽतिविशदा तामष्टधा मातृकां
शक्तिं कुण्डलिनीं चतुर्विधतनुं यस्तत्त्वविन्मन्यते ।
सोऽविद्याखिलजन्मकर्मदुरितारण्यं प्रबोधाग्निना
भस्मीकृत्य विकल्पजालमखिलं मातः पदं तद् व्रजेत् ।। ५ ।।

हे मातः, अत्र या मात्रा विराजते तां कुण्डलिनीं शक्तिमष्टविधमातृकां च यो मन्यते, स तत्पदं व्रजेदित्यन्वयः । मात्रा या सामवेदाद्यक्षररूपा बीजाङ्कुरप्राया विश्वप्रपञ्चस्य मातृभूता । अत्र वाग्भवे । विराजते विद्योतते । अतिविशदा विस्पष्टा । तां मात्राम् अष्टधा वशिन्यादिवर्गाष्टकरूपेण । मातृकामेकपञ्चाशद्वर्णमयीम् । शक्तिं सृष्टिस्थितिसंहृतिकर्मसमर्थाम् । कुण्डलिनीं सर्वप्राणिमूलाधारवासिनीम् । चतुर्विधतनुमग्निसूर्यसोमसमष्टिरूपेण, अग्निकुण्डलिनी मूलाधारे, सूर्यकुण्डलिनी हृदये, सोमकुण्डलिनी भ्रूमध्ये, समष्टिकुण्डलिनी मूलाधाराधोगतवाग्भवाकारत्रिकोणे । यः सांप्रदायिकः । तत्त्वविद् आराध्यमुखानवगताशेषपरमार्थः । मन्यते जानाति । भावयतीति यावत् । स एव मननपरायणः । अविद्याखिलजन्मकर्मदुरितारण्यम् अविद्या सांसारिकी बुद्धिः, अखिलजन्मानि भावीनि द्विपदचतुष्पदोरगादीनि, अखिलकर्माणि संचितारब्धानि, अखिलदुरितानि ज्ञाताज्ञातकृतानि, तेषामरण्यं भयानकत्वात् । प्रबोधाग्निना विज्ञानानलेन भस्मीकृत्य निर्दग्ध्वा (ह्य) । विकल्पजालं कल्पनानानावासनाः । अखिलं सांसारिकपारमार्थिकम् । मातर्जननि । पदं स्थानम् । तदनिर्वचनीयम् । सर्वसम्मतम् । उक्तं च नागभट्टैः—"एतस्याः परतः परात् परतरं निर्वाणशक्तेः पदं शैवं शाश्वतमप्रमेयमचलं नित्योदितं निर्मलम् । तद्विष्णोः पदमित्युशन्ति सुधियः केचित्पदं ब्रह्मणः केचिद्धंसपदं निरञ्जनपदं केचिन्निरालम्बनम् ।।" इति । व्रजेत् प्राप्नुयात् ।। ५ ।।

इदानीं संकेतसारविद्याया द्वितीयाक्षरं कामबीजत्वेन प्रस्तौति—

तत्ते मध्यमबीजमम्ब कलयाम्यादित्यवर्णं क्रिया-
ज्ञानेच्छादिमनन्तशक्तिविभवव्यक्तिं व्यनक्ति स्फुटम् ।
उत्पत्तिस्थितिकल्पकल्पिततनु स्वात्मप्रसारेण यत्
काम्यं ब्रह्महरीश्वरादिविबुधैः कामं क्रियायोजितैः ।। ६ ।।

हे अम्ब, तत्ते मध्यमबीजमादित्यवर्णं क्रियाज्ञानेच्छादिमुत्पत्तिस्थितिकल्पकलिपततनु ब्रह्महरीश्वरादिविबुधैः काम्यं चाहं कलयामि। कथंभूतं तत्? यत्स्फुटमनन्तशक्तिविभवव्यक्ति व्यनक्तीत्यन्वयः। तत् तस्मात्। ते संकेतसारागमः। मध्यमबीजं केवलेकाररूपम्। अम्ब जननि, कलयामि जानामि। आदित्यवर्णं बालार्कनिभम्। क्रियाज्ञानेच्छादिम् इच्छाशक्तिज्ञानशक्तिक्रियाशक्तीनां निदानभूतम्। एतासां कामकलाविन्दुत्रयाविर्भूतत्वात्। अनन्तशक्तिविभवव्यक्तिम् अनन्तानां शक्तीनां विभवः सामर्थ्यं तस्य व्यक्तिर्ज्ञानम्। व्यनक्ति प्रकटीकरोति। स्फुटं प्रत्यक्षतया। उत्पत्तिस्थितिकल्पकलिपततनु उत्पत्तिः सृष्टिः, स्थितिः पालनम्, कल्पः संहारः, तेषु कलिता प्रादुर्भाविता वामाज्येष्ठारौद्रीप्रधानानि ब्रह्मविष्णुरुद्राणां तनवो येन। स्वात्मप्रसारेण स्वस्य कामकलाक्षरस्य, आत्मा धामत्रयरूपं बिन्दुत्रयम्, तस्य प्रसारः स्फुरणम्। इदमुपलक्षणन्—कामकलाक्षरस्य त्रितयमात्रकारणत्वेन इच्छाज्ञानक्रिया वामाज्येष्ठारौद्रीप्रधाना ब्रह्मविष्णुरुद्राः सूर्यसोमाग्नयः अकारोकारमकाराः। लोकत्रयं पीठत्रयं लिङ्गत्रयं कालत्रयं वेदत्रयं वह्नित्रयं स्वरत्रयं च सर्वमुत्पन्नमित्यष्टादशश्लोके वक्ष्यति। यत् यस्मात् कारणात्। काम्यमुपास्यम्। ब्रह्महरीश्वरादिविबुधैः। आदिशब्देन इन्द्रचन्द्रकुबेरसूर्याः। अन्यैश्च। कामं निश्चितम्। एतक्रियायोजितैः क्रियाः सृष्टिस्थितिसंहृतिरूपाः, तासु योजितैर्नियमितैः। एतद्विवरणं वामकेश्वरतन्त्रे विस्तरेणोक्तम्। मयात्र ग्रन्थगौरवभयान्न लिख्यते। अथवा कलयामि ककारलकारयुक्तं करोमि। तेन बालाया मध्मबीजं कामराजाख्यं भवति ॥ ६ ॥

अत एव तत्कामराजबीजसामर्थ्यवर्णनपुरःसरं तमेव प्रणमति—

कामान् कारणतां गतानगणितान् कार्यैरनेकैर्महो

मुख्यैः सर्वमनोगतानधिगतान् मानैरनेकैः स्फुटम्।

कामक्रोधसुलोभमोहमदमात्सर्यारिषट्कं च यद्

बीजं भ्राजयति प्रणौमि तदहं ते साधु कामेश्वरि ॥ ७ ॥

हे कामेश्वरि, तव तद् बीजमहं प्रणौमि। तत् किं भूतम्? यत् कारणतां गतान् कामान् महीपुख्यैः कार्यैः सहाधिगतान् कामान् मानैः सह कामाद्यरिषट्कं च भ्राजयतीत्यन्वयः। कामान् ब्रह्मादिकानां सामर्थ्यरूपान्। कारणतां गतान् तत्तत्कार्यानुकूलान्। अगणितानसंख्यातान्।

कार्यैर्मनोगतैः । अनेकैर्नानाविधैः । महीमुख्यैः पृथिव्यादिकैः । सर्वमनोगतान् सर्वप्राणिचित्तस्थान् । अधिगतान् ज्ञातान् । मानैः प्रत्यक्षादिभिः । अनेकै वेदशास्त्रपुराणोक्तैः । स्फुटं प्रव्यक्तम् । कामक्रोधसुलोभमोहमदमात्सर्या रिषट्कं ज्ञानिनामावरकत्वादरित्वमेतेषाम् । सांसारिकाणां स्थिति कारित्वम् । चकारः समुच्चये । एतत् ककारलकारसहितं बीजं कामकूटम् आजयति पोषयति । प्रणौमि प्रकर्षेण नमस्करोमि । अहं स्तोत्रकर्ता बालाविद्यायाः । साधु सर्वोत्कृष्टम् । कामेश्वरि कामकूटाधिदेवते ॥ ७ ॥

इदानीं सिंहावलोकनन्यायेन पुनरपि संकेतसारविद्यायाः कामकला रूपमध्यमबीजस्याखिलकामपूरकत्वेन विशिष्टज्ञानप्रकाशकत्वं प्रणवत्वं प्रतिपादयति--

यद्भक्ताखिलकामपूरणचणस्वात्मप्रभावं महा-
जाड्यध्वान्तनिवारणैकतरणिज्योतिः प्रबोधप्रदम् ।
यद्वेदेषु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति
श्रीविद्ये तव सर्वराजवशकृत् तत्कामराजं भजे ॥ ८ ॥

हे श्रीविद्ये, तव तत्कामराजमहं भजे । (तत् तस्मात्) यद्यस्म भक्ताखिलकामपूरणचणस्वात्मप्रभावम् । कथंभूतम् ? जाड्यध्वान्तनिवार कतरणिज्योतिः । पुनः कथंभूतम् ? प्रबोधप्रदम् । यद्वेदेषु मात्रात्रयेण 'ओ इति गीयते । अत एव श्रुतिमुखम् । पुनः कथंभूतम् ? सर्वराजवशकृदि न्वयः । यत यस्मात् । कामराजं द्वितीयम् । भक्ताखिलकामपूरणचणस्वा प्रभावं भक्तानामुपासकानाम्, अखिलाः सर्वे, कामा मनोरथाः, तेषां पू संपादनम्, तत्र चणो दक्षः, स्वात्मप्रभावः स्वस्य कामकलाबीजस्य आ बिन्दुत्रयम्, तस्य प्रभावः प्रसारः पूर्वोक्तवामादिब्रह्मादिदेवतात्रयं वि यस्मिन् । महाजाड्यध्वान्तनिवारणैकतरणिज्योतिः महाजाड्यमज्ञानं त ध्वान्तमन्धकारः, तस्य निवारणं विनाशनम्, तत्रैकमद्वितीयम्, तर ज्योतिरिव तरणिः सूर्यः, तस्य ज्योतिः प्रकाशस्तद्वत् । प्रबोधप्रदं प्रक बोधस्तत्त्वज्ञानं प्रददाति प्रकर्षेण निश्चयेनोत्पादयतीति । यत् यस्मा तुरीयस्वरूपम् । वेदेषु वेदाध्ययनारम्भसमयेषु । चकारः समुच्चये । गी उच्चार्यते । श्रुतिमुखं वेदादिभूतम् । मात्रात्रयेण अकारोकारमकारा त्रयेण । ओमिति । श्रीविद्ये संकेतसारे । तव त्र्यक्षर्याः । सर्वराजवशकृ सर्वे जीवाः राजानश्च, वशं करोति । तत् पूर्वोक्तम् । कामराजं का

राजसंज्ञम् । भजे सेवे । मात्रात्रयेणेपि कोऽर्थः ? कामकलाक्षरस्य बिन्दुत्रयात्मकत्वेन बिन्दुत्रयस्य सूर्यसोमाग्नित्वेन सोमसूर्याग्नीनामकारोकारमकारात्मता सर्वत्रागमेषु दृष्टेत्येतत्सर्वं त्रिकात्मकं कामकलाक्षरे विश्रान्तमिति प्रणवेनापि कामकलाक्षरमेव गीयत इति तात्पर्यम् ॥ ८ ॥

अतः परं संकेतसारविद्यायास्तृतीयबीजस्योद्धारं कामकलासाम्यतां ब्रह्मात्मकतां चिद्रूपतां च प्रतिपादयति——

यत्ते देवि तृतीयबीजमनलज्वालावलीसंनिभं
सर्वाधारतुरीयबीजमपरं ब्रह्माभिधाशब्दितम् ।
मूर्धन्यान्तविसर्गभूषितमहौकारात्मकं तत्परं
संविद्रूपमनन्यतुल्यमहिम स्वान्ते मम द्योतताम् ।। ९ ।।

हे देवि ! तत्ते तृतीयं बीजं मम स्वान्ते द्योततामित्यन्वयः । यद् वक्ष्यमाणरूपम् । ते तव देवि प्राग्वत् । तृतीयं तार्तीयम् । बीजं बीजाक्षरम् । अनलज्वालावलीसंनिभम् अनलस्य वह्नेः, ज्वालाः शिखाः, तासामावली श्रेणी, तस्या निभेव प्रभा विद्यते यस्मिन् । सर्वाधारतुरीयबीजं सर्वस्य विश्वस्याधारभूतं त्रिकोणरूपं तेनैकाराक्षरं तस्य तुरीयमौकारः कारणम् । अपरं द्वितीयम् । ब्रह्माभिधाशब्दितं ब्रह्मेति नाम्ना संकेतितम् । मूर्धन्यान्तविसर्गभूषितमहौकारात्मकं मूर्धन्यं बिन्दुरन्ते मस्तके यस्य विसर्गभूषितं विसर्गेण बिन्दुभ्यां भूषितं युक्तम् अत एव महौकारात्मकं महत्त्वं तस्य बिन्दुत्रयसहितत्वात् । तत् पूर्वोक्तम् । परमुत्कृष्टम् । पराख्यमिति यावत् । संविद्रूपं ज्ञानात्मकम् । अनन्यतुल्यमहिम अतुलप्रभावम् । स्वान्ते हृदये । मम तवाराधकस्य । द्योततां भासताम् ॥ ९ ॥

इदानीं बालायास्तृतीयं बीजं पराशक्तिरूपेण नमस्करोति——

सर्वं सर्वत एव सर्गसमये कार्येन्द्रियाण्यन्तरा
तत्तद्दिव्यहृषीककर्मभिरियं संव्यश्नुवाना परा ।
वागर्थव्यवहारकारणतनुः शक्तिर्जगद्व्यापिनी
तद्बीजात्मकतां गता तव शिवे तन्नौमि बीजं परम् ।। १० ।।

हे शिवे, इयं परा शक्तिस्तव यद्बीजात्मकतां गता तत्परं बीजमहं नौमि । किं कुर्वाणा ? सर्गसमये सर्वतः सर्वं संव्यश्नुवाना । अन्तरा अनन्तरं तत्तद्दिव्यहृषीककर्मभिः सह कार्येन्द्रियाणि च संव्यश्नुवाना इत्यन्वयः ।

सर्वं वस्तुजातम्। सर्वतः सर्वस्मात्। एवकारोऽत्रान्योन्याश्रयव्यवच्छेदकः। सर्गसमये सर्गादौ। कार्येन्द्रियाणि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च। अन्तरा तदनन्तरम्। तत्तद्दिव्यहृषीककर्मभिः। सह इति शेषः। तत्तत् तेषां तेषां दिव्यहृषीककर्मभिः शब्दादिभिर्वचनादिभिश्च सह संव्यश्नुवाना संसृज्यमाना। परा परमोत्कृष्टा। वागर्थव्यवहारकारणतनुः वाचामर्थानां च यो व्यवहारः प्रवृत्तिः, तत्र कारणं तनुर्यस्याः। शक्तिः प्राग्वत्। जगद्व्यापिनी कार्यकारणकर्तृत्वज्ञेयज्ञानज्ञातृत्ववाच्यवचनवक्तृत्वादित्रितयमात्ररूपेण। यद्बीजात्मकतां सकारौकारबिन्दुत्रयसमुदायरूपेण। गता प्राप्ता। तव बालात्रिपुरविद्यायाः। शिवे कल्याणरूपे तत् पराबीजम्। नौमि नमस्करोमि। बीजं प्राग्वत्। परं परासंज्ञम्। एतदुक्तं भवति—इयं परा शक्तिः सर्गसमये बिन्दुत्रयरूपकामकलाक्षरादाविर्भूय सर्वप्राणिसर्ववस्तुजीतजातकदम्बात् सर्वं यथा यथा समुत्पाद्य पश्चात्तत्तद्देवताधिष्ठितज्ञानकर्मेन्द्रियाण्युपस्थाप्य शब्दशब्दार्थसृष्टिनिदानरूपा सा पराबीजरूपतां प्राप्नोति तत्पराबीजं सर्वोत्कृष्टमिति ॥ १० ॥

पुनरपि पराबीजस्मरणेन परदेवतासाक्षात्कारो भवतीति दर्शयति—

अग्नीन्दुद्युमणिप्रभञ्जनधरानीरान्तरस्थायिनी
शक्तिर्ब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता ।
सृष्टस्थावरजङ्गमस्थितमहाचैतन्यरूपा च या
तद्बीजस्मरणेन सैव भवती प्रादुर्भवत्यम्बिके ॥ ११ ॥

हे अम्बिके, सैव भवती यद्बीजस्मरणेन प्रादुर्भवति तत्परं बीजं नौमीति पूर्वश्लोकस्थेनान्वयः। सैव का? याग्नीन्दुद्युमणिप्रभञ्जनधरानीरान्तरस्थायिनी अग्निर्हुताशनः, इन्दुश्चन्द्रः, द्युमणिः सूर्यः, प्रभञ्जनो वायुः, धरा पृथ्वी, नीरं जलम्, आन्तरमाकाशम्, एतेषु स्थितिशीला। उक्तं चाभियुक्तैः—"त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं त्वं चेतनासि पुरुषे पवने बलं त्वम्। त्वं स्वादुतासि सलिले शुचिनि त्वमूष्मा निःसारमेतदखिलं त्वदृते यदि स्यात् ॥" इति। शक्तिः पूर्वोक्ता। ब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता ब्रह्मा स्रष्टा, हरिर्विष्णुः ईशः शिवः, वासव इन्द्रः, तन्मुखास्तदाद्या अमर्त्या देवाः, असुरा दैत्याः, तेषामात्मस्थिता आत्मनि सामर्थ्यरूपेण वर्तमाना। सृष्टस्थावरजङ्गमस्थितमहाचैतन्यरूपा सृष्टेषु स्थावरेषु जङ्गमेषु स्थितं वर्तमानं महाचैतन्यं जीवनमूलं तदेवरूपं यस्याः।

समुच्चये। या पराशक्तिः। यद्बीजस्मरणेन पराबीजचिन्तनेन। सैव या पराबीजतां प्राप्ता। भवती त्वमेव। प्रादुर्भवति प्रत्यक्षा भवति। अम्बिके प्रतिपालिके इति ॥ ११ ॥

पुनरपि तदेव त्रिकात्मकं पराबीजं श्रीप्रदं वाक्सिद्धिप्रदं मोक्षपदं चेति प्रतिपादयति––

स्वात्मश्रीविजिताजविष्णुमघवश्रीपूरणैकव्रतं
यद्विद्याकवितावितानलहरीकल्लोलिनीदीपकम् ।
बीजं यत्त्रिगुणप्रवृत्तिजनकं ब्रह्मेति यद्योगिनः
शान्ता सत्यमुपासते तदिह ते चित्ते दधे श्रीपरे ॥ १२ ॥

हे श्रीपरे, ते तद्बीजमहमिह चित्ते दधे। तत्कथंभूतम्? उक्तरूपम्......। स्वान्तश्रीविजिताजविष्णुमघवश्रीपूरणैकव्रतं स्वात्मश्रीः स्वस्यात्मा सकारौकारबिन्दुत्रयं तस्य श्रीर्विभूतिः। सामर्थ्यमिति यावत्। तया विजितानामजविष्णुमघोनां श्रीपूरणे संपत्तिसंपादने एकं व्रतं यस्य। यत् पराबीजमेव। विद्याकवितावितानलहरीकल्लोलिनीदीपकम्, विद्याश्च कविताश्च विद्याकविताः, विद्याकविता एव वितानं तत्र लहर्य इव लहर्यः, तासु कल्लोलिनीव कल्लोलिनी तां दीपयति प्रकाशयतीति। बीजं पराबीजम्। यदुक्तरूपम्। त्रिगुणप्रवृत्तिजनकं त्रिगुणानां सत्त्वरजस्तमोगुणानां प्रवृत्तिं प्रसारं जनयत्युत्पादयतीति। ब्रह्मेति। मोक्षप्रदमिति। यद्बीजम्। योगिनो योगनिरताः। सत्यं शाश्वतम्। शान्ताः साधवः। उपासते निदिध्यासनयोगेन। तद्बीजम्। इह जन्मनि। ते परायाः। चित्ते हृदये। दधे भावयामि। श्रीपरे श्रिया वैभवेन परा सर्वोत्कृष्टेति ॥ १२ ॥

पूर्वं "वन्दे वाग्भवम्" इत्यादि "स्वात्मश्री" इत्येतैर्दशभिः श्लोकैः संकेतसारबालाविद्याबीजत्रयस्य क्रमेण सामर्थ्यं प्रतिपाद्येदानीं विद्याद्वयस्यान्यतरसंयुक्तबीजाराधनेन यथेष्टफलप्राप्तिं प्रतिपादयति––

एकैकं तव मातृके परतरं संयोगि वायोगि वा
विद्यादिप्रकटप्रभावजनकं जाड्यान्धकारापहम् ।
यन्निष्ठाश्च महोत्पलासनमहाविष्णुप्रहर्त्रादयो
देवाः स्वेषु विधिष्वनन्यमहिमस्फूर्तिं दधत्येव तत् ॥ १३ ॥

हे मातृके, एकैकं तव बीजं संयोगि बायोगि वा विद्यादिप्रकट-प्रभावजनकं जाड्यान्धकारापहं च भवति। परतरं यन्निष्ठा महोत्पलासन-महाविष्णुप्रहर्त्रादयो देवाः स्वेषु विधिषु अनन्यमहिमस्फूर्ति दधत्येवेत्यन्वयः। एकैकमन्यतमविद्यायाः। तव त्र्यक्षर्याः। मातृके स्वरव्यञ्जनरूपे। परतर-मुत्कृष्टादुत्कृष्टम्। संयोगि व्यञ्जनयुतम्। वा विकल्पे। अयोगि वा व्यञ्जनरहितं वा। विद्यादिप्रकटप्रभावजनकं विद्याश्चतुर्दशविद्याः, आदिशब्देन यस्य यदिष्टम्, तेषां प्रकटप्रभावः अलौकिको विस्तारः, तस्य जनकमुत्पादकम्। जाड्यान्धकारापहं जाड्यमज्ञानम्, त(देवान्धकारम्, त) दपहन्ति नाशयति तत्। यन्निष्ठा यदक्षरस्मरणतत्पराः। च समुच्चये। महोत्पलासनो ब्रह्मा। महाविष्णुर्विश्वपालकः, प्रहर्ता ईश्वरः, आदिशब्दे-नेन्द्रादयः, देवाः दिवि क्रीडातत्पराः। स्वेषु स्वस्वकर्तव्येषु विधिषु साङ्गोपाङ्गेषु अनन्यमहिमस्फूर्तिम् अनन्यत्वं इतरानपेक्षत्वम्, महिमत्वं लोकोत्तरत्वम्, स्फूर्तिस्तत्तत्कार्यातिशायिनी तां प्राप्नुवन्त्येव। एवकारोऽत्र निश्चयाधायकः। तत् तस्मात्॥ १३॥

अतः परं पूर्वोक्तविद्याद्वयगतबीजत्रयं महाविद्याकूटत्रयं च यो जानाति, तस्य सामर्थ्यं प्रतिपादयति—

इत्थं त्रीण्यपि मूलवाग्भवमहाश्रीकामराजस्फुर-
च्छक्त्याख्यानि चतुःश्रुतिप्रकटितान्युत्कृष्टकूटानि ते।
भूततुंश्रुतिसंख्यवर्णविदितान्यारक्तकान्ते शिवे
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत्॥ १४॥

हे आरक्तकान्ते, हे शिवे, इत्थं त्रीणि बीजानि मूलवाग्भवमहा-श्रीकामराजस्फुरच्छक्त्याख्यानि त्रीण्यप्युत्कृष्टकूटानि यो जानाति स एव सर्वजगतां सृष्टिस्थितिः ध्वंसकृन्द्भवति। कथं भूतानि ? भूततुंश्रुतिसंख्यवर्ण-विदितानीत्यन्वयः। इत्थं पूर्वोक्तप्रकारेण। त्रीणि संकेतसारबालाविद्यायाः। अपिः समुच्चये। मूलवाग्भवमहाश्रीकामराजस्फुरच्छक्त्याख्यानि मूलस्य महाविद्याया वाग्भवं प्रथमकूटं महाश्रीकामराजं महाविद्यायाः श्रीपदं सौन्दर्यप्रदं कामराजकूटम्। महत्त्वमेतस्य पूर्वोक्तसंकेतसंकेतसारबाला-विद्याकामकूटापेक्षया। स्फुरच्छक्त्याख्यं स्फुरन्ती चमत्कारकारिणी शक्तिर्यस्य। एतदभिधेयानि च तानि। चतुःश्रुतिप्रकटितानि चतुर्वेदेषु प्रोक्तानि अथर्ववेदे सौभाग्यकाण्डे—"कामो योनिः कमला वज्रपाणिर्गुहा

हंसा मातरिस्वाभ्रमिन्द्रः। पुनर्गुहा सकला मायया च पुरूच्येषा विश्वमातादिविद्या॥" इति। ऋग्वेदो—"इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिभिः प्रकाशितानि। उत्कृष्टकूटानि उत्कृष्टानि अतुलसामर्थ्यवन्तीति, कूटानि वर्णसमुदायरूपाणि। भूतर्तुश्रुतिसंख्यवर्णविदितानि पञ्चषट्चतुरक्षरैर्ज्ञातानि। आरक्ता बालार्कतुल्या कान्तिर्यस्याः। शिवे कल्याणरूपे। य उपासकः। जानाति सत्संप्रदायाचार्यमुखादवगच्छति। स एव साभिषेकलब्धविद्य एव। सर्वजगतां स्थावरजङ्गमानाम्। सृष्टिस्थितिध्वंसकृत् सृष्टिरुत्पत्तिः, स्थितिः पालनम्, ध्वंसो नाशः, एतत्कार्यं कर्तुं समर्थः स्यादिति॥ १४॥

ननु श्रीविद्याकूटत्रयज्ञानमात्रेण यदि प्रोक्तसिद्धिः स्यात्, तदा सदाशिवोक्तनित्योपासनोपदेशो व्यर्थ एव स्यादित्याशङ्क्योपासकानां साङ्गोपाङ्गनित्योपास्तिकर्तृत्वं प्रतिपादयति—

नित्यं यस्तव मातृकाक्षरसखीं सौभाग्यविद्यां जपेत्
संपूज्याखिलचक्रराजनिलयां सायंतनाग्निप्रभाम्।
कामाख्यं शिवनामतत्त्वमुभयं व्याप्यात्मना सर्वतो
दीव्यन्तीमिह तस्य सिद्धिरचिरात् स्यात् त्वत्स्वरूपैकता॥१५॥

हे सौभाग्यविद्येश्वरि, यस्तव सौभाग्यविद्यां मातृकाक्षरसखीं संपाद्य जपेत् तस्य इहाचिरात् सिद्धिः स्यात्। परत्र त्वत्स्वरूपैकता स्यात्। किं कृत्वा? अखिलचक्रराजनिलयां संपूज्य। कथंभूताम्? सायंतनाग्निप्रभाम्। पुनः कीदृशीम्? आत्मना कामाख्यं शिवनामतत्त्वं चोभयं व्याप्य सर्वतो दिव्यन्तीमित्यन्वयः। नित्यं प्रतिदिनम्। यः साधकः। तव त्रिपुरसुन्दर्याः मातृकाक्षरसखीं मातृकाक्षरसहायिनीम्, द्वितीयश्लोकव्याख्याने प्रोक्ताक्षमालाविधानसहिताम्। सौभाग्यविद्यां श्रीविद्याम्। जपेत् वाचिकोपांशुमानसेष्वन्यतमप्रकारेण। अक्षरमालया जपस्तु मानसः। एतदुक्तं वायवीयसंहितायाम्—"धिया मन्त्राक्षरश्रेणीं वर्णस्वरपदात्मिकाम्। उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जपः॥" इति। संपूज्य समाराध्य। अखिलचक्रराजनिलयाम् अखिलं संपूर्णं चक्रराजः श्रीचक्रं निलयः स्थानं यस्याः। एतावता सर्वावरणसहितां संपूज्येत्यर्थः। सायंतनाग्निप्रभां सायंसंध्योत्थप्रज्ज्वलितवैश्वानरदीप्तिमतीम्। कामाख्यं कामेश्वराभिधम्। शिवनामतत्त्वं शिवानां ब्रह्मविष्णुरुद्रेश्वरसदाशिवाख्यानां समुदायरूपं सिंहासनम्। उभयं

द्वयमपि आत्मना व्याप्य स्वदेहावयवैराच्छाद्य । सर्वतश्चतुर्दिक्षु । दीव्यन्तीं प्रकाशमानाम् । इह भूतले तस्य साधकस्य । सिद्धिर्मनोवाञ्छिता । अचिरात् स्वल्पकालेन । स्यात् भवति । त्वत्स्वरूपैकता तव मूर्तिसायुज्यम् ॥ १५ ॥

नन्वितराः सर्वाः सिद्धयो मदाराधनेनैव संभवन्ति, परन्तु केवलं महाकवित्वेप्सूनामल्पविद्यानां मूर्खाणां काव्यव्याकरणाभिधानाभ्यासं विना कथं सिद्धिः स्यादित्याशङ्कायामाह—

काव्यैः पापठितैः किमल्पविदुषां जोघुष्यमाणैः पुनः
किं तैर्व्याकरणैर्विबोधिततया किं वाभिधानश्रिया ।
एतैरम्ब न बोभवीति सुकविस्तावत्तव श्रीमतो
यावन्नानुसरीसरीति सरणिं पादाब्जयोः पावनीम् ॥ १६ ॥

हे अम्ब, यावत्ते पादाब्जयोः सरणीं नानुसरीसरीति तावदल्पविदुषां पापठितैः काव्यैः किम् । जोघुष्यमाणैर्व्याकरणैः पुनः किम् । विबोधिततया वाभिधानश्रिया किम् । (किम्) एतैः सुकविर्न भवति । कथंभूतयोः पादाब्जयोः । श्रीमतोः । कथंभूतां सरणिम् ? पावनीमित्यन्वयः । काव्यैर्महाकविवृतैर्व्युत्पत्तिकारकैः । पापठितैर्वारंवारं पठितैः । किम् । न किमपीत्यर्थः । अल्पविदुषामीषद्व्युत्पन्नानाम् । निर्बुद्धीनामिति यावत् । जोघुष्यमाणैर्बहुधा घोषितैः । पुनः किं प्राग्वत् । तैरभ्यस्तैः । व्याकरणैः शब्दशास्त्रैः । विबोधिततया विज्ञाततया । किं प्राग्वत् । वा अथवा । अभिधानश्रिया अभिधानसंपत्त्या । एतैः काव्यव्याकरणाभिधानैः । अम्ब मातः । न बोभवीति अतिशयेन न संभवति । सुकविर्विद्वत्परितोषकः । तावत्तदवधि । तव श्रीमहात्रिपुरसुन्दर्याः । श्रीमतोः परमशोभनयोः । यावत् यदवधि । नानुसरीसरीति अत्यन्तं नानुसरति । सरणिं पद्धतिम् । पादाब्जयोश्चरणकमलयोः । पावनीं पवित्राम् ॥ १६ ॥

अतः परं देव्युपासकानामनिष्टसंपादकमपीष्टं संपादयतीति प्रतिपादयति—

गेहं नाकति गर्वितः प्रणमति स्त्रीसङ्गमो मोक्षति
द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ।
मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ॥ १७ ॥

श्लोकार्थः स्पष्ट एव ॥ १७ ॥

अतः परं साधकस्य कृतकृत्यतासंपादकं त्रिपुनामनिरुक्तिमूलं श्रीमहात्रिपुरसुन्दर्याः कामकलाक्षरगतबिन्दुत्रयप्रसूतमन्तर्गतं बहिर्गतं च त्रिकमात्रं प्रकटयति—

आद्यैरग्निरवीन्दुबिम्बनिलयैरम्ब त्रिलिङ्गात्मभि-
र्मिश्रा रक्तसितप्रभैरनुपमैर्युष्मत्पदैस्तैस्त्रिभिः ।
स्वात्मोत्पादितकाललोकनिगमावस्थामरादित्रयै-
रुद्भूतं त्रिपुरेति नाम कलयेद्यस्ते स धन्यो बुधः ॥ १८ ॥

हे अम्ब, तैस्त्रिभिरपरं स्वात्मोत्पादितकाललोकनिगमावस्थामरादित्रयैश्चोत्पन्नं ते त्रिपुरेति नाम यः कलयेत् स बुधो धन्य इत्यन्वयः। आद्यैरकथाद्यैः अग्निरवीन्दुबिम्बनिलयैः। अग्निरवीन्दूनां बिम्बानां मण्डलानां निलयानि निवासस्थानानि तैः। अम्ब जननि त्रिलिङ्गात्मभिर्मूलाधारहृदयभ्रूमध्यस्थैः स्वयंभूबाणेतरलिङ्गस्वरूपैः। इदं पदत्रयविशेषणम्। मिश्रा………। रक्तसितप्रभैः श्वेतरक्तपाटलवर्णैः। अनुपमैः उपमारहितैः। युष्मत्पदैस्त्वच्चरणैः तैः पूर्वोक्तविशेषणद्वयसहितैः। त्रिभिस्त्रस्थानगैः। स्वस्या महात्रिपुरसुन्दर्याः। आत्मा कामकलाक्षरं तस्मादुत्पादितानि, कालत्रयं प्रातर्मध्याह्नसायं संध्यारूपम्, लोकत्रयं स्वर्गमृत्युपातालरूपम्, निगमत्रयं वेदत्रयम्। अवस्थात्रयं जाग्रत्स्वप्नसुषुप्तिरूपम्, अमरत्रयं ब्रह्मविष्णुरुद्ररूपम्। आदिशब्देन पीठत्रयम्, वह्नित्रयम्, इच्छादिशक्तित्रयमित्यादीनि तैः। उद्भूतमुत्पन्नं प्रथमागतम्। त्रिपुरात्रिपुराप्रकारमात्रकारणरूपा। इति एवंविधम्। नाम नाममन्त्रः, तम्। कलयेत् जानीयात्। य उपासकः। ते महात्रिपुरसुन्दर्याः। स गुरुमुखादवगततद्रहस्यः। धन्यः कृतकृत्यः। बुधो ज्ञानी ॥ १८ ॥

अतः परं त्रितयमात्रकारणभूतायाः श्रीकामकलात्मकमहात्रिपुरसुन्दर्या वाच्यवाचकवक्तृत्वेन प्रणवाक्षरत्रयस्य मूलाधारहृदयभ्रूमध्यवर्तित्वेन कूटत्रयस्य प्रणवत्वं प्रतिपादयति—

आद्यो जाड्यतमार्थवाचकतया रूढः स्वरः पञ्चमः
सर्वोत्कृष्टतमार्थवाचकतया वर्णः पवर्गान्तकः ।
वक्तृत्वेन महाविभूतिसरणिस्त्वाधारगो हृद्गतो
भ्रूमध्यस्थित इत्यतः प्रणवता ते गीयते चागमैः ॥ १९ ॥

हे अम्ब, अतः कारणाद् आगमैः प्रणव इति गीयते। कुतः अकारोकारमकारैर्वाच्यवाचकवक्तृरूपैः आधारहृदयभ्रूमध्यगैः कूटत्रयसाम्यता वेदैर्गीयत इत्यन्वयः। आद्योऽकारः। जाप्यतमार्थवाचकतया अतिशयेन जाप्या इति जाप्यतमा मूलविद्या तस्या अर्थः स्वरूपं तस्य वाचकः "अ–उ–म् इति ब्रह्म" इति श्रुतिः। इति परब्रह्मात्मिकां श्रीमहात्रिपुरसुन्दरीमेव वदति। "अकारो विष्णुरुच्यते" इत्यागमाभिधानेन व्यापकतेति विश्वव्यापिकां तामेव वदति। "कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा। वेणुनादसमारम्भादकरोद्वि वशं जगत्॥" इति तन्त्रराजवचनात्। "अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः" इति संकेतपद्धतिवचनात्। शिवशक्त्योरभेदेन तामेव वदति "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः। तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव॥" इति। महार्थमञ्जर्यामपि–– "आलेख्यविशेष इव गजवृषभयोः प्रतिभासो यथैकस्मिन्नपि परमार्थे शिवशक्तिविभागकल्पनां कुर्म." इति। अकारस्य परमार्थस्वरूपिण्याः श्रीमत्त्रिपुरसुन्दर्या वाचकतया रूढः प्रसिद्धः। अत एव वाच्यस्वरः पञ्चम उकारः सर्वोत्कृष्टतां प्राप्य वाचकतया सर्वेभ्य उत्कृष्टतमार्था तामेव वदति तेन वाचकतावर्णः पवर्गान्तको वर्णो व्यञ्जनं पवर्गान्तको मकारः कर्तृत्वेन वक्तृत्वं महत्त्वादेव। एतेषामकारोकारमकाराणां वाच्यवाचकत्वं कामकलाक्षरमूलकत्वेन त्रिकात्मकतया साङ्केतितं भवति। महाविभूतिसरणिः महाविभूतिर्महदैश्वर्यं तस्य सरणिः प्रापकः। तु पुनः। आधारगो मूलाधारगताग्निचक्रगः। हृद्गतः सूर्यचक्रगः। भ्रूमध्यस्थितः सोमचक्रग इत्यमुना प्रकारेण मूलाधारहृदयभ्रूमध्यगतकूटत्रयेणैकवाक्यताकारणता। प्रणवता ॐकाररूपता। ते श्रीमहात्रिपुरसुन्दर्याः। इति। गीयते उच्चैरुद्घोष्यते। रुद्रयामले––"उमेति परमा शक्तिः पूर्वभावमुपेयुषी। अध्युष्टवलयाकारा प्रणवत्वमुपागता॥ अकाररूपिण्यजरा शिवानन्ता मदद्रवा"॥ १९॥

अतः परं गायत्र्यादिसर्वदर्शनाधिदेवतात्वेन श्रीमहात्रिपुरासुन्दरीमेव प्रतिपादयति––

गायत्री सशिरा तुरीयसहिता सन्ध्यामयीत्यागमै-
राख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणाम्।
तत्तद्दर्शनमुख्यशक्तिरपि च त्वं ब्रह्मकर्मेश्वरी
कर्ताहंन्पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुः॥ २०॥

हे त्रिपुरे, संध्यामयी गायत्री च परं तत्तद्दर्शनमुख्यशक्तिरपि त्वमेवेति आगमैराख्याता। कथंभूता? गायत्री तुरीयसहिता। सशिरा च। पुनः कथंभूता? महतां कर्मणां शर्मप्रदा इत्यन्वयः। गायत्री प्रसिद्धा। सशिराः शिरसा सह वर्तमाना। तुरीयसहिता तुरीयं प्रणवः। तुरीयबीजस्य प्रणवताष्टमश्लोके प्रतिपादिता। कार्यकारणयोरभेदात् कार्यभूतप्रणवस्य कारणभूततुरीयाक्षरस्य प्रणवत्वमुक्तम्। सन्ध्यामयी त्रिकालसंध्यारूपा। आगमैर्वेदैः। अथवा आगमैरागमज्ञैः। आख्याता प्रसिद्धीकृता। अत्र गायत्र्या मूलविद्यात्मकता त्रिपदीत्वेन संध्यात्रयस्य कालत्रयत्वेन गायत्र्याश्च तद्रूपत्वे "सशिरा तुरीयसहिता" इत्यनेन प्रणवादिकशिरोन्तिका गायत्री पञ्चमीविद्यात्मिकापि सूचिता, "त्रिकूटमेककूटं तु त्रिकूटे पञ्चकूटता" इति वामकेश्वरवचनात्। त्रिपुरे त्रितयगात्रस्वरूपे। त्वमेव मूलविद्यैव। महतां यागादीनाम्। शर्मप्रदा सुखरूपफलप्रदा। कर्मणां क्रियाणां तत्तद्दर्शनमुख्यशक्तिस्तद्दर्शनाधिदेवता। अपि च पुनरपि। त्वमेव त्वं श्रीमहात्रिपुरसुन्दर्येव। ब्रह्म वेदान्तिनाम्। कर्म मीमांसकानाम्। ईश्वरी शाक्तानाम्। कर्ता नैयायिकानाम्। अर्हंश्चार्वाकाणाम् (?)। पुरुषः सांख्यानाम्। हरिर्वैष्णवानाम्। सविता सौराणाम्। बुद्धो बौद्धानाम्। शिवः शैवानाम्। त्वं त्वमेव। गुरुः सर्वपूज्यत्वाद्गणेशः सर्वेषां त्वमेवेत्यर्थः॥ २०॥

अतः परं कोशपञ्चकद्वारा भगवत्या विश्वशरीरे विलीनत्वं ज्ञातुर्ब्रह्मज्ञत्वं प्रतिपादयति—

अन्नप्राणमनःप्रबोधपरमानन्दैः शिरःपक्षयुक्-
पुच्छात्मप्रकटैर्महोपनिषदां वाग्भिः प्रसिद्धीकृतैः।
कोशैः पञ्चभिरेभिरम्ब भवतीमेतत्प्रलीनामिति
ज्योतिःप्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित्॥ २१॥

हे अम्ब, एभिः पञ्चभिः कोशैः कृत्वा भवतीमेतद्विश्वशरीरे प्रलीनां यो वेद स ब्रह्मविद्भवति। एभिः कैः? अन्नप्राणमनःप्रबोधपरमानन्दैः। कथंभूतैः? शिरःपक्षयुक्पुच्छात्मप्रकटैः। पुनः किंभूतैः? महोपनिषदां वाग्भिः प्रसिद्धीकृतैरित्यन्वयः। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयैः। अन्नं शिरः प्राणमनसी पक्षौ, प्रबोधः पुच्छम्, परमानन्द आत्मा। एभिः कृत्वा प्रकटैः स्फुटैः। महोपनिषदां चतुर्वेदशिरसाम्। वाग्भिर्वाक्यैः।

प्रसिद्धीकृतैः ख्यापितैः। कोशैरुक्तरूपैः। पञ्चभिः पञ्चकारैः। एभिरुक्त-विशेषणसहितैः। अम्ब मातः। भवतीं त्वाम्। एतत्प्रलीनाम् एतस्मिन् विश्वशरीरे प्रलीनां प्रविष्टाम्। इति अमुना प्रकारेण। ज्योतिःप्रज्वल-दुज्ज्वलात्मचपलां ज्योतिषः प्रज्वलदिवोज्ज्वलात्मना चपलां चञ्चलाम्। य उपासकः। वेद जानाति। स लब्धोपदेशः। ब्रह्मवित् तत्त्वज्ञ इति ॥ २१ ॥

पूर्वं 'श्रीमातः' इत्यारभ्य 'अन्नप्राण' इत्यन्तैरेकविंशतिश्लोकैर्यद्रहस्यं प्रतिपादितं तत्र सद्गुरुतः प्राप्तदीक्षस्यैवाधिकारो नान्यस्येति सद्गुरोः सकाशाद्दीक्षाग्रहणस्यावश्यकतां तत्फलसिद्धिं च प्रतिपादयति—

सच्चित्तत्त्वमसीतिवाक्यविदितैरध्यात्मविद्याशिव-

ब्रह्माख्यैरतुलप्रभावसहितैस्तत्त्वैस्त्रिभिः सद्गुरोः।

त्वद्रूपस्य मुखारविन्दविवरात् संप्राप्य दीक्षामतो

यस्त्वां विन्दति तत्त्वतस्तदहमित्यार्ये स मुक्तो भवेत् ॥ २२ ॥

हे आर्ये, सद्गुरोर्मुखारविन्दविवरात् त्रिभिस्तत्त्वैः सह दीक्षां प्राप्य यस्त्वां विन्दति, सोऽतः 'तदहम्' इति तत्त्वतो मुक्तो भवेत्। कथं-भूतस्य सद्गुरोः? त्वद्रूपस्य। कथंभूतैस्तत्त्वैः। सच्चित्तत्त्वमसीतिवाक्य-विदितैः। कैः? अध्यात्मविद्याशिवब्रह्माख्यैः। पुनः कीदृशैः। अतुल-प्रभावसहितैः। इत्यन्वयः। सच्चित्तत्त्वमसीतिवाक्यविदितैः सत् ब्रह्म, चित् माया। इत्यनेनात्मतत्त्वं लभ्यते स्थूलदेहशोधकत्वात्। तत् मायातीतम् इत्यनेन विद्यातत्त्वं लभ्यते सूक्ष्मदेहशोधकत्वात्। त्वं स्वयम्, इत्यनेन शिवतत्त्वं लभ्यते। परदेहशोधकत्वात्। असि इत्यनेन सर्वज्ञत्वं लभ्यते। समष्टिदेहशोधकत्वात्। अध्यात्मशिवब्रह्माख्यैः। अर्थः स्पष्ट एव। अतुलप्रभावसहितैर्देहचतुष्टयशुद्धिद्वारा जीवन्मुक्तिप्रदैः। तत्त्वैर्यथार्थैः। त्रिभिस्त्रिधा भिन्नैः। सद्गुरोः सत्सम्प्रदायवतस्त्वद्रूपस्य पूर्णाभिषेकप्रभावेण देवीतादात्म्यसिद्धस्य। मुखारविन्दविवरात् वक्त्राम्बुजद्वारा। संप्राप्य लब्ध्वा। दीक्षां पूर्णाभिषेकाख्याम्। अतो दीक्षाप्राप्त्यनन्तरम्। य उपासकः। त्वां श्रीमहात्रिपुरसुन्दरीम्। विन्दति जानाति। तत्त्वतो यथार्थतः। तत् ब्रह्म। अहमहमेव इति भावनया। आर्ये सर्वोत्कृष्टे। स संप्राप्तदीक्षः। मुक्तो जीवन्मुक्तः। भवेत् स्यात् ॥ २२ ॥

ननु मुक्तिप्रदा अल्पायाससाध्या न्यासपूजाविस्ताररहिता अन्ये शैववैष्णवसौरादयो बहवो मार्गाः सन्ति, तर्हि बह्वायाससाध्ये न्यासपूजाद्यपारे ममास्मिन् मार्गे कथमेतावानादरः क्रियत इत्याक्षिप्तवतीं भगवतीं सविनयमुत्तरयति—

सिद्धान्तैर्बहुभिः प्रमाणगणितैरन्यैरविद्यातमो
नक्षत्रैरिव सर्वमन्धतमसं तावन्न निर्भिद्यते ।
यावत्ते सवितेव संमतमिदं नोदेति विश्वान्तरे
जन्तोर्जन्मनिवारणैकभिदुरं श्रीशाम्भवि श्रीशिवे ॥ २३ ॥

हे श्रीशाम्भवि, हे श्रीशिवे, अन्यैर्बहुभिः सिद्धान्तैरविद्यातमस्तावन्न निर्भिद्यते यावद् इदं संमतं विश्वान्तरे न उदेति। (तावदन्यैर्बहुभिः सिद्धान्तैरविद्यातमो न निर्भिद्यते)। कैः किमिव ? नक्षत्रैः सर्वमन्धतमसमिव। कथंभूतमिदं ते संमतम्! सवितेव। कथंभूतम्। जन्तोर्जन्मनिवारणैकभिदुरम्। कथंभूतैः ? सिद्धान्तैः। प्रमाणगणितैरित्यन्वयः। सिद्धान्तैस्तत्तद्दर्शनाङ्गीकृतैः। बहुभिर्नानाविधैः। प्रमाणगणितैः प्रमाणानि अनुमानादीनि तैर्गणितैः साधितैः। अन्यैः तार्किकाद्यैः। अविद्यातमः अविद्या अज्ञानं तदेव भ्रमोत्पादकत्वात्तमः। नक्षत्रैः तारकाद्यैः। इव तद्वत्। सर्वमशेषम्। अन्धतमसं महान्धकारः। तावत् तदवधि। न निषेधे। निर्भिद्यते निःशेषं दुरीक्रियते। यावत् यदवधि। ते तव। सवितेव सूर्यसदृशम्। संमतं सर्वमतोत्तमम्। इदं (विश्वान्तरे स्वोदरे)। नोदेति प्रचारं न प्राप्नोति। विस्वान्तरे विशेषेण स्वान्तरे स्वस्य जीवन्मुक्त्यपेक्षस्य अन्तरे हृदये। जन्तोः सांसारिकस्य। जन्मनिवारणैकभिदुरं आगामीनि जन्मानि तेषां निवारणे एकम् अद्वितीयं भिदुरं समर्थम्। श्रीशाम्भवि इदं हेतुगर्भं संबोधनम्। अनेन षडन्वयशाम्भवपर्यन्तं ज्ञानं त्वन्मतनिर्वाहकमित्युक्तम्। श्रीशिवे श्रीकल्याणरूपे ॥ २३ ॥

ननु अविद्याविनाशकमात्मानुसन्धानं सकलसंमतम्, भवति तर्हि जीवन्मुक्तिवाञ्छकैः "अथात्मावाऽरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यः" इत्युपनिषद्वाक्यं प्रमाणीकृत्य निरन्तरमात्मानुसन्धानमेव कर्तव्यम्, किमर्थमस्मिन्नतिदुघटे मन्मतेऽत्यादरः क्रियत इत्याग्रहवतीं भगवतीं मुनिरुत्तरयति—

आत्मासौ सकलेन्द्रियाश्रयमनोबुद्धयादिभिः शोचितः
कर्माबद्धतनुर्जनिं च मरणं प्राप्नोति यत् कारणम् ।
तत्ते देवि महाविलासलहरीदिव्यायुधानां जय-
स्तस्मात्त्वां गुरुमभ्युपेत्य कलयेत् त्वामेव चेन्मुच्यते ।। २४ ।।

हे देवि, तस्मात् कारणात् त्वां गुरुमभ्युपेत्य त्वामेव चेत्कलयेत् तदा मुच्यते। यस्मादसावात्मा जनिं मरणं च प्राप्नोति तत्कारणं ते महाविलासलहरीदिव्यायुधानां जयः। कथंभूतोऽसावात्मा ? सकलेन्द्रियाश्रयमनोबुद्धयादिभिः शोचितः। पुनः कथंभूतः ? कर्माबद्धतनुः। इत्यन्वयः। आत्मा जीवदशाविष्टः। असौ संसारानुपरक्तः। सकलेन्द्रियाश्रयमनोबुद्धयादिभिः सकलानां कर्मेन्द्रियाणां ज्ञानेन्द्रियाणां च आश्रयस्तदधीनतया मनोबुद्धयादयस्तैः। शोचितः शुचं प्रापितः। कर्माबद्धतनुः कर्मभिः सांसारिकैर्निषिद्धानिषिद्धैः, आबद्धा जडीकृता तनुः संस्कारः। जनिरुत्पत्तिः, ताम्। च समुच्चये। मरणं देहत्यागः, तम्। प्राप्नोति प्रयाति। यत्कारणं यन्निमित्तम्। तद्वक्ष्यमाणम्। ते भगवत्याः। देवि प्राग्वत्। महाविलासलहरीदिव्यायुधानां जयो महाविलासोऽभिनवनवविधशृङ्गारसौन्दर्यार्णवस्तस्य लहर्यस्तरङ्गास्तद्वद्दिव्यान्यप्रतिहतसामर्थ्यवन्त्यायुधानि पाशाङ्कुशधनुर्बाणाख्यानि तेषाम्। जयः प्रतापो मोहनवश्यमारणस्तम्भनादीनि। तस्मात् कारणात्। त्वां त्वत्तादात्म्यसिद्धम्। गुरुं देशिकम्। अभ्युपेत्य अत्याराध्य। कलयेत् प्रभजेत्। त्वामेव श्रीमहात्रिपुरसुन्दरीमेव। चेत्तदा। मुच्यते मोक्षो लभ्यते ॥ २४ ॥

अतः परं भगवान् दुर्वासा महामुनिः संसारसिन्धौ निमज्जनोन्मज्जनाभ्यामतिदुःखितानां किञ्चिदुत्पन्नज्ञानानां मादृशानामुपरि कृपाविष्टः सविनयं श्रीमहात्रिपुरसुन्दरीं प्रार्थयति——

नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति
प्रख्याता जनकाः कियन्त इति मे सेत्स्यन्ति चाग्रे कति ।
एतेषां गणनैव नास्ति महतः संसारसिन्धोर्विधे-
र्भीतं मां नितरामनन्यशरणं रक्षानुकम्पानिधे ।। २५ ।।

हे अनुकम्पानिधे इति कारणात् मां रक्ष। कथंभूतं माम् ? संसारसिन्धोर्विधेर्भीतम्। पुनः कथंभूतम् ? नितरामनन्यशरणम्। इतीति किम् ?

नानायोनिसहस्रसंभववशात् कति जनन्यो जाताः, पितरोऽपि कियन्तो विख्याताः, अग्रे कति सेत्स्यन्ति एतेषां गणनैव नास्तीति। कथंभूतस्य विधेः ? महत इत्यन्वयः । अर्थः स्पष्ट एव ॥ २५ ॥

ननु संसारदुःखनिवारणार्थं नानाव्रतानि नानायागादिक्रियाः प्राक्तनाचार्यैः प्रोक्तः कथं न क्रियन्ते । मदाराधनायामेव किमाधिक्यमिति देव्याक्षेपे मुनिराह——

देहक्षोभकरैर्व्रतैर्बहुविधैर्दानैश्च होमैर्जपैः
संतानैर्हयमेधमुख्यसुमुखैर्नानाविधैः कर्मभिः ।
यत्संकल्पविकल्पभावमलिनं ख्यातं पदं तस्य ते
दूरादेव निवर्तते परतरं मातः पदं निर्मलम् ॥ २६ ॥

हे मातः, तस्य यत्पदं ख्यातं तन्नानाविधैः कर्मभिः कृत्वा संकल्पविकल्पभावमलिनं भवति । ते पदं दूरादेव निवर्तते । कथंभूतं ते पदम् ? परतरं निर्मलं चेत्यन्वयः । देहक्षोभकरैः शरीरशोषकैः । व्रतैरुपवासादिभिः । बहुविधैः नानाप्रकारैः । दानैस्तुलापुरुषादिभिः । जपैरन्यदेवताविषयैः । संतानैर्निरन्तरान्नसत्रादिभिः हयमेधमुख्यसुमखैरश्वमेधमुख्यमहायज्ञैः । नानाविधैर्बहुप्रकारैः । कर्मभिः क्रियाभिः । यत्प्राप्यम् । संकल्पविकल्पभावमलिनं संकल्पः करोमि, विकल्पो न करोमि, अनयोर्भावः संशयस्तेन मलिनं सुखदुःखफलप्रदम् । ख्यातं प्रसिद्धम् । पदं स्थानम् । तस्य कर्तुः । ते परदेवतायाः । दूरादेव बहुव्यवधानेनापि न । निवर्तते परिवर्तते । परतरं परमोत्कृष्टम् । मातरम्ब । पदं स्थानम् । निर्मलं कलङ्करहितम् ॥ २६ ॥

अतः परं सकलमातृकाप्रपञ्चमूलभूतामकारहकाररूपां परां शक्तिं प्रस्तौति——

पञ्चाशन्निजदेहजाक्षरभवैर्नानाविधैर्धातुभि-
र्बद्धार्थैः पदवाक्यमानजनकैरर्भाविनाभावितैः ।
साभिप्रायवदर्थकर्मफलदैः ख्यातैरनन्तैरिदं
विश्वं व्याप्य चिदात्मनाहमहमित्युज्जृम्भसे मातृके ॥ २७ ॥

हे मातृके, त्वं नानाविधैर्धातुभिर्विश्वं व्याप्य चिदात्मना अहमहमिति उज्जृम्भसे इत्यन्वयः । पञ्चाशन्निजदेहजाक्षरभवैर्निजदेहः पराशरीरं

तस्माज्जातानि प्रसूतानि तेभ्यो भव उत्पत्तिर्येषां तैः। पराख्पस्याक्षर-मयत्वं सर्वत्रागमे प्रसिद्धम्। नानाविधैर्बहुप्रकारैः। धातुभिः प्रसिद्धैः। बह्वर्थैर्नानार्थकैः। पदवाक्यमानजनकैः पदं अक्षरसमुदायः, वाक्यं पद-समुदायः, मानानि छन्दांसि वाक्यसमुदायरूपाणि, एतेषां जनकैः कारण-भूतैः। अर्थाविनाभावितैः अर्थं विना न भावितानि इति तैः। अर्थयुक्तै-रित्यर्थः। साभिप्रायवदर्थकर्मफलदैरभिप्रायेण कारणेन सह वर्तमाना येऽर्था घटपटादयस्तेषां कर्म कर्तव्यता तत्फलं निष्पत्तिस्तां ददति दर्शयन्ति तैः। ख्यातैः प्रसिद्धैः। अनन्तैरगणितैः। इदं विद्यमानम्। विश्वं त्रैलोक्यम्। व्याप्य परिपूर्य। चिदात्मना चैतन्यरूपेण। अहम् अहम् इति उज्जृम्भसे उद्घोषं कुरुषे। मातृके मूलभूते ॥ २७ ॥

अतः परं सिद्धं श्रीचक्रं सदैवतं प्रस्तौति––

श्रीचक्रं श्रुतिमूलकोश इति ते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षरशिवज्योतिर्मयं सर्वतः।
एतन्मन्त्रमयात्मिकाभिररुणं श्रीसुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठललिते त्वं ब्रह्मविद्या शिवे ॥ २८ ॥

हे शिवे, ते श्रीचक्रं श्रुतिमूलकोश इति ख्यातम्। कथंभूतम्। संसारचक्रात्मकम्। पुनः कथंभूतम्। तदधिष्ठिताक्षरशिवज्योतिर्मयम्। पुनः कथंभूतम्। सर्वतः श्रीसुन्दरीभिर्वृतम्। कथंभूताभिः। एतन्मन्त्र-मयात्मिकाभिः। पुनः कीदृशम्। अरुणम्। मध्ये त्वं ब्रह्मविद्या। कथंभूते मध्ये। बैन्दवसिंहपीठललिते इत्यन्वयः। श्रीचक्रं महात्रिपुरसुन्दर्याः पूजाचक्रम्। श्रुतिमूलकोशः श्रुतीनां वेदानां मूलं प्रणवः। "ओङ्कारप्रभवा वेदाः" इति वचनात्। तस्य कोशभूतं श्रीचक्रगतमध्यत्रिकोणं तस्य काम-कलाक्षरगतबिन्दुत्रयमयत्वात्। बिन्दुत्रयाणां ब्रह्मविष्णुरुद्ररूपत्वात्। "ब्रह्मबिन्दुर्महेशानी वामा शक्तिरुदीरिता" इति ज्ञानार्णववचनात्। विश्वं वमतीति वामा वामाशक्तेः शब्दार्थसृष्टिकारणत्वेन श्रीचक्रस्य श्रुतिमूल-कोशत्वमित्यादिः। इति कारणात्। ते श्रीमहात्रिपुरसुन्दर्याः। संसार-चक्रात्मकं संसारचक्रं कालचक्रं देशचक्रं च। श्रीचक्रस्य कालचक्रेण देश-चक्रेण च साम्यं तन्त्रराजेऽष्टाविंशतितमे पटले श्रीशिवेन प्रतिपादितम्। मयात्र ग्रन्थगौरवभयान्नलिख्यते। यैरेव मूलविद्याक्षरैः श्रीचक्रं प्रसृतं तैरेवाक्षरैः संसारचक्रं प्रसृतिमिति ज्ञानार्णवोक्तिः। यथा––"लकारा-

८४४८२५८४५४०

त्पृथिवी जाता सशैलवनकानना। पञ्चाशत्पीठसंपन्ना सर्वतीर्थमयी परा॥ सर्वगङ्गामयी सर्वक्षेत्रस्थानमयी शिवे। सकाराच्चन्द्रताराद्दिग्रहराशिस्वरूपिणी॥ हकाराच्छिवसंबन्धव्योममण्डलसंस्थिता। ईकाराद्विश्वकर्त्रीयं माया तुर्यात्मिका प्रिये॥ एकाराद्वैष्णवी शक्तिर्विश्वपालनतत्परा। रकारात्तेजसा युक्ता परंज्योतिःस्वरूपिणी॥ ककारात्कामदा कामरूपिणी स्फुरदव्यया। अर्धचन्द्रेण देवेशि विश्वयोनिरितीरिता। विन्दुना शिवरूपेण शून्यरूपेण साक्षिणी॥" इति। एवं संसारचक्रात्मकता मूलविद्यायास्तदतात्मकता श्रीचक्रस्येति वा साम्यम्। विख्यातं प्रसिद्धम्। तदधिष्ठिताक्षरशिवज्योतिर्मयम्। तदधिष्ठितानि श्रीचक्राधिष्ठितानि यान्यक्षराणि तान्येव बीजभूतास्तत्तदावरणदेवतादिभूतवर्णास्त एव शिवाः। अणिमासिद्ध्यादयः कामाकर्षिण्यादयः अनङ्गकुमुमादयः सर्वसंक्षोभिण्यादयः सर्वसिद्धिप्रदादयः सर्वज्ञादयो वशिन्यादयः कामेश्वर्यादय एव ज्योतींषि तन्मयं तत्प्रचुरं सर्वतः श्रीचक्रमभिव्याप्य एतन्मन्त्रमयात्मिकाभिः एतद्विद्याक्षरप्रसूताभिः। लकाराच्चतुरस्रं सदैवतं प्रसृतम्, सकारात् षोडशदलं सदैवतम्, हकारादष्टदलं सदैवतम्, ईकाराच्चतुर्दशारं सदैवतम्, एकाराद्बहिर्दशारं सदैवतम्, रकारादन्तर्दशारं सदैवतम्, ककारादष्टकोणं सदैवतम् अर्धेन्दोस्त्रिकोणं सदैवतम्, बिन्दोर्बैन्दवमिति मूलविद्यानवाक्षरैः सम्पूर्णं श्रीचक्रं सावरणं प्रसृतमिति मुनेरभिप्रायः। उक्तं च ज्ञानार्णवे— "लकारः पृथिवी बीजं तेन भूबिम्बमुच्यते। सकारश्चन्द्रमा भद्रे कलाषोडशकात्मकः॥ तस्मात् षोडशपत्रं च हकारः शिव उच्यते। अष्टमूर्तिः सदा भद्रे तस्माद्वसुदलं भवेत्॥ ईकारस्तु सदा माया भुवनानि चतुर्दश। पालयन्ती परा तस्माच्छक्रकोणं भवेत्प्रिये॥ शक्तिरेकादशस्थाने स्थित्वा सूते जगत्त्रयम्। विष्णोर्योनिरिति ख्याता सा विष्णोर्दशरूपकम्॥ एकारात्परमेशानी चक्रं व्याप्य विजृम्भिता। दशकोणकरं तस्माद्रकारो ज्योतिरव्ययः॥ कलादशान्वितो वह्निर्दशकोणप्रवर्तकः। ककारान्मदनो देवि शिवं चाष्टस्वरूपकम्॥ योनिवश्यं तदा चक्रं वसुयोन्यङ्कितं भवेत्। अर्धमात्रा गुणान् सूते नादरूपा यतस्ततः॥ त्रिकोणरूपा योनिस्तु बिन्दुना बैन्दवं भवेत्। कामेश्वरस्वरूपं तद्विश्वाधारस्वरूपकम्। श्रीचक्रं तु वरारोहे श्रीविद्यावीर्यसंभवम्॥" इति। अरुणं बालार्कप्रभम्। श्रीसुन्दरीभिर्वृतं श्रिया सौन्दर्येण सुन्दर्यः श्रीसुन्दरीप्रायाः। श्रीसुन्दर्याः पञ्चमहाशवसंनद्धसिंहासनं कामेश्वराङ्कोपवेशनमिति विशेषः। वृतं परिवेष्टितम्। मध्ये मध्यत्रिकोणमध्ये, बैन्दवसिंहपीठललिते बैन्दवं बिन्दुचक्रं तत्र सिंहासनं

पूर्वोक्तरूपं तेन ललिते निरुपमशोभान्विते। त्वं श्रीमहात्रिपुरसुन्दरी। ब्रह्मविद्या परब्रह्मात्मिका। शिवे कल्याणरूपे ॥ २८ ॥

अतः परं पूर्णाभिषेकसिद्धेन साधकेन श्रीचक्रावरणपूजानन्तरं परापूजाया अवश्यकर्तव्यत्वाद्विद्योद्धारं करोति––

बिन्दुप्राणविसर्गजीवसहितं बिन्दुत्रिबीजात्मकं
षट्कूटानि त्रिपर्ययेणनिगदेत्तारत्रिबालावलैः।
एभिः संपुटितं प्रजप्य विहरेत् प्रासादमन्त्रं परं
गुह्याद् गुह्यतमं सयोगजनितं सद्भोगमोक्षप्रदम् ॥ २९ ॥

बिन्दुः पञ्चदशस्वरः, प्राणः वकारादिः, विसर्गः किमन्त्यस्वरः, जीवः सकारः, सहितमेभिर्मिलितं हंस इति पदं बिन्द्वात्मकं हंस इति त्रिबिन्द्वात्मकम्। बिन्द्वादिकं विसर्गादिकं बिन्दुविसर्गादिकं चेति। त्रीणि कूटान्यनुक्रमेण व्युत्क्रमेणाथैतान्येव त्रीणीति एवं षट् कूटानि। यथा––आदौ पञ्चदशस्वरः हंसः १, षोडशस्वरः सोऽहम् २, अं हंसः, अः सोऽहम्, इति षड्भिरक्षरैः ३, विपर्ययेण विलोमेन तृतीयं द्वितीयं प्रथमं चेति कूटानि निगदेत् उच्चरेत्। तारत्रिबालावलैः तारत्रयं प्रणवमायाश्रीबीजानि बाला वाग्भवकामराजशक्तिबीजानि वलबीजं खप्रेमात्मकम्। एभिः सप्तबीजैः। संपुटितमनुलोमविलोमेन गर्भीकृतम्। प्रजप्य यथेष्टसंख्यां समाप्य। विहरेत् सुखमनुभवेत्। प्रासादमन्त्रं हौमिति बीजं पराप्रासादप्रासादपराख्यम्। परं परावीजं हकारं संयोजितमिति ज्ञेयम्। उत्कृष्टं गुह्याद् गुह्यतमम्। गोप्याद् गोप्यतरम्। सयोगजनितं सकारसंयोजितम्। सद्भोदमोक्षप्रदं समीचीना भोगाः स्रक्चन्दनवनितागजतुरगारोहराजमान्यतादिकाः मोक्षं च प्रयच्छतीति। एतदुक्तं भवति––क्रमेण पूर्वोक्तानि सप्त बीजानि, ततः क्रमेणैवोक्तानि त्रीणि कूटानि ततः ह्सौं ह्सौः पुनर्व्युत्क्रमेण त्रीणि कूटानि ततो व्युत्क्रमेणैवोक्तसप्तबीजानि इति महापराप्रासादविद्या। अयं श्लोकः क्षेपक इति भासते। मुनिनातिगोप्यत्वाद्विद्याक्षराणां प्रभाव एव वर्णितः। स्फुटतयोद्धारो न कृतः। मया संप्रदायशुद्धत्वादत्र व्याख्यातः ॥ २९ ॥

अतः परं श्रीत्रिपुरसुन्दरीं सर्वाभरणभूषितां बिन्दुचक्रसिंहासनोपविष्टां महाराजोपचारैराराधितां मुनिः प्रार्थयति––

आताम्रार्कसहस्रदीप्तिपरमा सौन्दर्यसारैरलं
लोकातीतमहोदयैरुपयुता सर्वोपमागोचरैः ।
नानानर्घ्यविभूषणैरगणितैर्जाज्वल्यमानाभितः
श्रीमातस्त्रिपुरारिसुन्दरि कुरु स्वान्ते निवासं मम ॥ ३० ॥

हे श्रीमातः हे त्रिपुरारिसुन्दरि, त्वं मम स्वान्ते निवासं कुरु । कथंभूता त्वम् । अगणितैर्नानानर्घ्यविभूषणैरलं यथा स्यात्तथा उपयुता सती अभितो जाज्वल्यमाना । पुनः कथंभूता । आताम्रार्कसहस्रदीप्तिपरमा । कथंभूतैर्विभूषणैः । सौन्दर्यसारैः । पुनः सहस्रदीप्तिपरमा आताम्रार्का बालार्कास्तेषां सहस्रं यस्य दीप्तिः कान्तिस्तया परमा सर्वोत्कृष्टा । सौन्दर्यसारैः सौन्दर्यमन्थनोद्भवैः । अलं पूर्णम् । लोकातीतमहोदयैर्लोकातीतो लोकोत्तरो महोदय उत्कर्षो येषाम् । मातर्जननि । त्रिपुरारिसुन्दरि त्रिपुरारिः शिवस्तस्य सुन्दरी मनोहरा । कुरु विधेहि । स्वान्ते हृदये । निवासं विश्रामम् । मम त्वदाराधमस्य ॥ ३० ॥

पूर्वश्लोकेन श्रीमहात्रिपुरसुन्दर्याः समुदायरूपेण भूषणान्यभिष्टूयेदानीं नानापुष्पालङ्कारवसनाभूषितायाः परमसौभाग्यशालिन्या दृष्टिगोचराङ्गभूषणानि महायोगीश्वरश्चरणमारम्य मुकुटान्तानि प्रस्तौति—

शिञ्जन्नूपुरपादकङ्कणमहामुद्रासुलाक्षारसा-
लङ्काराङ्कितमङ्घ्रिपङ्कजयुगं श्रीपादुकालङ्कृतम् ।
उद्भास्वन्नखचन्द्रखण्डरुचिरं राजज्जपासंनिभं
ब्रह्मादित्रिदशासुरार्चितमहं मूर्ध्नि स्मराम्यम्बिके ॥ ३१ ॥

हे अम्बिके, तेऽङ्घ्रियुगमहं मूर्ध्नि स्मरामि । कथंभूतं । शिञ्जन्नूपुरपादकङ्कणमहामुद्रासुलाक्षारसालङ्काराङ्कितम् । पुनः कथंभूतम् । श्रीपादुकालाङ्कृतम् । पुनः कीदृशम् । उद्भास्वन्नखचन्द्रखण्डरुचिरम् । पुनः कीदृशम् । राजज्जपासंनिभ । पुनः कीदृशम् । ब्रह्मादित्रिदशासुरार्चितमित्यन्वयः । शिञ्जन्निति शिञ्जन्नूपुरे पादकङ्कणे च महामुद्राश्च सुलाक्षारसश्च तैरलङ्कारितम् अङ्कितं च । अङ्घ्रिपङ्कजयुगं चरणकमलद्वन्द्वम् । श्रीपादुकालङ्कृतं श्रीपादुके चिन्तामणिरचिते ताभ्यामलङ्कृतं भूषित म् । उद्भास्वन्निति उद्ध्वं भास्वन्ति प्रकाशमानानि नखान्येव चन्द्रखण्डानि तै रुचिरं सुन्दरं । राजज्जपासंनिभं राजज्जपा नूतनजपापुष्पाणि

तैः सदृशी निभा यस्य। ब्रह्मादीति ब्रह्मादयो ब्रह्मविष्णुरुद्रास्त्रिदशा इन्द्रादयः, असुरा दैत्याः, तैरर्चितं समाराधितम्। अहं तवाराधकः। मूर्ध्नि मस्तके। स्मरामि भावयामि। अम्बिके जननि ॥ ३१ ॥

इदानीं परदेवतायाः सुभूषितं सुपूजितं नितम्बबिम्बमभिष्टौति—

आरक्तच्छविनातिमार्दवयुजा निश्वासहार्येण स-
त्कौशेयेन विचित्ररत्नखचितैर्मुक्ताफलैरुज्ज्वलैः।
कूजत्काञ्चनकिङ्किणीभिरभितः संनद्धकाञ्चीगुणै-
रादीप्तं सुनितम्बबिम्बमरुणं ते पूजयाम्यम्बिके ॥ ३२ ॥

हे अम्बिके, ते सुनितम्बबिम्बमहं पूजयामि। कथंभूतम् अरुणम्। पुनः कथंभूतम्। सत्कौशेयेन मुक्ताफलैः काञ्चीगुणैश्च आदीप्तमित्यन्वयः। आरक्तच्छविना आरक्ता छविः कान्तिर्यस्य तेन। अतिमार्दवयुजा अतिकोमलेन। निश्वासहार्येण निश्वासवायुना कम्पनयोग्येन। सत्कौशेयेन समीचीनपट्टवस्त्रेण। विचित्ररत्नखचितैर्विचित्राणि नानाविधानि रत्नानि तैः खचितैर्गुम्फितैः। मुक्ताफलैर्महाकरिकुम्भोद्भवैः। उज्ज्वलैर्दीप्तिमद्भिः। कूजत्काञ्चनकिङ्किणीभिः कूजन्त्यः काञ्चनकिङ्किण्यः क्षुद्रघण्टिकाः। अभितः समन्तात्। सन्नद्धकाञ्चीगुणैः संनद्धा सङ्घटिता काञ्ची कटिमेखला तस्या गुणैः सूत्रैः। आदीप्तं अतिशयेन प्रकाशमानम्। सुनितम्बबिम्बं सुष्ठु मनोहरं नितम्बबिम्बं श्रोणिमण्डलम्। अरुणमारक्तम्। ते श्रीमहात्रिपुरसुन्दर्याः। पूजयामि भावयामि। अम्बिके प्राग्वत् ॥ ३२ ॥

अतः परं चन्दनालिप्तं मणिमालाहारभूषितं ब्रह्मादिकानां स्तन(न्य)-पानयोग्यं परदेवताकुचकुम्भद्वयं प्रस्तौति—

कस्तूरीघनसारकुङ्कुमरजोगन्धोत्कटैश्चन्दनै-
रालिप्तं मणिमालयाऽतिरुचिरं ग्रैवेयहारादिभिः।
दीप्तं दिव्यविभूषणैरगणितैर्ज्योतिर्विभास्वत्कुच-
व्याजस्वर्णघटद्वयं हरिहरब्रह्मादिपीतं भजे ॥ ३३ ॥

हे जननि, ते कुचव्याजस्वर्णघटद्वयमहं भजे इत्यन्वयः। कस्तूरी मृगमदः, घनसारः अगरुसत्त्वं कर्पूरो वा, कुंकुमं काश्मीरप्रभवम्, एतेषां रजोगन्धैरुत्कटानि तैः। चन्दनैर्मलयजैः। आलिप्तं आसमन्तात प्रलेपितम्, मणिमालया वज्रवैदूर्यादिनिर्मितया। अतिरुचिरमत्यन्तभास्वरं ग्रैवेयहा-

रादिभिः ग्रैवेयं कण्ठभूषणं हारो गजमौक्तिकनिर्मितः तदादिभिः। दीप्तं प्रकाशमानम्। दिव्यभूषणैर्विश्वकर्मणा रचितैः। अगणितैरपरिमितैः ज्योतिरिव प्रकाशमानम्। कुचव्याजस्वर्णघटद्वयं कुचव्याजेन स्तनमिषेण स्वर्णघटद्वयम्। हरिहरब्रह्मादिपीतं तेषामेव तत्पानाधिकारत्वात्। भजे भावयामि ॥ ३३ ॥

अतः परं परदेवताया बाहुचतुष्टयं सुभूषितं कण्ठदेशं च प्रस्तौति––

मुक्तारत्नविचित्रकान्तिललितैस्ते बाहुवल्लीरहं
केयूराङ्गदबाहुदण्डवलयैर्हस्तांगुलीभूषणैः।
संपृक्ताः कलयामि हीरमणिमन्मुक्तावलीकीलित-
ग्रीवापट्टविभूषणेन सुभगं कण्ठं च कम्बुश्रियम् ।३४ ॥

हे देवि, ते बाहुवल्लीः कण्ठं च, अहं कलयामि। कथंभूता बाहुवल्लीः। केयूराङ्गदबाहुदण्डवलयैर्हस्तांगुलीभूषणैश्च संपृक्ताः। कथंभूतैर्बाहुदण्डवलयैः। मुक्तारत्नविचित्रकान्तिललितैः। कथंभूतं कण्ठम्। हीरमणिमन्मुक्तावली-कीलितग्रीवापट्टविभूषणेन सुभगम्। पुनः कथंभूतं कण्ठम्। कम्बुश्रियमित्य-न्वयः। मुक्ता प्राग्वत्। रत्नानि हीरकादीनि तेषां विचित्रा नानावर्णा कान्तिश्छविस्तया ललितैर्मनोहरैः। ते श्रीमहात्रिपुरसुन्दर्याः। बाहुवल्ली-श्चतुर्हस्तलताः। अहं त्वदाराधकः। केयूराङ्गदबाहुदण्डवलयैः केयूरा मणिबन्धनधारणयोग्याः अङ्गदा कूर्परोपरितनभागधारणयोग्यः। बाहुदण्ड-वलयानि हस्तकटकानि कङ्कणानि च तैः। हस्तांगुलीनां भूषणानि मुद्रिका-दीनि तैः। सम्पृक्ताः संयुक्ताः। कलयामि प्राग्वत्। हीरमणिमन्मुक्तावली वज्रगुलिकायुक्ता मुक्तावली तया कीलितं जडीकृतम्। ग्रीवापट्टविभूषणं तेन सुभगं कण्ठो गलदेशः। च समुच्चये। कम्बुश्रियं कम्बुः शङ्खः तद्वच्छ्रीः शोभा यस्य ॥ ३४ ॥

अतः परं देवतायाः सुप्रसन्नायाः श्रीवदनं प्रस्तौति––

उद्यत्पूर्णकलानिधिश्रिवदनं भक्तप्रसन्नं सदा
सम्फुल्लाम्बुजपत्रकान्तिसुषमाधिक्कारदक्षेक्षणम्।
सानन्दं कृतमन्दहासमसकृत्प्रादुर्भवत्कौतुकं
कुन्दाकारसुदन्तपङ्क्तिशशिभापूर्णस्मराम्यम्बिके ॥ ३५ ॥

हे अम्बिके, ते वदनं अहं स्मरामि। कथंभूतम्। सदाभक्तप्रसन्नम्। पुनः कथंभूतम्। संफुल्लाम्बुजपत्रकान्तिसुषमाधिक्कारदक्षेक्षणम्। पुनः कथंभूतम्। असकृत्सानन्दं यथा स्यात्तथा कृतमन्दहासम्। पुनः कीदृशम्। प्रादुर्भवत्कौतुकम्। पुनः कीदृशम्। कुन्दाकारसुदन्तपङ्क्तिशशिभापूर्णमित्यन्वयः। उद्यन्नुदयं प्राप्तः पूर्णकलानिधिः परिपूर्णपूर्णिमाचन्द्रस्तस्य श्रीः शोभा यस्य। भक्तप्रसन्नं भक्तानामुपासकानां प्रसन्नं वाञ्छितार्थसूचकम्। सदा निरन्तरम्। संफुल्लं विकसितमम्बुजं, कमलं तस्य पत्त्राणां कान्तिः सुषमा परमा शोभा तस्या धिक्कारे दक्षं समर्थमीक्षणं यस्य। सानन्दं यथा स्यात्तथा कृतमन्दहासं कृतः प्रकटितो मन्द ईषत् हासो येन। असकृद्वारंवारम्। प्रादुर्भवत्कौतुकं प्रद्योतितकुतूहलम्। कुन्दाकारा कुन्दकलिकाश्रेणिसमाना। सुदन्तपङ्क्तिः सुषमा शोभना दन्तानां पङ्क्तिः रदावलिर्यस्या। शशिन इव भा प्रभा तया पूर्णं व्याप्तम्। स्मरामि प्रागवत्॥ ३५॥

अतः परं परदेवतायाः सुभूषितं कर्णयुगं नासाग्रभागं च प्रस्तौति––

तप्तस्वर्णकृतोरुकुण्डलयुगं माणिक्यमुक्तोल्लस-

द्धीराबद्धमनन्यतुल्यमपरं हैमं च चक्रद्वयम्।

शुक्राकारनिकारदक्षममलं मुक्ताफलं सुन्दरं

बिभ्रत्कर्णयुगं भजामि ललितं नासाग्रभागं शिवे॥ ३६॥

हे शिवे, तव नासाग्रभागं कर्णयुगं च अहं भजे। कथंभूतं नासाग्रभागम्। अमलं सुन्दरं ललितं मुक्ताफलं बिभ्रत्। कथंभूतं मुक्ताफलम्। शुक्राकारनिकारदक्षम्। कथंभूतं कर्णयुगम्। तप्तस्वर्णकृतोरुकुण्डलयुगम्। अनन्यतुल्यां हैमं चक्रद्वयं च दधत्। कथंभूतम्। माणिक्यमुक्तोल्लसद्धीराबद्धपरमित्यन्वयः। तप्तमनलाहतं स्वर्णं जाम्बूनदं तेन कृतं निर्मितं उरु विस्तीर्णं कुण्डलयुगं ताटङ्कयुगलम्। माणिक्यानि मुक्ताश्च तैरुल्लसद्धीराबद्धम्। अनन्यतुल्यमन्येन ताटङ्कयेगेन न तुल्यं तस्माद्विलक्षणम्। अपरं द्वितीयम्। हैमं प्रागवत्। चः समुच्चये। चक्रद्वयं वर्तुलाकारं कर्णोर्ध्वभूषणम्। शुक्राकारस्य निकारे धिक्कारे दक्षं समर्थम्। अमलं निर्मलम्। मुक्ताफलं गजकुम्भोद्भवम्। सुन्दरम्। बिभ्रद् दधत्। कर्णयुगम्। भजामि प्रागवत्। ललितं मनोहरम्। नासाग्रभागम्, शिवे॥ ३६॥

अतः परं परदेवताया वेणिकां प्रस्तौति——

जातीचम्पककुन्दकेसररजोगन्धोत्किरत्केतकी-
नीपाशोकशिरीषमुख्यकुसुमैः प्रोत्तंसिता धूपिता ।
आनीलाञ्जनतुल्यमत्तमधुपश्रेणीव वेणी तव
श्रीमातः श्रयतां मदीयहृदयाम्भोजं सरोजालये ।।३७।।

हे सरोजालये, हे श्रीमातः, तव वेणी मदीयं हृदयाम्भोजं श्रयताम् । कथंभूता वेणी । जातीचम्पककुन्दकेसररजोगन्धोत्किरत्केतकीनीपाशोक-शिरीषमुख्यकुसुमैः प्रोत्तंसिता धूषिता च । आनीलाञ्जनतुल्यमत्तमधुपश्रेणी-वेत्यन्वयः । श्लोकार्थः स्पष्ट एव ॥ ३७ ॥

अतः परं परदेवतायाः सुपूजितं सुभूषितं मस्तकमभिस्तौति——

लेखालभ्यविचित्ररत्नखचितं हैमं किरीटोत्तमं
मुक्ताकाञ्चनकिङ्किणीगणमहाहीरप्रबोधोज्ज्वलम् ।
चञ्चच्चन्द्रकलाकलापललितं देवद्रुपुष्पार्चितं
माल्यैरम्ब विलम्बितं सुशिखरं बिभ्रच्छिरस्ते भजे ।।३८।।

हे मातः, ते शिरो भजे। हैमं किरीटोत्तमं बिभ्रत् । कथंभूतं किरीटोत्तमम् । लेखालभ्यविचित्ररत्नखचितम् । पुनः कथंभूतम् । मुक्ताकाञ्चनकिङ्किणीमहाहीरप्रबोधोज्ज्वलम् । पुनः कीदृशम् । चञ्चच्चन्द्र-कलाकलापललितम् । सुशिखरं चेत्यन्वयः । लेखालभ्यम् । अतिनिबिडं यथा स्यात्तथा विचित्ररत्नैर्नानावर्णैः खचितं मण्डितम् । हैमं जाम्बूनदरचितम् । किरीटोत्तमं ब्रह्मादिकानां किरीटापेक्षया । मुक्ता गजमुक्ताः, काञ्चन-किङ्किणीगणः सुवर्णरचितः क्षुद्रघण्टिकासमूहः, तेन सह यो हीरप्रबन्ध-स्तेनोज्ज्वलं प्रकाशमानम् । चञ्चत्प्रद्योतत् (मानः) चन्द्रकलानां कलापः समूहः, तेन ललितं मनोहरम् । देवद्रुपुष्पार्चितं कल्पद्रुमकुसुमपूजितम् । माल्यै पुष्पमालाभिः । अम्ब मातः । विलम्बितं लम्बायमानम् सुशिखरं सुष्ठुशिखरं कोट्यग्रभागम् । बिभ्रत् दधत् । शिरः मस्तकम् । ते श्रीमहा-त्रिपुरसुन्दर्याः । भजे प्राग्वत् ॥ ३८ ॥

अतः परं परदेवातायाः सभालं साधरयुगः वपुः प्रस्तौति—

शृङ्गारादिरसालयं त्रिभुवनैर्माल्यैरतुल्यैर्युतं
सर्वाङ्गीणसदङ्गरागसुरभि श्रीमद्वपुर्धूपितम् ।
ताम्बूलारुणपल्लवाधरयुतं रम्यं त्रिपुण्ड्रं दधद्
भालं नन्दनचन्दनेन जननि ध्यायामि ते मङ्गलम् ।।३९।।

हे जननि, तव वपुः, भालं च अहं ध्यायामि। कथंभूतम्। शृङ्गारादिरसालयम्। पुनः कथंभूतम्। त्रिभुवनैरतुल्यैर्माल्यैर्यतम्। पुनः कीदृशम्। सर्वाङ्गीणसदङ्गरागसुरभि। पुनः कीदृशम्। श्रीमत्। पुनः कथंभूतं। धूपितम्। पुनः कीदृशम्। ताम्बूलारुणपल्लवाधारयुतम्। कथंभूतं भालम्। नन्दनचन्दनेन रम्यं त्रिपुण्ड्रं दधत्। मङ्गलमित्यन्वयः। शृङ्गाररसादिनवरसानामालयं निवासस्थानम्। त्रिभुवनैः त्रिभुवने जातानि त्रिभुवनानि तैः। वृद्धिर्वैकल्पिकान्न। माल्यैः पुष्पैः। अतुल्यैर्निरुपमैः। युतं युक्तम्। सर्वाङ्गवर्ती सदङ्गरागः समीचीनोऽङ्गरागस्तेन सुरभि। श्रीमत् श्रीः शोभा विद्यते यस्य। वपुः स्वरूपम्। धूपितं धूपवासितम्। ताम्बूलेन अरुण आरक्तः पल्लवः अग्रभागो यस्यैतादृशेनाधरेण युतं सहितम्। रम्यं सुन्दरम्। त्रिपुण्ड्रं तिलकम्। दधत्। भालं ललाटम्। नन्दनचन्दनेन नन्दनवनोद्भवचन्दनेन। जननि। ध्यायामि भावयामि। ते श्रीपरदेवतायाः। मङ्गलं मङ्गलरूपम्॥ ३९॥

अतः परं परदेवताया ध्यानस्य फलमाह—

एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं
वृद्धोऽप्याशु युवा भवत्यनुपमः स्त्रीणामनङ्गायते ।
सोऽष्टैश्वर्यतिरस्कृताखिलसुरः श्रीजृम्भितात्मालयः
पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चिताङ्घ्रि भवेत् ।।४०।।

हे परदेवते, श्रीमत्स्वरूपमेवं यः स्मरति स वृद्धोऽपि युवा भवति, स्त्रीणां चानङ्गायते, अष्टैश्वर्यतिरस्कृताखिलसुरः श्रीजृम्भितात्मालयश्च भवति, पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चिताङ्घ्रिर्भवेदित्यन्वयः। एवम् अमुना प्रकारेण। यः साधकः। स्मरति भावयति। प्रबुद्धसुमतिः प्रबुद्धा प्रकर्षं प्राप्ता सुमतिर्यस्य। श्रीमत्स्वरूपं श्रीमत्यास्तव स्वरूपं सावयवम्। परं परमसुन्दरम्। वृद्धोऽपि गलितेन्द्रियोऽपि। आशु स्वल्पकालेन। युवा

तरुणप्रायः। भवति स्यात्। अनुपमः पुरुषार्थेन। स्त्रीणां यौवनोद्धतानाम्। अनङ्गायते सौन्दर्येण स्वरूपध्यानरतः। अष्टैश्वर्यम् अणिमादिकं गजाश्वादिकं च तेन कृत्वा तिरस्कृता लज्जां प्रापिता अखिलाश्च ते सुराश्च एतादृशः सन्। श्रिया सम्पत्त्या जृम्भितं प्रोल्लसितं आत्मनः स्वकीयमालयं मन्दिरं येन। पृथ्वीपाला राजानस्तेषां किरीटानां मुकुटानां कोटिषु शिखरेषु वलभ्यः स्वेष्टदेवताप्रसादगर्भितदीर्घाकारस्वर्णभूषणानि तदुपरितनपुष्पैर्नितौ पूजितौ अङ्घ्री चरणौ यस्य। भवेत् स्यात्॥ ४०॥

अतः परं देव्यायुधचिन्तनस्य फलमाह—

अथ तव धनुः पुण्ड्रेक्षुकृत्प्रसिद्धमतिद्युति
त्रिभुवनवधूमुद्यज्ज्योत्स्नाकलानिधिमण्डलम्।
सकलजननि स्मारं स्मारं गतः स्मरतां नर-
स्त्रिभुवनवधूमोहाम्भोधेः प्रपूर्णविधुर्भवेत्॥ ४१॥

हे सकलजननि, तव पुण्ड्रेक्षुकृद्धनुः त्रिभुवनवधूं प्रति उद्यज्ज्योत्स्नाकलानिधिमण्डलं भवति इति प्रसिद्धम्। कथंभूतं धनुः। अतिद्युति।...... नरः स्मारं स्मारं स्मरतां गतः सन् त्रिभुवनवधूमोहाम्भोधेः प्रपूर्णविधुर्भवेदित्यन्वयः। अथ अपरं च। तव श्रीमहात्रिपुरसुन्दर्याः। धनुः। पुण्ड्रेक्षुनिर्मितम्। प्रसिद्धं विख्यातम्। अतिद्युति भूरिकीर्तिमत्। त्रिभुवनवधूं प्रति उद्यज्ज्योत्स्नया कलानिधेश्चन्द्रस्य मण्डलं बिम्बं विरहोत्पादकम्। सकलजननि विश्वमातः। स्मारं स्मारं स्मरन् स्मरन्। गतः प्राप्तः। स्मरतां कन्दर्पताम्। नर उपासकः। त्रिभुवनवधूनां सुरनरनागस्त्रीणाम्। मोहरूपसमुद्रस्य वृद्धिकरः। प्रपूर्णविधुः पूर्णिमाचन्द्र एव स्यात्॥ ४१॥

प्रसूनशरपञ्चकप्रकटजृम्भणागुम्फितं
त्रिलोकमवलोकयत्यमलचेतसा चिन्तयन्।
अशेषरमणीजनस्मरविजृम्भणे यः सदा
पटुर्भवति ते शिवे त्रिजगदङ्गनाक्षोभणे॥ ४२॥

हे शिवे, यस्त्रिलोकं प्रसूनशरपञ्चकप्रकटजृम्भणागुम्फितं अमलचेतसा अवलोकयति सोऽशेषरमणीजनस्मरविजृम्भणे त्रिजगदङ्गनाक्षोभणे च पटुर्भवतीत्यन्वयः। प्रसूनानि पङ्कजादीनि। उक्तं च तन्त्रराजे—"कमलं कैरवं रक्तकह्लारेन्दीवरे तथा। सहकारमिति प्रोक्तं च पुष्पपञ्चकमीश्वरि॥"

इति। तान्येव शरा बाणास्तेषां पञ्चकं तस्य प्रकटं स्फुटं जृम्भणं विकसनं तत्र आगुम्फितं एतादृशं त्रिलोकमवलोकयति पश्यति। अमलचेतसा स्थिरान्तःकरणेन, चिन्तयन् भावयन्। अशेषरमणीजनस्मरविजृम्भणे सकलस्त्रीजनस्मरविजृम्भणे। यः साधकः। सदा निरन्तरम्। पटुः समर्थः। भवति। ते परदेवतायाः। शिवे कल्याणरूपे। त्रिजगदङ्गनानां क्षोभणे वशीकरणे॥ ४२॥

अतः परं पाशचिन्तनप्रभावं प्रतिपादयति--

पाशं प्रपूरितमहासुमतिप्रकाशो
यो बा तव त्रिपुरसुन्दरि सुन्दरीणाम्।
आकर्षणेऽखिलवशीकरणे प्रवीणं
चित्ते दधाति स जगत्त्रयवश्यकृत् स्यात्॥ ४३॥

हे महात्रिपुरसुन्दरि, अथ च यस्तव पाशं चित्ते दधाति, स प्रपूरितमहासुमतिप्रकाशः सन् जगत्त्रयवश्यकृत् स्यात्। कथंभूतं तव पाशम्। सुन्दरीणामाकर्षणे अखिलवशीकरणे च प्रवीणम्। इत्यन्वयः। अर्थः स्पष्ट एव॥ ४३॥

अतः परमङ्कुशप्रभावं प्रतिपादयति--

यः स्वान्ते कलयति कोविदस्त्रिलोक-
स्तम्भारम्भणचणमत्युदारवीर्यम्।
मातस्ते विजयमहाङ्कुशं सयोषान्
देवान् स्तम्भयति च भूभुजोऽन्यसैन्यम्॥ ४४॥

हे मातः, यस्ते विजयमहाङ्कुशं स्वान्ते कलयति स सयोषान् देवान् स्तम्भयति, भूभुजः स्तम्भयति, अन्यसैन्यं च स्तम्भयति। कथंभूतः सः। कोविदः। कथंभूतं विजयमहाङ्कुशम्। त्रिलोकस्तम्भारम्भणचणम्। पुनः कथंभूतम्। अत्युदारवीर्यमित्यन्वयः। यः साधकः। स्वान्ते हृदये। कलयति चिन्तयति। कोविदः विचक्षणः। त्रिलोकस्य स्वर्गमृत्युपातालरूपस्य। स्तम्भः ताटस्थ्यं तस्यारम्भणं कर्तव्यता तत्र चणः दक्षस्तम्। अत्युदारवीर्यम् अत्यन्तमुदारं प्रौढं वीर्यं यस्य तम्। मातर्जननि। ते प्राग्वत्। विजयमहाङ्कुशं विजयप्रदो महाङ्कुशो विजयमहाङ्कुशस्तम्। सयोषान् योषिद्भिः सह वर्तमानान्। देवान् दिविक्रीडनपरान्। स्तम्भयति स्थगयति। भूभुजः राजानस्तान्। अन्यसैन्यं परसैन्यम्॥ ४४॥

अतः परं चतुरायुधध्यानस्य विशेषफलमाह––

चापध्यानवशाद्भवोद्भवमहामोहस्य व्युज्जृम्भणं
प्रख्यातं प्रसवेषु चिन्तनवशात्तत्तच्छरव्यं सुधीः ।
पाशध्यानवशात् समस्तजगतां मृत्योर्वशत्वं महा-
दुर्गस्तम्भमहाङ्कुशस्य मननान्मायाममेयां तरेत् ॥ ४५ ॥

हे मातः, सुधीः चापध्यानवशाच्चापध्यानतत्परः सन् भवोद्भव-महामोहस्य भवात् संसारादुद्भवो यस्यैतादृशो महामोहस्तस्य व्युज्जृम्भणं विगतमुज्जृम्भणं प्रसरणं यस्मात्तथा करोति इति प्रख्यातं प्रसिद्धम् । प्रसवेषु चिन्तनवशात् पुष्पबाणभावनापरः सन् यद्यच्चिन्तयति, तत्तत् शरव्यं लक्ष्यं करोति । पाशध्यानवशात् पाशचिन्तनतत्परः सन् समस्तजगतां सकलाहितानां मृत्योः कालस्य वशत्वं नयति । महादुर्गस्तम्भमहाङ्कुशस्य मननात् निरन्तरं चिन्तनादमेयां मायां तरेत् ॥ ४५ ॥

अतः परं पूर्वं द्वाविंशतितमश्लोके 'त्वद्रूपस्य गुरोर्मुखारविन्दविवराद्दीक्षां संप्राप्य मुक्तो भवेत्' इत्युक्तम्, चतुर्विंशतितमश्लोके 'त्वां गुरुमभ्युपेत्य त्वामेव कलयेत्तदा मुच्यते' इत्युक्तम्, तर्हि साधकस्य परदेवतातादात्म्यसिद्धिकरं मातृकादिन्यासजालं नोक्तमिति सिंहावलोकनन्यायेनाशङ्क्याह––

न्यासं कृत्वा गणेशग्रहभगणमहायोगिनीराशिपीठैः
पञ्चाशन्मातृकार्णैः सहितबहुकलैरष्टवाग्देवताभिः ।
स श्रीकण्ठादियुग्मैर्निजविमलतनौ केशवाद्यैश्च तत्त्वैः
षड्त्रिंशद्भिर्धराद्यैर्भगवति भवतीं यः स्मरेत् स त्वमेव ॥ ४६ ॥

हे भगवति, एवं न्यासं कृत्वा भवतीं यः स्मरेत् स त्वमेवेत्यन्वयः । न्यासं गुरुदर्शितमार्गेण कृत्वा विन्यस्य । गणेशेत्यादिन्यासाः पद्धतिषु स्पष्टाः । निजविमलतनौ निजा स्वकीया विमला पापरहिता तनुः शरीरं तस्याम् । इत्यनेन पापपुरुषदाहादिकृतभूतशुद्धिप्राणप्रतिष्ठादेहन्यासान् कुर्यादिति सूचितम् । अन्योऽर्थः स्पष्ट एव ॥ ४६ ॥

अतः परं परदेवतोपासकस्यैहिकफलमाह—

सुरपतिपुरलक्ष्मीजृम्भणातीतलक्ष्मीः
प्रसरति निजगेहे यस्य दैवं त्वमार्ये ।
विविधबहुकलानां पात्रभूतस्य तस्य
त्रिभुवनविदिता सा जृम्भते स्फूर्तिरच्छा ॥ ४७ ॥

हे आर्ये, यस्य त्वं दैवं तस्य निजगेहे सुरपतिपुरलक्ष्मीजृम्भणातीतलक्ष्मीः प्रसरति । किं च तस्य सा अच्छा स्फूर्तिर्जृम्भते । कथंभूता । त्रिभुवनविदिता । कथंभूतस्य तस्य । विविधबहुकलानां पात्रभूतस्येत्यन्वयः । सुरपतिरिन्द्रस्तस्य पुरममरावती तत्र या लक्ष्मीः सम्पत्तिस्तस्या जृम्भणं विलासस्तदतीता ततोऽप्यधिकविलासवती । प्रसरति प्रभवति । निजगेहे उपासकालये । यस्य यस्य कस्यापि । दैवं दैवतम् । त्वं श्रीमहात्रिपुरसुन्दरीं । आर्यें श्रेष्ठे । विविधबहुकलानां विविधां नानाचमत्कारकारिण्यो बह्वयोनेकाः कला विद्यास्तासाम् । पात्रभूतस्य निवासप्रायस्य । तस्य त्वदीयस्य । त्रिभुवनविदिता लोकत्रयविख्याता । सा देव्यनुग्रहप्रसादात् (प्राप्ता) । जृम्भते प्रकाशते । स्फूर्तिश्चमत्कृतिः । अच्छा निर्दोषा ॥ ४७ ॥

अतः परं मानसार्चनमाह—

मातस्त्वं भूर्भुवः स्वर्महरसि सुतनुस्त्वन्तरिक्षेन्दुसूर्य-
रात्मा शुक्रामरेन्द्रैरपि निगममहाब्रह्मभिः प्रोतशक्तिः ।
प्राणापानादियुक्तैः कलयति सकलं मानसं ध्यानयोगं
येषां तेषां सपर्या भवति सुरकृता ब्रह्मता योगिनां च ॥४८॥

अयं श्लोकः पाठभ्रमान्मया न व्याख्यातः । शिष्टैर्विचारणीयः ॥४८॥

अतः परं सविनयं देवीं प्रार्थयति—

क्व मे बुद्धिर्वाचा परमविदुषो मन्दसरणिः
क्व ते मातर्ब्रह्मप्रमुखविबुधस्याप्तवचसाम् ।
अभून्मे विस्फूर्तिः परतरमहिम्नस्तवनुतिः
प्रसिद्धं क्षन्तव्यं बहुलतरचापल्यमिति मे ॥ ४९ ॥

हे मातः, इति कारणात् कर्म प्रसिद्धं बहुलतरचापल्यं क्षन्तव्यम्। इतीति किम्। मे मतिः क्व, मे वाचापि क्व, ते परतरमहिम्नस्तवनुतिः क्व। कथंभूता मे मतिः। मन्दसरणिः। कथंभूतस्य मे। परम् अविदुषः। कथंभूता स्तवनुतिः। ब्रह्मप्रमुखविबुधस्याप्तवचसां मन्दसरणिः॥ ४९॥

अतः परं साधकमनोगतं देवीं विज्ञापयति—

प्रसीद परदेवते मम हृदि प्रभूतं भयं
विदारय दरिद्रतां दलय देहि सर्वज्ञताम्।
बिधेहि करुणानिधे चरणपद्मयुग्मं स्वयं
विदारितजरामृति त्रिपुरसुन्दरि श्रीशिवे॥ ५०॥

हे परदेवते, त्वं प्रसीद प्रसन्ना भव। हे करुणानिधे स्वयं चरणपद्मयुग्मं विधेहि विशेषेण ध्यानयोगगम्यं कुरु। कथंभूतं विदारितजरामृति। अन्योऽर्थः स्पष्ट एव॥ ५०॥

इति त्रिपुरसुन्दरीस्तुतिमिमां पठेद्यः सुधीः
स सर्वदुरिताटवीपटलचण्डदावानलः।
भवेन्मनसि वाञ्छितं प्रचुरसिद्धिऋद्धिर्भवे-
दनेकविधिसंपदां पदमनन्यतुल्यो भवेत्॥ ५१॥

इति पूर्वोक्तां त्रिपुरसुन्दरीस्तुतिं महिम्नस्तवरूपामिमां मत्कृतां पठेत् प्रतिदिनमावर्तयेद्यः भक्तः सुधीः कृतनिश्चयः सः सर्वदुरिताटवीपटलं सर्वपापारण्यसमुदायं प्रतिचण्डदावानलो भवेत्। तस्य मनसि वाञ्छितं च भवेदित्यादि। सुगममन्यत॥ ५१॥

पुनर्मनोगतं प्रार्थयति—

संगीतं सरसं विचित्रकवितामाम्नायवाक्यस्मृतिं
व्याख्यानं हृदि तावकीनचरणद्वन्द्वं च सर्वज्ञताम्।
श्रद्धां कर्मणि शाम्भवेति विपुलं श्रीजृम्भणं मन्दिरे
सौन्दर्यं वपुषि प्रदेहि जगतामम्बेश्वरि श्रीशिवे॥ ५२॥

अर्थः स्पष्टः॥ ५२॥

अतः परं महिम्नस्तोत्रपाठनिरतस्यैहिकफलमाह——

पृथ्वीपालप्रकटमुकुटस्रग्रजोरञ्जिताङ्घ्रि-
विद्वत्पूजास्तुतिशतसमाराधितो बाधितारिः ।
विद्या सर्वाः कलयति हृदा व्याकरोति प्रवाचा
लोकाश्चर्यैर्नवनवपदैरिन्दुबिम्बप्रकाशैः ॥ ५३॥

अर्थः स्पष्टः एव ॥ ५३ ॥

भूष्यं वैदुष्यमुद्यद्दिनकरकिरणाकारमाकारतेजः
सुज्ञानं भूरिमार्गं निगमनिगमनं दुर्गमं योगमार्गम् ।
आयुष्यं ब्रह्मपोष्यं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्मपारं परतरचरणाकारमभ्येति विद्वान् ॥ ५४॥

स विद्वान् भूमौ प्रोक्तमेतदभ्येत्य देहान्ते परतरचरणाकारं ब्रह्म पारमभ्येतीत्यन्वयः। भूष्यं भूषणम्। वैदुष्यं पाण्डित्यम्। आकारते दिनकरकिरणाकारम्। भूमिमार्गं सार्वपथीनम्। सुज्ञानं निगमनिगमनं निगमानां वेदानां निगमनं व्याख्यानं करोति च। दुर्गमं दुष्प्राप्य योगमार्गं योगाभिनिवेशम्। ब्रह्मपोष्यं ब्रह्मणा तुल्यम्। आयुष्यं कल्पा स्थायित्वम्। हरगिरिविशदां कैलासवदुज्ज्वलाम्। कीर्तिमभ्येत्य अनुभू विद्वान् विद्योपासकः। देहान्ते शरीरत्यागानन्तरम्। ब्रह्मपारम् अपारं ब्र स्वरूपम्। परतरचरणाकारं परतरायाः श्रीमहात्रिपुरसुन्दर्याः चरणा निर्वाणं चरणरूपमभ्येति प्राप्नोति ॥ ५४ ॥

अतः परं दुर्वासा मुनिः स्वकृतस्तोत्रे स्वख्यात्यर्थं स्वनाम निब करोति——

दुर्वाससा विदिततत्त्वमुनीश्वरेण
विद्याकलायुवतिमन्मथमूर्तिनैतत् ।
स्तोत्रं व्यधायि रुचिरं त्रिपुराम्बिकाया
वेदागमोक्तपटलैर्विदितैकमूर्तिः ॥ ५५

दुर्वाससा त्रिपुराम्बिकायाः स्तोत्रं व्यधायि कृतमित्यन्वयः। दु
दुःखदं शणसूत्रनिर्मितवल्कलव्याघ्रचर्मगैरिकरञ्जितवस्त्रादिकं वा

यस्य। विदितं ज्ञातं तत्त्वमुपनिषत्सारं येन मुनिना महायोगीश्वराणामीश्वर आचार्य एतादृशेन। विद्यारूपाः कलारूपाश्च या युवतयः तासां मन्मथ-मूर्तिना तत्प्रादुर्भावकारकत्वात्। स्तोत्रं श्रीत्रिपुरमहिम्नाख्यम्। व्यधायि कृतम्। रुचिरं देवीप्रीतिकरम्। त्रिपुराम्बिकायाः। कथंभूतायाः। वेदोक्तैरागमोक्तैश्च पटलैः स्वरूपनिरूपकग्रन्थैर्विदिता ज्ञातैका मूर्तिः स्वरूपं यस्याः ॥ ५५ ॥

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान्।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥ ५६ ॥

सतामसतां चानुग्रहनिग्रहार्थं गृहीतः मुनिविग्रहो येन। भगवान् महानुभावः सर्वासां चतुर्वेदोक्तानाम् उपनिषदां तत्त्वनिरूपिकाणाम्। जयति सर्वोत्कर्षेण विजयते। देशिकः प्रथम आचार्यः ॥ ५६ ॥

छत्रं चामरयोर्युगं व्यजनमादर्शस्तथा मर्दलो
भेरीशङ्खमृदङ्गकाहलकलागीतं च नृत्यं तथा।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा चैतत्समस्तं मया
संकल्पेन समर्पितं ननु शिवे संतुष्टये कल्पताम् ॥

उच्चेषु नीचेष्वपि दर्शनेषु प्रकाशते देवि तव स्वरूपम्।
समुज्ज्वलत्येव हि यज्ञवाटे मातङ्गवेश्मन्यपि जातवेदाः ॥

इति त्रैपुरं श्रीमहिम्नं गुरुत्वया मया व्याकृतं प्रीययेसिद्धये च।
सतां साधकानां सुविद्यैः सुधीरैश्चिरं लोकनीयं हृदा निश्चलेन ॥

यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपम्।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते ॥

इति श्रीदुर्वासोमुनिविरचितश्रीत्रिपुरसुन्दरीमहिम्नःस्तोत्रे
श्रीमन्नित्यानन्दकृत व्याख्या समाप्तम् ॥

ॐ सच्चिदानन्दाय नमः

अथ

बोधपञ्चदशिका

श्रीमहामाहेश्वराचार्याभिनवगुप्तपादविरचिता

श्रीहरभट्टशास्त्रिकृतविवरणोपेता

इह खलु शिवाद्वयशासनाम्भोधिपारदृश्वा श्रीमान् महामाहेश्वरोऽभिनवगुप्ताख्य आचार्यवरोऽतितीक्ष्णप्रतिभाप्रसादातिशयतोऽवगाहनीयेषु शैवागमेषु केषाञ्चिदनुग्राह्याणां शिष्याणां मतिसौकुमार्यं पर्यालोच्यानायासमेव त्रिकशास्त्रसंप्रदायजिज्ञासूंस्तानुपदिदिक्षुः पञ्चदशभिः श्लोकैस्तत्प्रतिबोधनाय शास्त्रार्थमुपनिबध्नाति। तत्रादौ नित्योदितसंवित्प्रकाशस्यावभासने प्रमाणव्यापाराभाव इति प्रतिपादयन्नाह--

अनस्तमितभारूपस्तेजसां तमसामपि ।
य एकोऽन्तर्यदन्तश्च तेजांसि च तमांसि च ।। १ ।।

स्वतन्त्रशिवप्रकाशो हि सर्वाभासकः सदोदितो न स्वं प्रकाशयितुं प्रकाशान्तरमपेक्षते स्वप्रकाशत्वात्, तस्याऽस्तोदितत्वाभावात्, "सकृद्विभातोऽयमात्मा" इति, "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्" इति श्रुतेः। (बृ० आ० ४।३।२३) य एकोऽद्वितीयोऽर्कादीनां तेजसां प्रमाणादिप्रकाशानां च तथा, मदमूर्छाद्यवस्थारूपाणां तमसां बाह्याप्रकाशानामन्तरवस्थितत्वात् तदनुप्राणको बहिरपि तस्यैव संवित्प्रकाशस्य सत्त्वात्तदन्तरेव तान्यर्कादीनां तेजस्तमांसि स्वसत्तामुपयान्ति। नहि भारूपं संवित्प्रकाशं विना किमपि घटादि भावजातं प्रकाशमानतामेति, ते च प्रकाशा अस्तं यान्ति उदयन्ति च। प्रकाशः पुनरस्तोदयानाकलितः प्रमाणानामपि जीवितरूपं मूलप्रमाणं तमर्कादिप्रकाशः कश्चिदवभासयितुं न शक्नोति तस्य प्रकाश्यत्वात् स्वाभासनेऽप्यसमर्थस्य कथं परं भासयितुं प्रागल्भ्यं, प्रत्युत

स्वाभासनेऽपि संवित्प्रकाशमेवापेक्षते स इति स्वप्रकाशत्वादर्कादीनां स एव भासकः । यदुक्तम्—

'यन्न सूर्यो न वा सोमो नाग्निर्भासयतेऽपि च ॥
न चार्कसोमवह्नीनां तत्प्रकाशाद्विना महः ॥
किमप्यस्ति निजं किन्तु संविदित्थं प्रकाशते' । (तं० ३।११५)

इति । तथा गीतासु—

'न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥' (भ०गी० ११।५६)

अबोधोऽपि न बोध्यमानो बोधाद्भिद्यतेऽन्यथा तत्सत्त्वानुपपत्तेरिति स्थित्या खपुष्पादेरप्यसतो व्यापकत्वादपरिच्छिन्नः संवित्प्रकाशो विश्वत्र निर्निरोधावरणं तत्तद्वैचित्र्यात्मना विजृम्भते इत्येतेन किमपि प्रमाणादि, तत्र सर्वजीवितभूतोपयुज्यते इत्युक्तं भवति ॥ १ ॥

एवं संवित्प्रकाशः प्रकाश्यं प्रमेयं प्रकाशयतीति प्रकाशप्रकाशनीयभावे सिद्धे कथं शिवाद्वयभाव इत्याशंक्याह—

स एव सर्वभूतानां स्वभावः परमेश्वरः ।
भावजातं हि तस्यैव शक्तिरीश्वरतामयी ॥ २ ॥

स एव परमेश्वरः स्वतन्त्रचिद्घनतापरमार्थः सर्वभूतानां समग्राणां शिवादिसकलान्तानां प्रमातृवर्गाणां सकलानां प्रमेयवर्गाणां च उभयेषां ग्राह्यग्राहकरूपाणां स्फुरत्तात्मानुत्तरप्रकाशवपुः स्वभावोऽन्यथा—

'यत्तत्र नहि विश्रान्तं तन्नभः कुसुमायते ।' (तं ८।३)

इति स्थित्या संवित्प्रकाशाद्भिन्नस्याऽसत्वान्न किमपि प्रकाशेत । एतदेव हि पारमेश्वर्यमनन्यापेक्षं स्वातन्त्र्यं, यत्तत्तदनियतविश्ववैचित्र्येण स्वेच्छयैव स्वात्मभित्तौ समुन्मीलनं, तत्रापि नियताकारधारित्वे ऐश्वर्यं विघटेत । यदुक्तमाचार्येणैव—

'अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद्घटादिवत् ॥' (तं० ३।१००)

केवलं वेद्यवेदकत्वरूपस्य व्यवहारस्य मायाभूमौ कल्पितप्रमात्रपेक्षया तात्कालिकी व्यवह्रियमाणता । यदुक्तमीश्वरप्रत्यभिज्ञायाम्—

'केवलं भिन्नसंवेद्यदेशकालानुरोधतः ।
ज्ञानस्मृत्यवसायादिव्यवहारोऽनुभूयते ॥' (ई० प्र० १।५।२१)

इति। वस्तुतस्तु सदैवाभिन्नप्रकाशमयोऽनुत्तरानाख्येयसंवित्स्वभावः परमेश्वर एव स्वात्मोच्छलतया तत्तद्विश्वभावपरिस्फुरणेन चकास्तीत्यर्थः। एतदेव हेतुद्वारा स्पष्टं निरूपयन्नाह भावजातमिति, तस्यैव परमेश्वरस्य हि यस्मादीश्वरतामयी शक्तिरैश्वर्यरूपं स्वातन्त्र्यमेव वाच्यवाचकात्मविश्वपदार्थमयं भावजातं भवति, यदुक्तं मङ्गलायाम्—

'शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः ।'

इति नीत्या स्वातन्त्र्यमेव जगदात्मना प्रथते इत्यर्थः । यदुक्तम्—

'बोधो हि बोधरूपत्वादन्तर्नानाकृतीः स्थिताः ।
बहिराभासयत्येव प्राक् सामान्यविशेषतः ॥' (तं० १।२५७)

इति । तथेश्वरप्रत्यभिज्ञायाम्—

'चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥' (ई०प्र०१।५।७)

इति । अतश्च स्वैश्वर्यनिर्भरः शिव एवैकस्तथा तथा प्रस्फुरति इत्येकैव संवित्परमार्थसतीति भावः ॥ २ ॥

नन्वेवं परमेश्वरस्य शक्तयो विश्वमिति शक्तितद्वतोः परस्परं धर्मधर्मिभावेन भेदात् कथमेकशिवात्मभाव इत्याशंक्याह—

शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ॥ ३ ॥

यथाग्नेस्तच्छक्तेश्च दाहकत्वपाचकत्वप्रकाशकत्वादिविलक्षणाया अनयोरयुतसिद्धत्वात्सातत्येन समवेतयोरैकात्म्यमेव न कदाचिद् दाहिकादिस्तच्छक्तिः स्वाश्रयं वह्निमनादृत्य स्वरूपसत्तां लभते, 'यद्येन विना न तिष्ठेत् तत्तस्मान्न व्यतिरिच्यते' इति न्यायादभिन्नसारूप्यात् तादात्म्यमेवावलम्बते । यदुक्तम्—

'मातृक्लृप्ते हि भावस्य तत्र तत्र वपुष्यलम् ।
को भेदो वस्तुतो वह्नेर्दग्धृपक्तृत्वयोरिव ॥' (तं० १।७०)

इति । एवं विश्वभाववैचित्र्यप्रथामयी स्वातन्त्र्यशक्तिः शक्तिमल्लक्षणात् शिवस्वभावान्न व्यतिरेकमिच्छेत् तत्सत्त्वे हि तस्याः स्वरूपविप्रलोपात्

स्वरूपविनाशे कार्यसंपादनशक्तेरनुपपाद्यमानत्वाद्विश्वमिदं न प्रस्फुरेत् प्रस्फुरति च विश्वं तस्माच्छिवप्रकाशाभिन्ना स्वातन्त्र्यशक्तिरेव वेद्यवेदकरूपेण विस्फुरति इत्यमुनैवाशयेन शिवसूत्रेषु 'चैतन्यमात्मा' इति भावप्राधान्येन निर्देशः। नापि क्रियाभेदात् क्रियावान् भिद्यते तास्वनवरतं प्रवर्तमानास्वपि कर्तुरेकत्यानपायात्। एवं शक्तीनां बहुत्वेऽपि शक्तिमानेकत्वं न व्यभिचरति, तद्बहुत्वस्यापि एकस्यामेव स्वातन्त्र्यशक्तावन्तर्भावान्मुख्या सैव एका शक्तिशक्तिमदव्यतिरेकिणी सर्वत्राभिषिच्यते। यदुक्तम्——

'तस्मात्संवित्त्वमेवैतत्स्वातन्त्र्यं यत्तदप्यलम्।
विविच्यमानं बह्वीषु पर्यवस्यति शक्तिषु॥' (तं० १।६१)

इति। तथा——

'बहुशक्तित्वमप्यस्य तच्छक्त्यैवाऽवियुक्तता।' (तं० १।६८)

इति। तथा——

'एक एवास्य धर्मोऽसौ सर्वाक्षेपेण वर्तते।
तेन स्वातन्त्र्यशक्त्यैव युक्त इत्याञ्जसो विधिः॥' (तं० १।६७)

इति। एतदेव हृदयं विमर्शः सार इत्यादिशब्दैः परिभाष्यते, इदमेव जडप्रकाशाद्वैलक्षण्याधायि। यदुक्तं प्रत्यभिज्ञायाम्——

'स्वभावमवभासस्य विमर्शं विदुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः॥' (ई०प्र० १।५।१०)

इति। एवं मायाध्वनि दुरपह्नवत्वाद्भासमानस्यापि भेदस्य आभाससारत्वात् न स्वतन्त्रशिवाद्वयभावखण्डना इति॥ ३॥

ननु परमेश्वरस्य तत्तद्विश्ववैचित्र्यप्रथने किमुद्दिश्य प्रवृत्तिः किं च निमित्तं इत्याशंक्याह——

स एव भैरवो देवो जगद्भरणलक्षणः।
स्वात्मादर्शे समग्रं हि यच्छक्त्या प्रतिबिम्बितम्॥ ४॥

स एव शक्तिमान् स्वतन्त्रोऽनुत्तरभट्टारकः स्वस्वातन्त्र्येणोद्भासितस्य विश्वस्य स्वात्मभित्तिसंलग्नतया धारणपोषणस्वभावत्वाद् भैरवो विश्वभरितस्वरूपः——

'भयात्सर्वं रचयति सर्वदो व्यापकोऽखिले।
इति भैरवशब्दस्य सन्ततोच्चारणाच्छिवः॥' (वि० भै० १३०)

इति। विज्ञानभैरवोक्तनीत्या, पूर्णाहन्ताचमत्कारनिर्भरभैरवस्वरूपे विश्रमणाद्वा विश्वेनापि धार्यमाणः पोष्यमाणश्च सदैव विश्वमयत्वेन प्रस्फुरणात्, इत्युक्तं जगद्भरणलक्षण इति। भैरवसंविदो हि व्यतिरिच्यमानस्यान्यास्याचेत्यमानत्वात् सर्वत्र पारिपूर्ण्यं विश्वभरितस्वभावत्वात्। तस्यैव स्वैश्वर्यघनतामहिम्ना यच्छिवादिभूम्यन्तेन तत्त्वभूतभावाद्यात्मना विजृम्भणं तदेव स्वात्मगोपनात्मक्रीडारसिकस्य देवत्वं, विस्तरतस्तु भैरवदेवशब्दयोर्विवरणं श्रीतन्त्रालोके द्रष्टव्यम्। एतदेव विश्वसृष्ट्यादौ परमेश्वरस्य निमित्तं न पुनः प्राणिनां कर्मादि तत्सापेक्षत्वे हि स्वातन्त्र्यं (न पुनः प्राणिनां कर्मादि तत्सापेक्षत्वे हि स्वातन्त्र्यं) विघटेत, स्वातन्त्र्यमेवानन्दघनत्वं तदेव घनताऽतिशयप्राप्ता समुच्छलत्स्वभावत्वेन तत्तद्विश्ववैचित्र्येण स्फुरति द्योतते सर्वोत्कर्षतयाप्यास्ते। यदुक्तम्—

'तस्य स्वतन्त्रभावो हि किं किं यन्न विचिन्तयेत्।
तदुक्तं त्रिशिरःशास्त्रे स बुद्ध इति वेत्ति यः॥

इति। यच्छक्तया पराख्यया स्वात्मैव स्वच्छत्वादिना प्रतिबिम्बसहत्वाद् दर्पणस्तस्मिन् समग्रं प्रमातृप्रमेयात्मभावजातमुपादानादिसामग्रीनिरपेक्षत्वेन प्रतिबिम्बितं, दर्पणो हि बिम्बसापेक्षः स्वान्तस्तत्तद्रचनावैचित्र्यं धत्ते, एषा परा शक्तिस्तन्निरपेक्षमेव विश्ववैचित्र्यमाभासयतीत्येतदजाड्यस्य विलसितम्। यदाह भट्टउत्पलदेवः—

'निरुपादानसंभारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने॥' (२२।६)

इति। श्रीशक्तिसूत्रेष्वपि—

'स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति।' (श० सू० २)

इति। श्रीमानाचार्योऽपि—

'अन्तर्विभाति सकलं जगदात्मनीह
तद्वद्विचित्ररचना मकुरान्तराले।
बोधः पुनर्निजविमर्शनसारयोगा-
विश्वं परामृशति नो मकुरस्तथा तु॥' (तं० सा० ३ आ०)

इति। अणुप्रत्यभिज्ञायामपि—

नाथ त्वया विना बिम्बं स्वच्छे स्वात्मनि दर्शितम्।
प्रसेनादर्पणेनेव प्रभावाद्भावमण्डलम्॥ ४॥

इति। एवं वैश्वरूप्योल्लासे भेदामर्शनात् कथं भैरवस्याद्वैतत्वं स्यादित्याशंक्याह——

तस्यैवैषा परा देवी स्वरूपामर्शनोत्सुका।
पूर्णत्वं सर्वभावेषु यस्या नाल्पं न चाधिकम् ॥ ५ ॥

तस्यैव भैरवात्मनः संवित्प्रकाशस्य एषा वैश्वरूप्येणोल्लसन्ती स्वातन्त्र्याख्या शक्तिर्द्योतनादिक्रीडाशीलत्वाद् देवी स्वात्मनि प्रकाशाभेदेन विश्वस्यामर्शनावभासाभ्यां परा पूर्णतया स्फुरन्ती तत्रैव दर्पणनगरादिवद्भेदाभेदतयो विश्वश्य परामर्शनादत्यन्तं भेदेनापि मायाप्रमातुरुचितेन विमर्शनात् परा परादिसंज्ञामवाप्तापि स्वरूपस्यामर्शने स्वातन्त्र्यात् तत्तद्भावजातं स्वात्ममयमेवेति विश्वाहंभावचमत्कृतौ उत्सुका स्वात्मानमेव तथा तथा परामष्टुमौत्सुक्येन प्रवृत्ता, एवं त्रिधाप्यामर्शने व्यतिरिक्तभावौन्मुख्यविरहात्पारिपूर्ण्यादनपेता स्वस्वातन्त्र्येण स्वमेव स्वात्मनामृशति। यदुक्तं प्रत्यभिज्ञायाम्——

'स्वातन्त्र्योमुक्तमात्मानं स्वातन्त्र्यादद्वयात्मनः।
प्रभुरीशादिसङ्कल्पैर्निर्माय व्यवहारयेत् ॥' (ई०प्र०१।५।१६)

इति स्थित्या द्वैतोल्लासेऽपि नाद्वैतहानिरिति। अत एव यस्याः सर्वभावेषु साकल्येन विश्ववर्तिषु नीलसुखादिषु पदार्थेषु पूर्णत्वमखण्डं पारिपूर्ण्यं, तच्च नाल्पं नचाधिकं भावानामुदयप्रलयोः संविदोः न्यूनाधिक्याभावात् रुद्रक्षेत्रज्ञादिप्रमातृष्वपि चितो न्यूनाधिकतया विशेषाभावात्पूर्णत्वं न हीयते। यदुक्तं ब्रह्मदर्शने——

'यैव चिद्गगनाभोगभूषणे व्योम्नि भास्करे।
धराविवरकोषस्थे सैव चित्कीटकोदरे ॥'

इति। यथा प्रदेशाकाशानां महाकाशादनतिरिक्ता वृतिरेवं नीलादिप्रकाशानां ब्रह्मणे बृहत्त्वेन बृंहकतया च तदनधिकवृत्तित्वमिति ॥ ५ ॥

अत एवाभिन्नानि कृत्यानि करोति परमेश्वरो न भेदमयानीत्याह——

एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः।
विचित्रान् सृष्टिसंहारान् विधत्ते युगपद्विभुः ॥ ६ ॥

एष प्रत्यभिज्ञापदमारूढो द्योतनादिलक्षणश्चिद्देवोऽनयोक्तलक्षणया परा वाग्रूपया विश्वोल्लासनादिक्रीडाशीलत्वाद् देव्या देवसम्बन्धिन्या

वा तत्समवायधर्मिण्या सह नित्यमविरतं तत्तद्भूमिकाविजृम्भणेऽपि अव्युच्छिन्नत्वात् सदोदितायां क्रीडायां पञ्चकृत्यात्मिकायां यो रसोऽभिलाप-स्तत्रोत्सुको निरपेक्षं प्रसह्य तत्र प्रवर्तमानः। यदुक्तम्—

'सदा सृष्टिविनोदाय सदा स्थितिसुखासिने।
सदा त्रिभुवनाहारतृप्ताय स्वामिने नमः॥' (उ०स्तो० २०।६)

इति। तथा—

'प्रतिक्षणमविश्रान्तस्त्रैलोक्यं कल्पनाशतैः।
कल्पयन्नपि कोऽप्येको निर्विकल्पो जयत्यजः॥' (स्त० चि० ११२)

इति। तच्च क्रीडनं विचित्रम्, तथाहि पराभूमौ प्रकाशघनतामयानां भावानामविच्छिन्नावभासादिना सदोदितमेव पञ्चकृत्यविधायित्वं, पश्यन्त्यां चोद्बुभूषितामिदन्तावभासानामहन्तारसोद्रेकतया तत्रापि स्वाङ्गकल्पत्वेन भेदासूत्रणां विजृम्भयितस्तद्भूमिकामापन्नस्य तादृशमेव कृत्यकारित्वम्, मध्यमायां पुनरस्फुटतयाभासमानानां भावानामहन्तायामेवेदन्ताप्राधान्योद्रेचणात् तादृशमेवास्फुटकल्पं कृत्यं संकोचकाष्ठायां तु मायीयप्रमातृतायामपि सर्वथा स्वात्मविस्मृतौ तादृशमेव भेदैकसारं कृत्यम्, तत्रापि प्रमातृप्रकाशमन्तरेण नीलादीनामप्रतिष्ठत्वात् तत्कृत्यं प्रकाशमयमेव परिज्ञाय च यत्पुनः स्वरूपलाभप्रत्यापत्त्याऽणुभावात्स्वात्मनो विमुक्तिरित्यागमेषु परिगीयते इति, अत एवाह विचित्रानिति। न च ब्रह्मादिवन्नियतशक्त्या संकुचितत्वान्नियतमेव तदन्यतरत्कर्तुं शक्नुयादित्यभिप्रेत्याह—सृष्टिसंहारानिति बहुवचनं कृत्यान्तराणामुपलक्षणार्थम्। तेन सृष्टिस्थितिसंहारपिधानानुग्रहान् विधत्ते करोति। कालादिकृतोऽत्र न कश्चिन्नियम इत्याह—युगपदिति अक्रमेण, अकालकलिते परमेश्वरे तत्क्रमाभावात्, विभुरिति देशाद्यवच्छेदशून्यत्वे हेतुः अत एवाक्रमेणैव विचित्रास्वेतास्ववस्थासु विचित्राणां सृष्टिसंहाराणां कर्तृत्वमविच्छिन्नम्। अथ च कल्पितप्रमातर्यपि सदैव सर्गादिविनोदासक्तः परमेश्वरः स्वस्वातन्त्र्यमाहात्म्येन करणेश्वरीचक्रं समुल्लास्य पर्यान्दोलनक्रीडया निखिलं प्रमेयजातं सृष्टिकाल्याद्युपारोहणेन प्रोल्लासयन् परिपाट्या क्रमेण वा कालसङ्कर्षणीधाम्नि विश्रम्य स्वात्मविश्रान्तिरूपपूर्णाहंपरामर्शचमत्कारधामासादयति एवमेव भूयोभूयः क्रीडारसौत्सुक्येन विचित्रसृष्ट्यादिकारित्वं परिशीलयतीति सहृदयसंवेद्यमेतत्तन्मुखादवगन्तव्यम्। गृहीतपशुभूमिकस्य शिवस्य एतदेवाभिज्ञानं यदाह श्रीक्षेमराजः—'तथापि तद्वत्पञ्चकृत्यानि करोति' इति। अतः सर्वमिदं स्वातन्त्र्यस्यैव विलसितमिति॥ ६॥

तदाह—

अतिदुर्घटकारित्वमस्यानुत्तरमेव यत् ।
एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपता ॥ ७ ॥

एवमस्य स्वातन्त्र्यशालिनः परमेश्वरस्य यदेवाभिन्नस्य प्रकाशैक्येनावस्थितस्य ग्राह्यग्राहकात्मनो विश्वस्येदन्ताभावेनाहन्ताधिक्येन सदाशिवे ईषत्स्फुटीभावेनेश्वरे समधृततुलापुटन्यायेन शुद्धविद्यायां भेदैकप्राणेऽशुद्धाध्वनि अत्यन्तभेदेन स्वस्माद्बहिरवभासनं यदपि भासितस्यापि पुनरभेदेन स्वात्मनि प्रकाशघने निमज्जनं नामानुत्तरमनाश्रितादिभ्योऽपि अत्युत्कृष्टमतिदुर्घटकारित्वमेतदेव स्वतन्त्रत्वं स्वाच्छन्द्यं सर्वशक्तिक्रोडीकारि तत्रैव शक्त्यन्तराण्यन्तर्भूय तन्मुखप्रेक्षित्वात् तदाक्षेप्याण्येव, अत एव स्वातन्त्र्यमेव मुख्यमैश्वर्यं येनानुत्तरानन्दाद्युदयक्रमेण विसर्गपर्यन्तेन यामलप्रसरेण वा मातृकामालिनीभावमेत्य तत्तद्विचित्रवाच्यवाचकात्मना वैश्वरूप्येण प्रस्फुरणम् । यदुक्तम्—

'तस्मादनुत्तरो देवः स्वाच्छन्द्यानुत्तरत्वतः ।
विसर्गशक्तियुक्तत्वात् संपन्नो विश्वरूपकः ॥'

इति । अस्वतन्त्रस्य हि अनीश्वरतया विश्वमुद्भावयितुमसामर्थ्यात् विश्वविसर्गे तथा पञ्चविधकृत्यकारित्वे च स्वातन्त्र्यस्यैव मुख्यनिमत्तत्वात् । यदुक्तं प्रत्यभिज्ञायाम—

'चितिः प्रत्यवमर्शात्मा परावाक्स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥' (ई०प्र०१।५।१३)

इति । ऐश्वर्यमप्यस्यापरिच्छिन्नमेव, परिच्छेदे हि ब्रह्मविष्णवादिवन्नियतैकतरकार्ये व्याप्रियमाणत्वादनीश्वरत्वमेव, एषैव बोधरूपता जडप्रकाशादेर्वैलक्षण्यापादकत्वाद्विमर्शमयं बोधरूपत्वम् । यदुक्तं श्रीप्रत्यभिज्ञायाम्—

'आत्मात एव चैतन्यं चित्क्रिया चितिकर्तृता ।
तात्पर्येणोदितस्तेन जडात्स हि विलक्षणः ॥' (ई०प्र०१।५।१२)

इति । अन्यथा स्वातन्त्र्यविकलस्य बोधस्य विज्ञानाकलवदबोधरूपत्वान्मलाक्रान्तत्वं दुर्वारं स्यादिति ॥ ७ ॥

ननु किं नाम बोधरूपत्वं यदबोधाद्विलक्षमित्याशंक्य तल्लक्षणं निरूपयन्नाह—

परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम्।
जडाद्विलक्षणो बोधो यतो न परिमीयते ॥ ८ ॥

जडप्रकाशस्य स्वप्रकाशस्वभावत्वाभावात् स्वात्मानमप्यवभासयितुं सामर्थ्यं नास्ति का कथा परस्य प्रकाशने, तत्रानेलमूकत्वाद्बोधस्वभावाधिरोहणानुपपत्तिः। जडो हि किल देशकालाकारविशेषितो बोधेन परिच्छिद्यते प्रतियोगिव्यवच्छेदेन अघटाद्व्यवच्छिन्नो घट इवातद्व्यपोहनपूर्वंतदध्यवसायजीविततामाश्रयतीति इत्येतज्जडस्य लक्षणम्। तत्र प्रमात्राश्रयं ममेदं भातीति जीवन्तं प्रमातारमाश्रित्यैव घटादयः परिस्फुरन्ति नैव तेषां निजं किमपि प्रकाशमानत्वम् कल्पितस्यापि प्रमातुर्जडैकशरणत्वात् तत्पक्षपातित्वम् तस्मात् संविन्मयप्रमातर्यैव परिमीयमानस्य जडप्रकाशस्य प्रतिष्ठानम् तद्वैलक्षण्येन हि बोधो देशादिविशेषानांकलितत्वेन परिच्छेदपदवीमनारूढो नैव परिमीयते। देशादेः परिच्छेदकस्यापि प्रकाशस्वभावाद् व्यतिरिक्ताव्यतिरिक्तविकल्पोपहतत्वात्। नापि बोधव्यतिरिक्तस्य प्रमात्रन्तरस्यासत्वात् तेन क्रियमाणस्य अतद्व्यपोहनस्याभावेनाहमात्मिकाबोधविश्रान्तिविकल्पास्पदमियादिति प्रकाशविश्रान्तिरसांकेतिकीत्यादि अत्र जडाद्वैलक्षण्यं बोध्यम्। यदुक्तम्—

'प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्तितः।
उक्ता सैव च विश्रान्तिः सर्वापेक्षानिरोधतः॥
स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरतापि च।' (अज०प्र०सि०२३)

इति। एतदेव बोधस्य स्वप्रकाशत्वं यत् स्वयं भासमानः परमपि भासयन् स्वस्वातन्त्र्यात्म्यमपाचमत्करोति परमपि स्वाहन्तासंरम्भात्प्रकाशयतीति ॥ ८ ॥

स्वातन्त्र्यावभासिताः सृष्ट्यादयोऽपि न भिन्नविषया इत्याह—

एवमस्य स्वतन्त्रस्य निजशक्त्युपभेदिनः।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः ॥ ९ ॥

एवमयं परमेश्वरः स्वतन्त्रो निजया स्वाभिन्नया स्वसमवेतत्वात् शक्त्या स्वातन्त्र्येण विश्वसिसृक्षात्मकेन भेदमुपगच्छति अनाश्रितशिवादारभ्य सकलान्तप्रमातृवर्ग पर्यन्तं पाञ्चदश्यादिभेदेन तदनुरूपप्रमेयभेदेनापि

जडाजडात्मावभेदमापद्यते । अर्थाच्छक्तिरेव तत्तद्भावमण्डलरूपेणोल्लसन्ती विविधवाच्यवाचकतां भजते शक्तिमान्पुनः सर्वस्य स्वातन्त्र्यसारत्वादेक एवाच्युतप्राच्यस्वरूपः केवलं परस्परलोलीभावं प्राप्तानां शक्तीनां भासनोपरञ्जनादिभिरापाततो भेदोपभेदित्वमिव याति, न पुनस्तस्य सङ्कोचावभासनमात्रं विनान्यत्परिणामविवर्तादि संभवितुमर्हति । परिणामविवर्तादेस्तु रूपान्तरतदन्यथाभावत्वे बोधस्वभावं प्रति तद्विरुद्धाप्रकाशत्वं प्रसज्यते । तत्प्रसक्तावपि विश्वस्यान्धतमसप्रख्यत्वात् व्यवहारविप्रलोपः स्यादिति । तत्रेयति भेदपरिग्रहे परमेश्वरस्य पूर्णाहन्ताचमत्कारसारविश्वमयत्वाद्विश्वगताः सृष्टिसंहाराः स्वात्मगाः स्वाभिन्नाः, पञ्चविधकृत्यानामुपलक्षणमेतत् शिवपदे प्रकाशैक्येन स्थितत्वात् स्वरूपत्वे न स्वाङ्गकल्पताय। संस्थिताः । अर्वाक्पदेऽपि श्रीकण्ठाघोरभट्टारकादिभिः क्रियमाणस्य सर्गादेः संवित्प्रकाशादबहिरवस्थितत्वात् तन्मयत्वमेवेति तत्रापि न मनागपि विभेदकलनाया विषयीभवन्तीति, यदुक्तम्—

'.......... प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः ।'

इति ॥ ९ ॥

नन्वित्थं सर्वतः स्वस्वातन्त्र्यस्य विलसितत्वे कथमणूनां बन्धो भवतीत्याशंक्य युग्मेनाह—

तेषु वैचित्र्यमत्यन्तमूर्ध्वाधस्तिर्यगेव यत् ।
भुवनानि तदंशाश्च सुखदुःखमतिश्च या ॥ १० ॥
यदेतस्यापरिज्ञानं तत्स्वातन्त्र्यं हि वर्णितम् ।
स एव खलु संसारो मूढानां यो विभीषकः ॥ ११ ॥

तेषु सर्गादिषु पञ्चविधकृत्येषु अपरादिशक्त्युल्लासद्दर्पणनगरादिवद्भेदाभेदपरामर्शतो भेदैकनयत्वपरामर्शनाच्चात्यन्तं यद्वैचित्र्यं यद्वा क्रमाक्रमाभ्यां विश्वत्र यत्सर्गादिवैचित्र्यं, क्रमो हि नियत्यधीनः परमेश्वरस्य स्वतन्त्रत्वान्नियतिशक्तिमुखप्रेक्षित्वाभावान्न कापि परिपाटी अपेक्ष्यते। अत एव स स्वेच्छयैव क्रमेणाक्रमेण वा करोतीत्यर्थः । यच्चैव ऊर्ध्वाधुस्तिर्यक्तत्तत्सन्निवेशविशिष्टानि सर्गादिगोचराणि भुवनानि कालाग्न्यादेरनाश्रितान्तमष्टादशाधिकशतसंख्यानि संक्षेपेणागमेष्वाम्नातानि । यदुक्तं श्रीपूर्वशास्त्रे—

'एवं तु सर्वतत्त्वेषु शतमष्टादशोत्तरम् ।
भुवनानां परिज्ञेयं संक्षेपान्न तु विस्तरात् ॥'

इति विस्तरेण तु भुवनानामानन्त्यमेव यच्च तदंशा भुवनानामनेके पुरादिविभागाः, तथा तत्तद्भुवनाद्यधिष्ठात् ऋषिणामुपासनाभिः तत्तत्सालोक्याद्यवाप्तेर्नियतकालं तदीयैश्वर्योपभोगपरिसमाप्तौ तदूर्ध्वभुवनेशपदप्राप्तिः तत्रापि तदैश्वर्यादिसुखानुभवः आगमोक्तशुभाचरणाद्यसेवनाच्चाधोऽधो निरयपाते अनैश्वर्याद्याक्रान्तेर्दुर्गतिक्लेशानुभवः, इत्थं च या तेषु सुखदुःखमतिर्येन शुभाशुभकर्मसेवनात् कर्मानुरूपं तत्र तत्र संसरणम् । संवित्प्रकाश एव स्वस्वातन्त्र्यमाहात्म्यातिशयान्मूर्तिवैचित्र्येण देशाध्वानमुन्मीलयति, स एव भुवनतत्त्वकलात्मवाक्यं, तत्र मुख्यं वाच्यं भुवनानि तत्त्वकलयोस्तदन्तर्भावात् । भुवनादीन्यपि परमेश्वरान्न व्यतिरिक्तानि, तथात्वेऽप्रकाश्यमानत्वात्तत्सत्त्वानुपपत्तिः तस्मात्संविदेव तथा तथा बहिः प्रस्फुरतीति । यदुक्तम्––

'मूर्तिवैचित्र्यतो देशक्रममाभातयत्यसौ ।

इति । तथा––

'आश्यानं चिद्रसस्यौघं साकारत्वमुपागतम् ।
जगद्रूपतया वन्दे प्रत्यक्षं भैरवं वपुः ॥'

इति । तथा––

'अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः ।
यत्तत्र नहि विश्रान्तं तन्नभःकुसुमायते ॥' (तं० ८।३)

इति च ॥ ११ ॥

यदेतस्य भुवनतदंशादेस्तत्त्वाद्यध्वान्तराणामुपलक्षणीभूतस्यापरिज्ञानं स्वातन्त्र्यमेव भुवनाद्यात्मना प्रसरति एतदित्येतस्याप्रत्यभिज्ञानं तद्विपरीतदुःखाद्याकुलितबन्धपरिदृष्टिः तद्धि स्वातन्त्र्यमतिदुर्घटकारित्वसंपादनसामर्थ्यं वर्णितम् । यदुक्तम्––

'अनावृते स्वरूपेऽपि यदात्माच्छादनं विभोः ।
सैव माया यतो भेद एतावान्विश्ववृत्तिकः ॥' (तं० ४।११)

तथा च परमार्थसारे––

'परमं यत्स्वातन्त्र्यं दुर्घटसंपादनं महेशस्य ।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत् ॥'

इति। स एव खलु जडानां मायामोहितानां संसारो यो विभीषको रज्जुभुजङ्गभ्रमवन्मरणादित्रासजननः। अयं भावः, यथा भ्रान्त्या विकल्पकल्पितेऽर्थशून्ये वस्तुनि रौद्राद्याकृतिसंभावनया भीषणीयमाकारविशेषं समुल्लिख्यानर्थकारिणीं तदर्थक्रियां धत्ते, एवमेव स्वस्वातन्त्र्यापरिज्ञानादणुतामापन्नः स्वात्मा वर्णाश्रमजात्याद्यभिमानेन निबध्यते, प्रबुद्धा हि स्वात्ममयं विश्वमन्तर्बहीरूपतया प्रत्यभिजानानाः संसारान्मुच्यन्ते न च तदपरिज्ञाने किमपि स्वात्मगोपनासतत्त्वक्रीडां विना कारणमुत्पश्यामः, तथा तथा निगूहितपरमार्थत्वेन यन्महेश्वरस्य प्रसरद्रूपत्वं तदपि तस्य स्वातन्त्र्यमेव। इयं हि विमर्शलता विश्वसिसृक्षया प्रसरन्ती क्रमेण वाच्यवाचकात्मषडध्वात्मना पल्लविताज्ञानां बन्धयित्रीत्यर्थः। यदाह स्पन्दे—

'सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका॥'

इति॥ ११॥

ननु स्वातन्त्र्यप्रत्यभिज्ञानं संसाराच्चि विरतिः कथमणाभवतीत्याशंक्य युगलकेनाह—

तत्प्रसादरसादेव गुर्वागमत एव वा।
शास्त्राद्वा परमेशस्य यस्मात्कस्मादुपागतम्॥ १२॥
यत्तत्त्वस्य परिज्ञानं स मोक्षः परमेशतः।
तत्पूर्णत्वं प्रबुद्धानां जीवन्मुक्तिश्च सा स्मृता॥ १३॥

विश्वमयदुत्तीर्णस्वस्वरूपं प्रत्यभिज्ञातुं किमपि तपःपूजाक्रमादि न प्रगल्भते, तस्य मायीयत्वेनान्धतमसप्रख्यत्वादमायीयं संवित्प्रकाशं प्रकाशयितुमसामर्थ्यात्। स्वात्मोपलब्धौ तपोवैराग्याद्यपेक्षायामपि तत्संपत्तेः कारणान्तरमन्वेष्टव्यं, तत्रापि कारणान्तरमित्यनवस्थापातस्तथा च स्वातन्त्र्यं हीनं भवेत् तस्मात्परमेश्वरः स्वेच्छयेव विश्वक्रीडामुद्विभासयिषुः स्वशक्त्या तिरोधानाख्यया स्वात्मानं तिरोधाय पुनरपि तयैवानुग्रहाख्यया प्रत्यभिज्ञाय स्वमुद्वेष्टयते तच्चोद्वेष्टनं परशक्तिपातवशात्प्रतिभाप्रसादनपूर्वं स्वात्मशिवताप्रत्यभिज्ञानं शक्तिपातवैचित्र्याद्बहुधा भवती इत्याशयेन शक्तिपातकार्याणि निरूपयन्नाह—तदिति, कश्चित्तीव्रशक्तिपात-पवित्रितहृदयः सिद्धयोगिनीदर्शनचरुभोजनादिनानुपायपथेन स्वात्मानं प्रत्यभिजानातीति। यदुक्तं तन्त्रालोके—

'सिद्धानां योगिनीनां च दर्शनं चरुभोजनम् ।
कथनं संक्रमः शास्त्रे साधनं गुरुसेवनम् ।।
इत्याद्यो निरुपायस्य संक्षोपोऽयं वरानने ।' इति

अत एवोक्तम्––'तत्प्रसादरसादेव' इति एवशब्दः कारणान्तरं निरयति । प्रसादो हि संविन्नैर्मल्येन सकृदेव भैरवीयपरप्रतिभोन्मज्जनं तत्र पौनःपुन्येनोपायपरिशीलनाभावात् । यदुक्त तन्त्रालोके––

'उपायैर्न शिवो भाति भान्ति ते तत्प्रसादतः ।
स एवाहं स्वप्रकाशो भासे विश्वस्वरूपकः ।।
इत्याकर्ण्य गुरोर्वाक्यं सकृत्केचन निश्चिताः ।
विना भूयोऽनुसन्धानं भान्ति संविन्मयः स्थिताः ।।'

इति । तथा कश्चित्तीव्रशक्तिपातानुगृहीतो गुरुमुखादागमार्थं विज्ञाय अकिञ्चिच्चिन्तकत्वादिशांभवोपायक्रमेण परतत्त्वाभिज्ञतामेतीत्यत उक्तम्––'गुर्वागमत एव वा' इति । गुरुणोपदिष्टं प्रतिबोधक्रममाश्रित्य विश्ववैचित्र्यस्य चित्प्रतिबिम्बत्वेन परामर्शनादित्यर्थः । यदुक्तम्––

'इत्थं विश्वमिदं नाथे भैरवीये चिदम्बरे ।
प्रतिबिम्बमलं स्वच्छे न खल्वन्यप्रसादतः ।।' (तं० ३।६५)

इति । तथा कश्चित्सतर्कादिसहकृतेन पारमेशशास्त्रेण शाक्तपरिपाट्या प्रत्यभिज्ञां प्राप्नोति । तदुक्तम्––

'यस्य स्वतोऽयं सत्तर्कः सर्वत्रैवाधिकारवान् ।
अभिषिक्तः स्वसंवित्तिदेवीभिर्दीक्षितश्च सः ।।' (तं० ४।४२)

इति । अतः 'शास्त्राद्वा परमेशस्य' इत्युक्तम् । अधरदर्शनानि परिहृत्य पारमेशं त्रिकादिशासनमवलम्ब्य इत्यर्थः । यदुक्तम्––

'स समस्तं हि शास्त्रार्थं सत्तर्कादेव मन्यते ।
शुद्धविद्या हि तत्रास्ति सत्यं यद्यन्न भासयेत् ।।' (४।४४)

इति । तथा मंदशक्तिपातवान् कश्चिदुच्चारकरणध्यानादिना आणवोपायक्रमेण ऊर्ध्वोर्ध्वसोपानाधिरूढेऽनुत्तरपदविश्रान्तिं यातीत्यत आह––'यस्मात्कस्मादुपागतमिति' यं कंचित् स्थूलं ध्यानकरणाद्युपायमाश्रित्य उपागतं प्राप्तमित्यर्थः, येनैषां निर्व्युत्थानं सदोदितसमावेशो जायते । इत्थं यदमुत्तरसंवित्तत्त्वस्य परिज्ञानं विश्वपरिपूर्णाहंभावचमत्कारोल्लासेन स्वस्वातन्त्र्या-

भिव्यक्तिः स एव मोक्षः, न तु देवाद्यवच्छिन्न-स्थानान्तरप्राप्तिः। यदाहाचार्यः—

'मोक्षस्य नैव किञ्चिद्धामास्ति न चापि गमनमन्यत्र।
अज्ञानग्रन्थिभिद स्वशक्त्यभिव्यक्तता मोक्षः॥' (प०सा०६०)

इति। सैव परमेशता तत्तद्विश्वात्मना प्रस्फुरद्रूपत्वं पारमेश्वर्यमभिन्नप्रकाशमयं न तु भेदमयाणिमासिद्धयः। तदेव पूर्णाहन्ताविमर्शमयबोधशालिनां प्रबुद्धानां पूर्णत्वं विश्वभरितस्वभावत्वं सैव देहप्राणादि धारयतां जीवतां प्रमातृणां मुक्तिः जीवच्छिवावस्था शास्त्रेषु स्मृतेति॥ १२-१३॥

एवं बन्धमोक्षकल्पनापि कल्पितैवेत्याह—

एतौ बन्धविमोक्षौ च परमेशस्वरूपतः।
न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे॥ १४॥

एतौ समनन्तरोक्तलक्षणौ बन्धमोक्षौ च परमेश्वरेच्छामात्रकल्पितत्वात् परमेशस्वरूपतः संवित्स्वातन्त्र्यान्न भिद्येते भिन्नतया स्थितिं न यतः, तद्व्यतिरिक्तत्वेऽसंवेद्यमानत्वान्न प्रस्फुरेतामित्यर्थः। यतः स्वेच्छयैव स्वात्मप्रच्छादनक्रीडारसिकत्वान्महेश्वरो विश्वनाट्यक्रीडाप्रदर्शनाभिप्रायेण अन्तरात्मरङ्गे तत्तद्भूमिकाग्रहणं विदधत् विभावानुभावादिभिर्व्यञ्जितैः सात्त्विकभावादि—सहचरितैस्तत्तत्स्थायिभावैः समुन्मिषितामलौकिकरसचमत्कृतिमास्वादयतीत्येतद्वास्तवार्थाभिज्ञानविरहादपराभिः शक्तिभिः प्रमुषितपरमार्थानां बन्धाभिमानी जायते, अनुग्रहभाजनानां तु चिद्घनसंवित्स्वातन्त्र्यमेवान्तर्बहिर्विश्वोल्लासेन प्रस्फुरतीत्यभिज्ञातवतां अघोरात्मना शक्तिचक्रेण स्वाभिन्नं प्रकाशघनात्मविश्वं प्रदर्शयता लब्धपरमार्थनिधीनां मोक्षाभिमान इत्युभयमिदं भगवान् स्वाच्छन्द्येन विजृम्भयति। अतस्तच्छक्तिमयत्वात् तस्मान्न भिन्नमेतदिति तात्पर्यं हेतुवचनेन द्रढयति, न भेद इति, हि यस्मात्तत्त्वतः परमार्थत आत्मनि परमेश्वरे भेदो नास्ति सर्वस्य प्रकाशसारपरमार्थत्वेनाणुमात्रमपि भेदकलनाया असंभवात् तस्मात्पूर्णाहंभावचमत्कारोद्रेकात् पूर्णं पूर्णं विजृम्भमाणं नापूर्णं किमपि बन्धमोक्षादिकलनेति सर्वमनवद्यम्। यदुक्तम्—

'संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का
बन्धो यस्य न जातु तस्य वितथा मुक्तस्य मुक्तिक्रिया।
मिथ्यामोहकृदेष रज्जुभुजगच्छायापिशाचभ्रमो
मा किञ्चित्त्यज मा गृहाण विहर स्वस्थो यथावत्स्थितः॥'

इति॥ १४॥

एवं परमार्थाभिज्ञानां जीवदवस्थायामेव रागाश्वासदायिनीं पारमेश्वर्यरसनिर्भरां तत्समापत्तिमासादयितुमभ्युपायमाह––

इत्थमिच्छाकलाज्ञानशक्तिशूलाम्बुजाश्रितः ।
भैरवः सर्वभावानां स्वभावः परिशील्यते ॥ १५ ॥

इत्थमुक्तपरामर्शनेन सर्वभावानामन्तर्बहिर्वर्तिनां नीलसुखादीनां स्वभावः प्रकाशात्मा भैरवो विश्वभरितस्वभावत्वात् पूर्णः स्वतन्त्रशिवप्रकाशः परिशील्यते परामृश्यते । स्वात्मन्येव चिदाकाशे विश्वमस्यवभासयन् स्रष्टा विश्वात्मक इति प्रथया भैरवात्मतेत्युक्त्या भैरवीयो संविदेव हि बहिरन्तस्तत्तद्भावाद्यात्मना चकास्ति यत्किञ्चित्करणेश्वरीभिराभास्यते तत्सर्वं स्वात्मैव स्वात्मानं स्वातन्त्र्यात्परामृशति न व्यतिरिक्तमिति यावत् यदुक्तमीश्वरप्रत्यभिज्ञायाम्––

'स्वात्मैव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु ।'

इति । कीदृश इत्याह––इच्छेति, कलेति, क्रियाशक्तिः इच्छाज्ञानक्रियाशक्तय एवारात्रयसाम्याच्छूलं तत्र यत्मत्स्योदरीमतादिप्रसिद्धया सङ्कोचविकासधर्मशालि पद्ममौन्मनसं पदं तदाश्रितस्तदुत्तीर्णतया भासमान इत्यर्थः अथ च विश्वस्य संवित्प्रकाशादनतिरक्ततया स्थितिं प्रदर्शयितुं श्रीपराबीजस्याप्युदयः प्रोक्तः, तत्र स्वभाव इत्यनेनामृतबीजस्योद्धारः कृतः तस्यानचूकत्वादुच्चारणमशक्यमित्यतः 'अस्मिंश्चतुर्दशे धाम्नि स्फुटीभूतत्रिशक्तिके ।' इत्युक्त्या इच्छाकलेत्यनेन शूलबीजोद्धारः । भरणवमनस्वभावत्वाद्भैरव इत्यनेन बहिरन्तारूपतया द्विधा विसर्गस्योद्धारः । सर्वभावानामित्यनेनास्य व्याप्तिरुक्ता । यदुक्तं मालिनीविजये––

'सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम् ।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते ॥'

इति ।

'तथाहि सदिदं ब्रह्ममूलं मायाण्डसंज्ञितम् ।
इच्छाज्ञानक्रिया-रोहं विना नैव सदुच्यते ॥
तच्छक्तित्रितयारोहाद् भैरवीये चिदम्बरे ।
विसृज्यते हि तत्तस्माद्बहिर्वाथ विसृज्यते ॥'

इति च । एवं व्याप्तिके पराबीजे निरन्तराभ्यासकरणात्पारमेश्वरसमावेशादैश्वर्यसिद्धिरिति विश्वसिद्धिकारणैतद्बीजपरामर्शनात्करणस्य कटाक्षेण प्रदर्शनं सूचितवानाचार्यः ॥ १५ ॥

इदानीमाचार्यः स्वनामकीर्तनाच्छास्त्रार्थं प्रत्यभिमुखीकरणादुपसंहरति—

सुकुमारमतीन् शिष्यान्प्रबोधयितुमञ्जसा ।
इमेऽभिनवगुप्तेन श्लोकाः पञ्चदशोदिताः ।। १६ ।।

सुकुमारमतयो मन्दशक्तिपातवन्तः, अञ्जस सुखेन स्पष्टमन्यत् ।।१६।।

यां बोधपञ्चदशिकां मतिमान्द्यभाजां
सम्बोधनाय निबबन्ध गुरुः सुरम्याम् ।
माहेश्वरोऽभिनवगुप्त इतीड्यनामा
तत्र व्यधाद्व्यवरणं हरभट्टशास्त्री ।।
भूनन्दनन्दवेदेऽशब्दे(४९९०)लौकिके फाल्गुनेवदि ।
एकादश्यां तिथौ शास्त्री हरो विवरणं व्यधात् ।।

इति श्रीमहामाहेश्वराचार्यवर्य–श्रीमदभिनवगुप्तपादविरचितायां बोधपञ्चदशिकायां पण्डितप्रवरश्रीहरभट्टशास्त्रिकृतं विवरणं समाप्तम् ।।

ॐ सच्चिदानन्दाय नमः

अथ

शाक्तविज्ञानम्

श्रीसोमानन्दनाथविरचितम्

स्थानं प्रवेशो रूपं च लक्षं लक्षणमेव च।
उत्थापनं बोधनं च चक्रविश्राममेव च ॥ १ ॥

भूमिकागमनं चैव अन्तावस्था तथैव च।
विश्रामः परिणामश्च तथागमनमेव च ॥ २ ॥

इति त्रयोदशविधं शाक्तं विज्ञानमुत्तमम्।
सर्वेषु त्रिकशास्त्रेषु सूचितं शम्भुना स्वयम् ॥ ३ ॥

नाभ्यध अङ्गुलाः पञ्च मेढ्रस्योर्ध्वाङ्गुलद्वयम्।
तन्मध्ये कन्दनाभा च चक्रस्थानमिति स्मृतम् ॥ ४ ॥

प्राणापाननिरोधेन मनस्तत्रैव निःक्षिपेत्।
सम्यग् वायुगतिं जित्वा यावन्मध्यगतां नयेत् ॥ ५ ॥

एष प्रवेश इत्याहु रूपं वक्ष्यामि चाधुना।
शृङ्गाटकनिभं चक्रं षडरं चापरं ध्रुवम् ॥ ६ ॥

दाडिमीकुसुमप्रख्यं कन्दं वै जातिलोहितम्।
एतद्रूपं समाख्यातं तृतीयं चिन्तनात्मकम् ॥ ७ ॥

तन्मध्ये निक्षिपेच्चित्तं यावत्तत्र स्थिरीकृतम्।
त्यक्तरुद्धो यदा वायुस्तदा लक्षं विनिर्दिशेत् ॥ ८ ॥

कन्दचक्रस्य मध्यस्था त्वनाहतमयी कला।
अधोर्ध्वे रेखासंयुक्ता भुजङ्गकुटिलाकृतिः ॥ ९ ॥

ऊर्ध्वाधोऽवस्थितावस्था सूर्याचन्द्रमसावुभौ ।
सत्यं विराजमाना सा सहस्रार्कसमप्रभा ॥ १० ॥

तामेवालोकयेच्छक्तिं मनाक् कुम्भकवृत्तिना ।
एतल्लक्षणमुद्दिष्टमुत्थापनमतः परम् ॥ ११ ॥

जुषद्रेचकवृत्त्या तु मन्त्रं चैव समुच्चरेत् ।
प्रबुद्धां चिन्तयेच्छक्तिं दण्डवत्परमेश्वरीम् ॥ १२ ॥

आधारमध्यादायाता सुषुम्नामार्गमाश्रिता ।
उत्थापनं समाख्यातं बोधनं परतस्तथा ॥ १३ ॥

कन्दस्थो वेधयेन्नाभिं ततो हृत्स्थं पितामहम् ।
कण्ठस्थमच्युतं साक्षाद्रुद्रं तालुतले स्थितम् ॥ १४ ॥

भ्रुवोर्मध्यगतं त्वीशं ब्रह्मद्वारे सदाशिवम् ।
बोधयित्वा व्रजेदाशु पदं चानाश्रितं शिवम् ॥ १५ ॥

एतद्बोधनमुद्दिष्टं चक्रविश्रामणं ततः ।
स्वाभाविकं दलं दीप्तं द्रवं स्थिरनभोपमम् ॥ १६ ॥

अमृतं शेखरं चैव शक्तिर्ब्रह्मा तथैव च ।
बिन्दुनादं तथा प्रोक्तं चक्रद्वादशकं किल ॥ १७ ॥

वेधयन्ती क्रमाच्छक्तिश्चक्रे चक्रे प्रतिक्षणम् ।
विश्रमेत्सा महादेवी चक्रविश्राम उत्तमः ॥ १८ ॥

हृदयं कम्पते पूर्वं तालुकद्वारमेव च ।
शिरश्च भ्रमते तस्य दृष्टिसंक्रान्तिलक्षणम् ॥ १९ ॥

एकैकं भ्रमयत्यङ्गमङ्गप्रत्यङ्गसन्धिषु ।
घूर्णते हृदयं चास्य सम्यग्विद्याप्रभावतः ॥ २० ॥

यानि यानि विकाराणि अवस्था कुरुते सतः ।
तेषु तेषु न भेतव्यं क्रीडति परमेश्वरी ॥ २१ ॥

अमृते सेयमुन्मत्ता विकारान् कुरुते बहून् ।
मलत्रयविकारेण बहुजन्मसु यत्कृतम् ॥ २२ ॥

धुनोति समलान् पाशात् परशक्तिसमुत्थितान् ।
भूमिकागमनं प्रोक्तमन्तावस्था तथोच्यते ॥ २३ ॥

यत्संक्रान्तो रोमहर्षोऽस्रुपातो
जृम्भारम्भो गद्गदा गीर्गिरोऽन्तः ।
ग्रन्थिस्फोटः स्पर्शदिव्यप्रहर्षो
बिन्दुस्पन्दा नाभिकन्दात् स्फुरन्ति ॥ २४ ॥

अन्तावस्था समाख्याता विश्रामस्त्वधुनोच्यते ।
नाभिचक्रविनिर्याता यदा शक्तिः प्रबुध्यते ॥ २५ ॥

तदा त्वस्तमितं सर्वमक्षग्रामं बहिः स्थितम् ।
यदा सा परमा शक्तिः सुलीना परमे पदे ॥ २६ ॥

तदा न विन्दते किञ्चिद्विषयी विषयान्तरम् ।
शिवे विश्राम्यते शक्तिस्तदा विश्राम उच्यते ॥ २७ ॥

यत्र विश्रमणं शक्तेर्मनस्तत्र लयं व्रजेत् ।
तदात्मा परमात्मत्वे ज्ञातव्यो निश्चितात्मभिः ॥ २८ ॥

शिवीभूतो भवत्यात्मा परिणामः स एव हि ।
सदा स वर्षते दिव्यममृतं जन्तुजीवनम् ॥ २९ ॥

चित्तं तत्र तु सन्धार्य पुनर्देवी विशेत्तु सा ।
तदा त्वागमनं प्रोक्तमेवं सम्यक् त्रयोदश ॥ ३० ॥

इति श्रीमन्महामाहेश्वराचार्यश्रीसोमानन्दप्रभुपादविरचितं
शाक्तविज्ञानं सम्पूर्णम् ॥

ॐ श्री सच्चिदानन्दाय नमः

अथ

परमार्थचर्चा

श्रीमदभिनवगुप्तपादाचार्यविरचिता

श्रीहरभट्टशास्त्रकृतविवरणोपेता

अभिनवरूपा शक्तिस्तद्गुप्तो यो महेश्वरो देवः ।
तदुभययामलरूपमभिनवगुप्तं शिवं वन्दे ॥

इह खलु वन्द्याभिधानः श्रीमदाचार्याभिनवगुप्तप्रभुस्तीव्रशक्तिपातपवित्रिहृदयानां जनानां हृत्सु त्रिकशास्त्ररहस्यार्थसंप्रदायं संचिकामयिषुः शाम्भवोपायक्रमगर्भिण्या परमार्थचर्चाख्यया सप्तश्लोक्या परभैरवसमावेशमुन्मीलयन् परमार्थचर्चा विरचयामास । तत्र संविद्घन एक एव चिदब्धिः परमेश्वरोऽन्तर्बहिः पारिपूर्ण्येन समुच्छलत्तत्तदनन्तविश्वलहरीनिर्भरः पूर्णाहंविमर्शमयचिच्चमत्कारशालिनि स्वमहिम्न्येवावस्थितः, न ततो मनागपि सङ्कोचकलना भिन्नवेद्यवेदकाद्यात्मा त्रैकालिकी बाह्यत्वेन समुदेतीति । अथ च स एवानन्दघनतया समुच्छलत्स्वभावः स्वेच्छयैव स्वसमादेव निरुपादानसहकारिकारणादिसंभारं विश्वक्रीडामुद्भिभासयिष्यन् स्वस्वातन्त्र्येण शुद्धाशुद्धविमिश्रयरूपाणि परस्परापोहनेनावभासमानानि मातृमेयादीनि तत्सम्बन्धांश्च कार्यकारणभाववैचित्र्यादीन् दर्पणप्रतिबिम्बवदनतिरिक्तानप्यतिरिक्ततया निर्भासयति स्वात्मन्येव देशकालाद्यूपहितान् । निर्भासितानां च तेषां कालाद्यकलितः स एव पारमार्थिकस्वभाव इति वस्तुतो न किञ्चित् सृज्यते स्थाप्यते संह्रियते वेति । आनन्दघनश्चिदाकाश एव पूर्णपूर्णतरस्तथातथाघूर्णमानश्चकास्तीति षडर्धशास्त्रसंप्रदायः । अत्रैव वादिनो विब्रुवते, कथं चिदात्मा महेश्वरोऽन्तःस्थितं भावजातं स्वात्मनः सकाशात् स्वेच्छया बाह्यत्वेनाभासयन् बहिर्भूतमपि स्वात्मन्येव भासयेत् तथा–भासमानानामपि भावानां कथं स एवात्मा इत्येतत्सव विप्रतिपिद्धमालक्ष्यते इति एवं शङ्कमानानां प्रतिपक्षिणां शङ्कां निरसितुं परमार्थश्चर्च्यते ॥

तत्र चिदात्मनि महेश्वरे सर्वोऽयं लोकव्यवहारो विश्रान्त इत्येतावत्कथं प्रत्येयतामियादित्याशंक्याह––

अर्केन्दुदीपाद्यवभासभिन्नं नाभात्यतिव्याप्ततया ततश्च ।
प्रकाशरूपं तदियत्प्रकाश्य प्रकाशताख्या व्यवहार एव ॥१॥

इह तावद्घटादिरर्थः संविदो भिन्नत्वेन प्रकाशयितुं न शक्नुयात् संविदात्मत्वे तथा सोऽवभासेत। यद्यर्थानामर्थरूपत्वमेव प्रकाशमानत्वं नान्यत् तद्व्यतिरिक्तं तज्ज्ञानोदयात्प्रागिव ज्ञानोदयेऽपि न ज्ञायेत, स्वात्मन्यपि वा सोऽर्थो न व्यवस्थाप्येत अन्तरेण संवित्प्रकाशप्रसादं तद्व्यवस्थाया अनुपपत्तेरिति सर्वव्यवहार उच्छिद्येत। वेद्यधर्मत्वेऽपि प्रकाशस्य प्रमातृधर्मत्वं दुरुपपादं समर्थयितुं बीजाङ्कुरवत्प्रमातुरर्थरूपप्रकाशस्य कारणत्वे लब्धार्थाकारप्रकाशतायां तदनपेक्षणात प्रमातृलग्नता नोपपत्त्या घटते। तस्मात्प्राग्वद् दोषः प्रसज्येत। अर्थाद्भिन्नस्य प्रकाशस्य तत्सम्बन्धिता च कथं युज्येत स स्वयमप्रकाशात्मतया अप्राप्तस्वात्मलाभः कथं परं संबध्नीयात् सर्वथार्थतत्संविदोर्भिन्नतायां मुक्तदोषप्रसक्तेः। तस्मादिदं सिद्धति यद्घटादेः स्वरूपं संविदभिन्नत्वमिति। अतो विश्वमिदं भावजातं संवित्प्रकाशलग्नमेव तदनधिकवृत्ति अवभासते। मायाप्रमातुः करणानुग्राहकोऽर्कादिप्रकाशोऽपि जडभावराशिसादृश्यात् पृथग्भातुं नालं संविदमवलम्ब्यैव तत्प्रकाशनात्। सर्वव्यापकत्वान्न केवलं भावमेवावभासन्ती संविद्यावत्सदा असंभाव्यमानसत्ताकस्य खपुष्पादेरभावस्यापि जीवितप्रदत्वाद्विषयतां विधत्ते इत्याशयेनोक्तं 'अर्केन्द्वित्यादि'। ततश्च संविदात्मकचित्प्रकाशमाश्रित्यैव भासमानं तदर्कादि चित्प्रकाशात्मकं न ततो मनाङ्मात्रं भिद्यते। कथं तर्हि ग्राह्यग्राहकात्मा व्यवहार इत्यत आह——येयं चिदात्मनो मायाशक्त्या परस्परं वेद्या वेदकाश्च, वेदकाच्चान्यन्यं वेद्याश्च इयन्तोऽसंख्या विभेदिताः तद्भावाख्या, स संवृतिसत्यतया व्यवहार एव मायाप्रमात्रपेक्षया भेदैकप्राणो भासते। अविच्छिन्नप्रमातुः पुनः सर्वं स्वात्मकल्पतया महामन्त्रात्मकमेव चकास्तीति भावः॥ १॥

न तु तावदमी विश्वे भावाः संविदि विश्रान्ता भवन्तु कथं तदैकात्म्यं ते समापद्येरन्, कुतश्च व्यतिरिक्ततया भासमानाः संविदं न भेदयेयुरपि इत्याशंक्याह——

ज्ञानाद्विभिन्नो नहि कश्चिदर्थस्तत्तत्कृतः संविदि नास्ति भेदः।
स्वयं प्रकाशाच्छतमैकधाम्नि प्रातिस्विकी नापि विभेदिता स्यात् ॥२॥

यतोऽर्थाः संविद्विश्रान्ता एव प्रकाशन्ते ततस्ते संविदो न विभिद्यन्ते, तेषां प्रकाशमानत्वमेव संविदभिन्नत्वं, संविदेव प्रकाशः संविन्माहात्म्यादेव मायीयप्रमातृभावकल्पनोन्मीलनाया भावाः संवित्प्रकाशदतिरिक्ता इव प्रकाशन्ते च, प्रकाशमानाश्च ते अनुज्झितसंवित्तादात्म्या अपि विच्छिन्नतया बहिरपि भान्ति। तस्मात्संवित्प्रकाशानतिरिक्तवृत्तय इति सिद्धम्। त्यक्तसंविदैकात्म्या हि प्रकाशाद्भिद्यमाना अप्रकाशतामापन्ना न कदाचिद्

भासेरन् इति लोकव्यवहारः सर्वः क्रयविक्रयाद्यात्मा विनश्येत् । न च तथा, अतः प्रकाश एव स्वातन्त्र्येण तथा तथा भाववैचित्र्येण प्रकाशते इत्याशयेन उक्तम्––'ज्ञानाद्विभिन्नो नहि कश्चिदर्थः' इति । नन्वेव तथापि वेद्याः स्वमहिम्ना संविदं विभिन्दन्तु घटसंविदसौ पटसंविदियमित्यादिनेत्याशंक्याह– 'तत्तदिति, न च भावैः क्रियमाणः संविदि भेद उपपद्यते, भावा हि संविदो भिन्नत्वेनाप्रकाशमानाः स्वसत्तां नोपलभेरन् । कथं पुनः स्वजीवितस्थानीयां संविदं विभेत्तुमुद्यञ्जीरन्, अतस्ते संविदैकात्म्यभाजस्तदन्तर्मग्ना एव । यदि स्वात्मनि भिद्यमानत्वं सहेरन् तत्संविद्भेदिनः संभाव्येरन् । ते तु तत्कर्तुमसमर्था एव । अथ भावानां स्वसंवेदनेन क्रियमाणे भेदेऽभ्युपगम्यमाने स्फुटमन्योन्याश्रयदोषापातः । यावतः परस्परं भावतत्संवेदनयोर्वैवित्तयैन अवस्थितत्यभावात् । मूर्तिक्रियावैचित्र्येणोद्भासितौ देशकालावपि वेद्यान्तर्गतौ प्रकाशैकात्म्यमुखप्रेक्षित्वात् कथंकारं प्रकाशं विभिन्ताम् । सर्वं भावजातं प्रकाशाभिन्नं प्रकाशमानत्वात् । नहि तद्भिन्नस्याप्रकाशरूपस्य प्रकाशमानत्वं युक्तं विप्रतिषिद्धत्वादिति बहुशः प्रोक्तम्, अतो देशाद्युपाधिरपि चित्प्रकाशाभिन्नं भावजातं न जातुचिद्विभिन्द्यात् इति वेद्यवत्कालादिरपि न प्रकाशस्य भेदकृत् । ननु मा वेद्या विभिन्दन् संविदस्तु संविदन्तरात् तद्भवेदेव भेद इत्याशंक्याह 'स्वयमिति' । अस्यां संविदि प्रतिवस्तु संविदन्तरेण कृता विभेदिता न भवेत्, यतः प्रकाशैकरूपा संवित् तस्या घटादिसंविदन्तरमवलम्ब्य भेदव्यवहारे संवृतिबुद्ध्या स्वीक्रियमाणेऽपि एकतरत्राप्रकाशरूपत्वमापतेत् इत्यसंविद्रूपतया न किञ्चित् स्यात्, प्रकाशैकरूपतया अविभेदिनि तस्मिन्संविदेकमयत्वमेव, परिमितप्रमातृपदे तु मायाशक्तया केवलं भिन्नतया भासमानोऽयं स्वरूपभेदो भवन्नपि प्ररोहं न याति प्रकाशैकरूपत्वात् इति, तस्माद्विश्वं तावदिदं संविद्येव विश्रान्तम् । ननु येयं संविन्मूर्धाभिषिक्ततया प्रधानीक्रियते सा शान्तब्रह्मवदौदासीन्यमवलम्बमाना कथं विश्वमाभासेत् कथं च तद्विश्रान्तिस्थानं भवितुमर्हा इत्याशंकां विशेषणद्वारेणापाकुर्वन्नाह– स्वयं प्रकाशेति, सा हि संवित्स्वयंप्रकाशा परप्रकाशमुखाधीनत्वाभावात् स्वप्रकाशा, स्वप्रकाशत्वमेवाजडत्वं यन्माहात्म्याद्भेद्यवर्गं प्रकाशैक्यतया भासयन्ती स्वानन्दरसचमत्कारपूर्णतामेति इत्यतः सा सविमर्शा, विमर्शवैधुर्ये तु जडत्वप्रसक्तेः स्वविश्रान्तिशून्या कथं परं विश्रामयितुं शक्नुयात् । अतः संविन्मयस्य परमेश्वरस्य विमर्श एव समवेतेच्छाशक्तिपर्यायो रुद्रक्षेत्रज्ञादीन् प्रमातृवर्गान् नीलसुखादिप्रमेयनिचयांश्चावभासयति तथा निर्भासितानपि तान् संविन्मये प्रकाश एव विश्रान्तान्करोतीत्यर्थः । नन्वेवं

स प्रकाशो विश्वाधारत्वे सति विश्वस्माद्भिन्न एव कथं न भायादित्याशंक्याह——'अच्छतमेति'। अच्छाच्छतरयोर्दर्पणस्फटिकयोरच्छतमत्वं नास्ति यतो दर्पणस्यैकपार्श्वप्रतिबिम्बितस्य स्फटिकस्यापि सर्वतः संक्रान्तबिम्बस्य स्वं रूपमपि पृथक् प्रथते संवित्प्रकाशस्य तु एतदेवात्यन्तनैर्मल्यं तद्विश्वप्रतिबिम्बनिर्भासनेऽपि स्वाकारस्यानवभासनं न चैवमनवभासने प्रकाशतामुज्येत इत्याह——'एकधाम्नीति'। मुख्यप्रकाशात्मनीत्यर्थः। प्रकाशतात्यागे हि तृणमात्रस्यापि अप्रकाशमानत्वमापवेदिति भावः एवं सर्वे भावाः स्वात्मनि प्रकाशातिरिक्ते असत्कल्पाः अतः संवित्प्रकाश एव स्वतन्त्रः स्वेच्छयैव स्वान्तःस्थितान् विश्वान् भावानुन्मील्य बहिर्भासितानपि तानन्तःस्थानेवाभासयन् तत्तदात्मत्वेन स्फुरतीत्यर्थः ॥ २ ॥

ननु भावा इमे वैचित्र्येण भासमानाः कथमह नुयेरन्यावता तथावभासमानानां शिव एवात्मा इत्युक्तिं कः प्रतीयात् भावा हि भेदभासनेन व्याप्ताः प्रकाशन्ते। शिवात्मकत्वं तु तेषां तद्विरोधिनैकरूपत्वेन व्याप्तं भाति, तस्मादिमे भावाः बुज पदेकात्मानोऽनेकात्मानश्च कथमित्याशंक्याह——

इत्थं स्वसंविद्घन एक एव शिवः स विश्वस्य परः प्रकाशः।
तत्रापि भात्येव विचित्रशक्तौ ग्राह्यग्रहीतृप्रविभागभेदः ॥ ३ ॥

इत्थं प्रकाशघनैकरूपायां संविदि अभिन्नवेद्यराशिना असंभाव्यमानभेदात्मना प्रकारेण स्वसंविद्घनः शिव एवैको मुख्यः सदाशिवादेर्भूमिपर्यन्तस्य स्वात्मकल्पस्य विश्वस्य प्रकाशस्तत्स्वरूपभूतः स एव हि नीलादिकमर्थजातमत्यक्तनीलादिभावमपि प्रकाशयन् प्रकाशाभेदमयतां प्रापयति, नीलादयो हि अत्यक्तस्वभावा एव चेत्यमानाः सन्तः संविदभेदमया एव। एतदेव संविद्घनात्मनः शिवस्य शिवत्वं यद्वैश्वरूप्येणावभासमानत्वेऽपि प्रकाशस्वभावादप्रच्यावः विश्वस्फुरणस्य संविन्मरीचिकल्पत्वात् चित्कचनमयत्वम् चिद्व्यतिरिक्तस्य अप्रकाशमयतया न कदाचिद्भानं संभवेत्, अत एव सैन्धवघनवदन्तर्बहिः पूर्णतया एकैव संविदानन्दातिशयेनोच्छलन्ती विश्वं विस्फुरतीत्यर्थः। नन्वेवं शिवैकात्मत्वेऽपि कथमनेकात्मतया विश्वाभास इत्याशंक्याह——'तत्रापीति'। संवित्प्रकाशैकात्मत्वावभासेऽपि परमेश्वरस्य मुख्यां स्वस्वातन्त्र्यशक्तिमवलम्ब्य निमीत्तीकृत्य च मन्त्रमहेश्वरादिप्रमात्रपेक्षया तदुचितप्रमेयभेदप्रभेदो विचित्रो भात्येव न च न भातीत्यर्थः। तस्यामेव मुख्यशक्तौ शक्त्यन्तराणामसंख्यानामन्तर्भावः। एतदेव स्वाच्छन्द्यं भगवतो यत्संविद्घनात्मक एव भवन् ग्रहीतृग्राह्यात्मना विविधरूपेण संविद्रूपादनतिरिक्तेनापि तदतिरिक्ततया भासमानेन वपुषा प्रकाशते विमृशते चेति सहृदयसंचेत्यमिदम्। मन्त्र-

महेश्वरादीनां प्रमेयभेदः श्रीतन्त्रालोकादिषु निर्णीतस्तत एव विवेच्यः, विस्तरभिया नेह वितन्यते। तदेवं युगपद्भावानामनेकधा भासमानानामेकात्मत्वमनेकात्मत्वं चान्तर्बहिः स्वातन्त्र्यशक्तिवशाद्घटते। तथा वैचित्र्याभासेऽपि पूर्णाहमकृत्रिमपरामर्शचमत्कारसारतया अभेदमप्यवलम्बनं विजृम्भमानमेवेति ॥ ३ ॥

ननु विश्वमिदमीश्वरेच्छयैव यदि बहिरवभास्यते तदानीमेव स्वात्मन्येव भास्यत इति विरुद्धमेतदुपलक्ष्यते, तथा हि स्वात्मनाविभेदेन भासमानस्यार्थस्य बहिर्निभासनं विरुध्यते नहि कश्चिदर्थोऽन्तर्भासमानस्तदानीमेव बहिर्भूतश्च भासितुमुपपद्यते घट इव गृहान्तर्भूतश्चेति किमेतदित्याशंक्याह--

भेदः स चायं न ततो विभिन्नः स्वच्छन्दसुस्वच्छतमैकधाम्नः।
प्रासादहस्त्यश्वपयोदसिन्धुगिर्यादियद्वन्मणिदर्पणादेः ॥४॥

सोऽयं प्रमातृप्रमेयादीनां भेदोपभेदवैचित्र्योन्मीलनात्मा भेदोऽपि ततो बोधात्मनो भैरवस्वरूपाद्विभिन्नो नास्ति, भेदप्रकाशनमपि संविदन्तःस्थितमेव बहिरपि तत्स्वातन्त्र्याद्घटते मनागपि ततो भिन्नत्वेन परित्यक्तसंविदभेदं न स्फुरितुमुत्सहते। ननु भासते च विश्वमिदं संविदेकात्मकं चेति कथं संगच्छतामित्याशंकापासनाय विशिनष्टि--'स्वच्छन्देति'। इदमेव स्वाच्छन्द्यमप्रतिहतेच्छत्वं यद्भिन्नतया भासमानत्वेऽपि वस्तुतोऽभेदात्मना स्वात्मनोऽनधिकवृत्त्या निर्भासनम्। सेयं भगवतः पराशक्तिर्यया प्रकाशपरमार्था निखिला भावाः पूर्णाहंविमर्शसारतया संविन्मयस्वात्मरूपा आभासन्ते। नन्वेवं स्वात्मानधिकवृत्त्या भान्तोऽपि भावाः कथमाधिक्येनेव प्रकाशन्त इत्यत आह--'सुस्वच्छतमेति'। अत्यन्तनिर्मलादित्यर्थः। तत एवानधिकमपि विश्वमधिकमिव भाति सुस्वच्छतमत्वस्यैवेदं माहात्म्यं, वस्तुतो विश्वं नाम न किञ्चिद्भिन्नं वस्तु, न कदाचित्सृष्टं सृज्यते संह्रियते वा केवलं स्वैश्वर्यातिशयतः शिव एव तथा तथाऽऽभासपरमार्थेन स्वेच्छोद्भासितवेद्यवर्गेण परितो विजृम्भमाणः स्वात्मानमानन्दरसनिर्भरं रसयतीति भावः, तथा 'एक धाम्न इति' सर्वविश्रान्तिस्थानत्वादनुपचरितप्रतिष्ठात्मन इत्यर्थः। एतदेव दृष्टान्तद्वारा हृदयमङ्गमीकरोति यथा मणिदर्पणादेः स्वच्छवस्तुनः सकाशात्प्रसादादयस्तद्गताश्च अवयवावयविभावाधाराधेयभावप्रभृतयः सर्वे व्यवहारा विचित्रा मनाङ्मात्रमपि ततो न भिन्ना अविद्यमानप्रातिस्विकस्वरूपाधिक्या अपि परस्परस्वरूपवैचित्र्यवैविक्त्येन तदधिकेनेवाभासन्ते इति। स्वच्छत्वमेतदेव दर्पणादेर्यत् भिन्नदेशकालाद्युपहितं ग्रामनदीपर्वतादिकं बिम्बाभिमतं स्वात्मनि प्रतिबिम्बितत्वेऽपि स्वरूपमतिरोधाय तथात्वेन दर्शयितुं योग्यतया प्रतिबिम्बग्रहणसहिष्णुत्वमिति ॥ ४ ॥

ननु दर्पणादेः प्रतिबिम्बावभासित्वे व्यतिरिक्तस्य प्राक्सिद्धस्य बिम्बस्यापेक्षा अवश्यंभाविनी, विना बिम्बं प्रतिबिम्बं दर्शयितुसमर्थत्वादेवं चिदात्मापि स्वस्मिन् प्रतिबिम्बरूपं विश्वमाभासयन् नूनं स्वस्माद्भिन्नमेव प्रतिबिम्बार्पकं बिम्बमपेक्षेतेति, कतमत्तद्बिम्बं प्राग्लब्धसत्ताकं प्रमाणसिद्धं स्यादिशंक्याह——

आदर्शकुक्षौ प्रतिबिम्बकारि समर्पकं स्याद्यदि मानसिद्धम् ।
सुस्वच्छसंविन्मुकुरान्तराले भावेषु हेत्वन्तरमस्ति नान्यत् ॥ ५ ॥

यदि प्रत्यक्षादिना प्रमाणेन निर्मले दर्पणेऽन्तःहस्त्यश्वपुरुषनदीनगरादीनां प्रतिफलिताभासानां प्रतिबिम्बकरणहेतुः बाह्यं वस्तु समर्पकं प्रति बिम्बं ददत् बिम्बं सर्वत्र सर्वैः प्रमातृभिः परिदृश्यते, तथापि अत्यन्तनिर्मले संविद्दर्पणमध्ये विमर्शस्वातन्त्र्ययोगिनि भावेषु प्रतिबिम्बायमानेषु नास्ति पृथङ्निमित्तान्तरं प्रतिबिम्बार्पकं कारणं यद्वशाज्जगन्निर्भास्येत। विनैव बिम्बादिहेत्वन्तरं स्वविमर्शबलयोगात स्वच्छन्दः संविन्मयो भगवान् स्वात्मन्येव स्वेच्छयैव विश्वमुन्मीलयतीति रहस्यार्थः । न तु हतनय इव परमाणुकर्मादि जगदुत्पादे भिन्ननिमित्तादिकमन्वेष्यम् । शान्तब्रह्मवादिवन्मलमायादि परिकल्प्यम्, एतदेव संविन्मुकुरस्य जडबाह्यदर्पणाद्वैलक्षण्यमजडत्वापोदकं स्वाच्छ्यं नाम यत् तथा तथा भासमानमात्मानं विमृशन्नेवातिरिक्तत्वानुभवात्मनापि स्ववपुषा सर्वदा भात्येव, दर्पणस्तु तथात्वविमर्शशून्यत्वाज्जड एवेत्यतः प्रथमानमपि जगन्न बहिः सृष्टमन्तःस्थमेव चिद्धृदयायमानं सारं पूर्णतामावहतीति भावः ॥ ५ ॥

ननु परमेश्वरस्य स्वात्मन्यभेदेनान्तःस्थितं वेद्यवेदकभावजातं बहिर्विस्रष्टुमवभासयितुं च किमितीच्छा जायते, चेद् जायते किं सप्रयोजनं निष्प्रयोजनं वा । नाद्यः नित्यतृप्तस्य निराकांक्षत्वात्, द्वितीये पुनरिच्छोत्पादाभ्युपगमे सदैव बहिर्जगदवभासनं स्यात् न कदाचिद्वा तत्रापि विवर्तादिरूपं विश्वं प्रतिभासेतेत्याशंक्याह——

संविद्घनस्तेन परस्त्वमेव त्वय्येव विश्वानि चकासति द्राक् ।
स्फुरन्ति च त्वन्महसः प्रभावात् त्वमेव चैषां परमेश कर्ता । ६ ॥

तेन सविमर्शतालक्षणेन हेतुना हे परमेश ! त्वमेवान्तर्बहिः स्वात्ममयेन विश्वेन परः पूर्णः संविद्घनः असंविद्रूपस्य व्यतिरिक्तस्याभावादित्यतस्त्वत्तो बहिर्न किञ्चिद्विसृज्यते दृष्टप्रत्ययोऽयं यत्स्वप्नसंकल्पनिर्माणादौ स्वसंविद एव निरतिशयैश्वर्यवशादुपादानादिसामग्र्यपेक्षाविहीनमेव तत्तदपरिमेयानां अन्तर्व्यवस्थितभावराशीनां बहिष्क्रियायां विजम्भमाणा-

यामनतिरेकितयावलोकनमिति न किमपि स्वतन्त्रे भगवति अप्रत्येयं प्रत्युत स्वानुभवबाह्यस्य कल्पनमेवाविश्वास्यमिति सहृदयवेद्यम् । स्वतन्त्रत्वादेव निष्कारणं जगत्सिसृक्षायां नित्यप्रवृत्तो महेश्वरः सदैव पञ्चकृत्यकरणशीलः, तस्याप्रतिहतेच्छस्य स्वाच्छन्द्यं न केनापि निरोद्धुं शक्यं प्रतिक्षेप्तुं वा । स स्वेच्छयैव स्वरूपगोपनात्मिकां क्रीडामुल्लिलासयिषुः संविन्मयानेव वेद्यवेदकात्मभावराशीन् प्रति कृत्यानि करोति । मायाप्रमातृभावग्रहणेनापि जगन्नाट्यावभासनकारी पुनरपि निष्कारणमेव स्वात्मानं स्वशक्तिवीर्यप्रथनेन विगतबन्धनं विधत्ते । न च बन्धने मायाद्यावरणं निमित्तं कल्प्यम्, तदावरणे तस्य स्वनाशापत्तेः । स्वशक्तिविकासाख्ये बन्धनध्वंसेऽपि शक्तिपातं विना अन्यस्य वैराग्यादेः कारणान्तरस्य अनवस्थापातादिदोषादित्यतः पञ्चानां कृत्यानामुपलक्षणं तावत्सृष्टिस्थिती आह—'विश्वानि चकासतीति'। त्वय्येव संविद्घने विश्वानि रूपाद्यात्मकानि जगन्ति द्रागक्रममेव चकासति तवैव ज्ञानक्रियात्मनो महसः प्रभावादैश्वर्यात् स्फुरन्ति च, चकारात् त्वय्येव लीयन्ते अर्थात्संविद एवोदेत्य तथैव प्रतिबिम्बितं तदभिन्नप्रकाशात्मकं विश्वं स्वात्ममयमेवेत्यर्थः । अत एवैषां जगतां त्वमेव कर्ता, एतदेव कर्तृत्वं यदलौकिककार्यकारणभावेन उपादानादिकारणं विना विश्ववैचित्र्यावभासनं, तदन्येषां नियतिशक्तिनियन्त्रितानां मायातत्त्वावस्थितानां ब्रह्मविष्णवादीनां नियतस्वस्वकृत्यानामसंभाव्यमेव । अत एव जगत्सर्जने मायाप्रकृत्यादेः कारणाभिमतस्य चित्स्वरूपाद् भेदाभेदविकल्पैरुपतत्वात् कारणत्वं नोपपद्यते अतो विवर्तादिमयं जगन्न भवेत् । यदाहुराचार्याभिनवगुप्तपादाः—'विवर्तो ह्यसत्यरूपनिर्भासात्मा' इत्युक्तं, निर्भासते चासत्यं चेति कथं इति तु न चिन्तितम् । परिणामे तु रूपान्तरं तिरोभवति रूपान्तरं च प्रादुर्भवति इत्युक्तम् । प्रकाशस्य तु रूपान्तराभावात् तत्तिरोधाने स्यादान्ध्यम् अप्रकाशश्च प्रादुर्भवन्नैव प्रकाशेत इत्युभयथापि सुप्तं जगत्स्यादिति न पर्यालोचितम् । प्रतिबिम्बवादे च स्वच्छतामात्रं संवेदनस्य न स्वातन्त्र्यमिति तत्समर्पकवस्त्वन्तरपर्येषणा कर्त्तव्या । अविद्या चानिर्वाच्या वैचित्र्यं चाधत्ते इति व्याहतम् । पारमेश्वरी शक्तिरेवेयमिति तु हृदयावर्जकः क्रमः । तस्मादनपह्नवीयः प्रकाशविमर्शात्मा संवित्स्वभावः परमशिवो भगवान् स्वातन्त्र्यादेव रुद्रादिस्थावरान्तप्रमातृरूपतया नीलसुखादि प्रमेयरूपतया च अनतिरिक्तयाप्यतिरिक्तयेव स्वरूपानाच्छादिकया संविद्रूपानान्तरीयकस्वातन्त्र्यमहिम्ना प्रकाशते इत्ययं स्वातन्त्र्यवादः प्रोन्मीलित इति ॥ ६ ॥

एवमुक्तरूपमेव स्वात्मानं मायाप्रमातृताप्रह्वीभावेन समुत्कर्षयन्नुपसंहरति—

इत्थं स्वसंवेदनमादिसिद्धमसाध्यमात्मानमनीशमीशम् ।
स्वशक्तिसंपूर्णमदेशकालं नित्यं विभुं भैरवनाथमीडे ।। ७ ।।

इत्थमुक्तप्रकारं स्वमात्मानं स्वसंवेदनं स्वप्रकाशमीडे तत्प्रवणतया देहादिप्रमातृताभिमाननिमज्जनेन उन्मग्नसंविद्घनस्वरूपे समाविशामीत्यर्थः । ननु एतादृगात्मा केन प्रमाणेन ज्ञातुं शक्य इत्याशंक्याह– 'आदिसिद्धमिति' । सर्वेषां प्रमाणानां जीवितकल्पत्वान्न तत्र पूर्वसिद्धे परमेश्वरे प्रमाणोपयोगः । न च तार्किकादय ईश्वरसिद्धिं कुर्वन्तोऽपि साधयितुं शक्नुयुः, नित्यानवच्छिन्नप्रकाशस्वभावे तत्र उत्पादज्ञप्तिव्यापारानुपपत्तेः । प्रमातापि देहादिः स्वयं जडः कथमजडं प्रतिष्ठापयेत् संविन्मात्रोऽपि स्वातन्त्र्यवैकल्याज्जडपक्ष्य एव । न चेश्वरं निषेद्धुं कश्चिच्छक्नुयात् निषेद्धुरपि स्वयं तत्स्वभाववत्वात् प्रत्युत स्वाभावं व्यवहरन् स्ववचनविरुद्धं स्वसत्त्वमेव ज्ञाप्येप इत्याशयतोऽसाध्यमित्युक्तम् । ननु प्रसिद्धा एव ब्रह्माद्या ईश्वराः कथमप्रसिद्धमीश्वरमात्थेत्याशंक्याह– 'अनीशमिति' ईश्वरान्तरानधीनमत एव ईशं स्वतन्त्रं ज्ञातृकर्तृत्वैश्वर्यशालिनम् । ब्रह्माद्यास्त्वधरभूमिस्थास्तदीयैश्वर्यकणैरीश्वरीभूताः अस्वतन्त्रा एवेत्यर्थः । 'आत्मानमिति' ननु परं स्वया समवेतया विश्वशक्तिक्रोडीकारिण्या मुख्यया स्वातन्त्र्यशक्त्या संपूर्णं अत एव देशकालयोस्तन्निर्भासितयोरपि प्रागुक्तयुक्त्या संवित्प्रकाशाधीनजीवितत्वात् संविदं विभेत्तुमशक्यत्वात् तत्कलनाविहीनमत एव 'नित्यं' । कालकलनारहितत्वाद् देशाद्यपरिच्छिन्नत्वेन 'विभुं' । भरणरवणवमनस्वभावत्वात् भैरवरूपं नाथं स्वामिनं विश्वभरितपूर्णाहन्ताचमत्कारशालिनं शिवस्वरूपमित्यर्थः । एवमस्य प्रकरणस्य तात्पर्यार्थः, यस्मात्संविद्घनात्स्वात्मन इदं विश्वमुदेति तत्र विश्रान्तं प्रतिबिम्बकल्पतया यदिच्छयैवावभासते । यश्च तस्य प्रकाशमानस्यात्मा तेनानावृतो यत् स्वातन्त्र्याद्यत्र चानधिकत्वेऽप्यधिकमिवेदं भाति स एव परमार्थस्वभावोऽनुत्तरप्रकाशात्मा शिवोऽहमस्मि पूर्ण इति एवं शांभवोपायेन सहृदयाश्चिन्वन्तु स्वात्मानमिति ।। ७ ।।

एवमुक्तप्रकारायाः परमार्थचर्याया अनवरतपरामर्शनेन परशक्त्यनुगृहीताः स्वात्मपरमार्थमयीं त्रिजगतीं पश्यन्तो भैरवधाम्नि नित्यसमाविष्टाः स्युरित्यव्यवहितां सद्यः फलप्राप्तिं स्वसंविदितामावेदयन्नाह—

सद्वृत्तसप्तकमिदं गलितान्यचिन्ताः सम्यक्स्मरन्ति हृदये परमार्थकामाः ।
ते भैरवीयपरधाम मुहुर्विशन्ति जानन्ति च त्रिजगतीं परमार्थचर्चाम् ।। ८ ।।

स्पष्टम् ।। ८ ।।

इति श्रीमहामाहेश्वरश्रीमदाचार्याभिनवगुप्तपादविरचितायां परमार्थचर्चायां पं० श्रीहरभट्टशास्त्रिकृतं विवरणं समाप्तम् ।।

पञ्च महाभूत धर्मयोग

मूल त्रिकोण निज गुह्य गुह्यापधाता

[illegible] जीव हित मान सुता वालिका।

केन्द्र स्थिता प्रविशति राज मद हंस नारत्य

—या सा सायाम योगिकानां भवानी

—सौन्दर्य लहरी

हंसगेह

SVB
S.No
Subj
Phi
Sub.